संस्कृतविद्यापीठग्रन्थमालायाः द्विनवतितमं पुष्पम्

श्रीमाधवाचार्यप्रणीता

# जैमिनीयन्यायमाला

## प्रकाशिकाव्याख्यायुता

### द्वितीयोऽध्यायः

(धर्मभेदाध्यायः)

प्रधानसम्पादकः

**प्रो. रमेशकुमारपाण्डेयः**

कुलपतिः (प्रभारी)

व्याख्याकारः

**डॉ. प्रभाकरप्रसादः**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-110016

## ग्रन्थपरिचयः

जैमिनीयन्यायमालाख्योऽयं ग्रन्थः पद-वाक्यप्रमाणानां परम्पारमुपेयुषां श्रीमाधवाचार्याणां मीमांसासागरे प्रवेशायाधिकरणसारबोधनार्थं कृतितल्लजरूपेण दर्शनजगति विराजत इति समेषां विदितमेत। तस्य सरलव्याख्या जैमिनीयन्याय-मालाप्रकाशिकाख्या छात्राणां सुबोधाय, विदुषां मुदे शास्त्रदीपिकाभाट्टदीपिकादिग्रन्थानां तत्तदधिकरण-व्याख्याने सूक्ष्मेक्षिकया मतभेदानां निरूपणपरा गुरुमतानुसारेणापि विषयप्रतिपादनपरा ग्रन्थकारेण प्रभाकरप्रसादेन प्रणीता। एतद्व्याख्यानेन सह मूलग्रन्थस्यावलोकनेन मीमांसाधिकरणानां विवेचनं सुस्पष्टं भवतीति धिया व्याख्येयं समारब्धा। अस्य ग्रन्थस्य प्रथमाध्यायः (प्रमाणाध्यायः) विद्यापीठत एव प्रकाशितः।

संस्कृतविद्यापीठग्रन्थमालाया द्विनवतितमं पुष्पम्

श्रीमाधवाचार्यप्रणीता

# जैमिनीयन्यायमाला

## प्रकाशिकाव्याख्यायुता

### द्वितीयोऽध्यायः

( धर्मभेदाध्यायः )

प्रधानसम्पादकः

प्रो. रमेशकुमारपाण्डेयः

कुलपतिः (प्रभारी)

व्याख्याकारः

डॉ. प्रभाकरप्रसादः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुतुब सांस्थानिकक्षेत्रम्
नवदेहली-११००१६

आई.एस.बी.एन : 81-87987-66-9

प्रकाशनवर्षः - 2014



मूल्यम् : ₹ 200/-

मुद्रकः
अमरप्रिंटिंगप्रैसः
8/25 विजयनगरम्, देहली-११०००९
दूरभाषः :· 9871699565, 8802451208

**प्रो. रमेश कुमार पाण्डेय**
कुलपति (प्रभारी)
श्री लाल बहादुर शास्त्री
राष्ट्रिय संस्कृत विद्यापीठ
बी-4, कुतुब सांस्थानिक क्षेत्र,
नई दिल्ली-110016

**Prof. Ramesh Kumar Pandey**
Vice Chanceller (I/C)
Shri Lal Bahadur Shastri
Rashtriya Sanskrit Vidyapeetha
B-4, Qutab Institutional Area,
New Delhi-110016

# पुरोवाक्

जैमिनीयन्यायमालायाः द्वितीयभागं विद्वत्करकमलेषु प्रस्तुवन्नहं नितरां हर्षमनुभवामि। ग्रन्थोऽयं मीमांसासिद्धान्तगवेषणतत्पराणां जिज्ञासूनां महते उपकाराय भविष्यतीति मे दृढीयान् विश्वासः। भारतीयविद्यायाः अनुशीलने मीमांसादर्शनस्य भूमिका नास्त्यविदितं विदुषाम्।

भारतीयदर्शनेषु मीमांसादर्शनमनितरसाधारणं दर्शनम्, यतः सर्वेषु दर्शनेषु ये विचारा मोक्षोपयोगिनस्ते सर्वेऽप्यत्र तर्कपादेऽर्थात् प्रथमाध्यायस्य प्रथमे पादे देहातिरिक्तस्यात्मनो निरूपणप्रसङ्गे वैदिककर्मानुष्ठानोपयोगिता-सिद्ध्यर्थं प्रतिपादिता एवं, एतद्विहाय वैदिककर्मानुष्ठानस्य याथातथ्येन स्वरूपनिरूपणार्थं ये न्याया विचारितास्ते व्यवहारेऽपि सर्वेषु क्षेत्रेषु अप्रतिहतरूपेण सञ्चाराय प्रभवन्तीत्यत्र नास्ति संशीतिलिशः। प्रथम एवाधिकरणेऽत्र "स्वाध्यायोऽध्येतव्यः" इति विध्यर्थविवेचनपुरस्सरं वेदाध्ययनमर्थज्ञानार्थमर्थज्ञानञ्चासन्दिग्धमबाधितं मीमांसान्यायैकनिर्णेयमत एवैतच्छास्त्राध्ययनं विहितत्वान्नित्यमिति मीमांसादर्शनस्य तर्कशास्त्रत्वं वेदाध्ययनवदवश्याध्येय्यत्वं युक्तिभिर्निर्णीतम्। उक्तञ्च "मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः" "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर" इति। एतेनेदं सिद्ध्यति शास्त्रमिदं श्रद्धामात्रनिबन्धनं नास्त्यपि तु पूर्णतः वैज्ञानिकं सदसद्विवेचनपरं लोकानां सद्धर्ममार्गे प्रवर्तकमवश्यं श्रेयोऽर्थिभिरध्येय्यमिति। शास्त्रमिदं परमकारुणिकेन महर्षिजैमिनिना अनादिकालतः वैदिकपरम्पराप्राप्तस्य कर्मानुष्ठानस्य स्वरूपज्ञानस्य प्रकाशनार्थं द्वादशाध्यायेषु विभक्तं सहस्राधिकरणगर्भं प्रमाणस्वरूपसाधनफलैः समग्रस्य

धर्मस्य प्रकाशनार्थं प्रणीतं परमगम्भीरम्। अस्य शास्त्रस्य विषयाणां सुखेनावगाहनार्थं पदवाक्यप्रमाणपारावारीणैः श्रीमाधवाचार्यैः सहस्रद्वयपरिमित-श्लोकैः जैमिनीयन्यायमालाख्यः प्रकरणग्रन्थः व्यरचि। तस्यापि सम्प्रति छात्राणां सुखेनार्थबोधो न भवतीति धिया सरलव्याख्यानमपेक्षितमिति व्याख्यकारस्य ग्रन्थस्यास्य व्याख्याने प्रवृत्तिरुत्पन्ना। अस्य प्रथमाध्यायस्य व्याख्या प्रकाशिकाख्या प्रथमभागेऽस्माकं विद्यापीठादेव प्रकाशिता। सम्प्रति द्वितीयोऽध्यायः प्रकाशिकाव्याख्यया सह प्रकाशपथमानीयत इति प्रसन्नं मे मनः।

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम्।।

इत्यधिकरणलक्षणमनुसृत्य व्याख्येयं प्रत्येकस्याप्यधिकरणस्य को विषयः? कश्चात्र सन्देहः? कथं पूर्वपक्षः? कथं सिद्धान्तः युक्तिभिः स्थाप्यते, कर्मानुष्ठाने चास्य विवेचनस्य किं किं कुत्र कुत्र प्रयोजनमिति सरलया रीत्या छात्राणां सुखावबोधो यथा भवेत्तथा विवेचनं करोति। सम्प्रति मीमांसादर्शनस्याध्ययनं वैदिकश्रौतकर्मणामनुष्ठानं च क्वचित् क्वचिदेव प्रवर्तते। अतः कार्येणानेन मीमांसाशास्त्रस्य साहित्यस्य वृद्धिः, अस्य ग्रन्थस्याध्ययनेन समग्रस्यापि मीमांसादर्शनस्याध्ययने छात्राणां प्रवृत्तिर्भवेदित्याशासे।

व्याख्याकर्तृभ्यः डॉ. प्रभाकरप्रसादमहोदयेभ्यः हार्दिकसाधुवादान् वितनोमि यैः महता श्रमेण छात्राणां विदुषाञ्च लाभाय व्याख्यासहितग्रन्थोऽयं निरमायि। प्रकाशकेभ्यः अमरमुद्रणालयाधिकारिभ्यः श्रीहीरालालमहोदयेभ्यः धन्यवादान् वितीर्य विरमामि विस्तरात्।

20.3.2014

—प्रो. रमेशकुमारपाण्डेयः

# भूमिका

भारतीयदर्शने मीमांसादर्शनं परममास्तिकं दर्शनं वेदवाक्यानां सन्दिग्धानामिदमित्थमित्यर्थनिर्णयानुकूलन्यायनिबन्धनात्मकं परमकारुणिकेन महर्षिजैमिनिना निबद्धं द्वादशलक्षण्यात्मकम्। अत्र वेदविहितोऽर्थो धर्म इति धर्मस्य लक्षणं प्रतिपाद्यते। अतः द्वादशाध्यायेषु धर्मे प्रमाणम्, धर्मभेदाः, शेषशेषिभावविचारः, प्रयुक्तिविचारः, क्रमविचारः, अधिकारिविचारः, अतिदेशविचारः, विशेषतः अतिदेशविचारः, ऊहः, बाधः, तन्त्रम्, प्रसङ्ग इति क्रमेण धर्मस्वरूपं द्वादशाध्यायेषु विविच्यते। उक्तञ्च–

**प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः।**
**अधिकारोऽतिदेशश्च सामान्येन विशेषतः॥**
**ऊहो बाधश्च तन्त्रञ्च प्रसङ्गाश्चोदिताः क्रमाद्॥** इति।

अत्र धर्मशब्देन वैदिककर्मणां ग्रहणं भवति। तानि वैदिककर्माणि इहामुत्र च फलदायकानि नानाविधानि नित्यनैमित्तिककाम्यप्रायश्चित्तभेदेन भिन्नानि। तत्राकरणे प्रत्यवायजनकत्वं नित्यत्वम्, निमित्ति सति क्रियमाणत्वं निमित्तभवं नैमित्तिकम्। काम्यमुद्दिश्य प्रवृत्तम् काम्यम्, दोषपरिहाराय कर्तव्यत्वेन विहितं प्रायश्चित्तमिति चतुर्णां विवेकः। वेदे एतेषां कर्मणां सेतिकर्तव्यताकं समग्रं स्वरूपं नैकत्र क्रमश उक्तमतः केवलं वेदानामवलोकनेन तद्भाष्यटीकाद्यध्यानेन याथार्थ्येन विज्ञायते। तदर्थमिदं शास्त्रमेव शरणम्। अत्र मीमांसाशास्त्रे वेदवाक्यानां चातुर्विधत्वं पञ्चविध्यं वा स्वीकृत्य वेदवाक्यैरवसेयो धर्मः क इति निर्णीयते। अत एवोच्यते–

**धर्मे प्रमीयमाणे तु वेदेन करणात्मना।**
**इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥** इति

तानि च वेदवाक्यानि विध्यात्मकानि, अर्थवादात्मकानि मन्त्रात्मकानि, नामधेयात्मकानि इति चतुर्विधानि इति केचन। निषेधात्मकानां वाक्यानां पृथग्गाणनेन पञ्चविधानीति केचन। तत्र प्रथमाध्याये उपजीव्यत्वादादौ प्रमाणानि धर्मे कानि? कथञ्च तेषां प्रामाण्यमिति वर्ण्यते। विधिः, अर्थवादः, मन्त्रः, नामधेयम्, स्मृतिः, शिष्टाचारः, वाक्यशेषः, पदार्थसामर्थ्यमित्यष्टौ प्रमाणानि, तत्र विधेस्तावत्प्रयोजनवदर्थविधायकत्वेन प्रामाण्यमन्येषां तदेक-वाक्यतया स्तुत्याद्यर्थत्वेन, प्रयोगकालिकार्थस्मारकत्वेन, विधेयपरिचायकत्वेन प्रामाण्यम्। स्मृतिशिष्टाचारयोः श्रुतिमूलतया प्रामाण्यं स्वीक्रियते। द्वितीयाध्याये च कर्मभेदः प्रतिपाद्यते। विधिश्च उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिर-धिकारविधिश्चेति चतुर्विधः। तत्र प्रथमद्वितीयाध्यायाभ्यामुत्पत्तिविधिविचारः, तृतीयचतुर्थाध्यायाभ्यां विनियोगविधिविचारः, पञ्चमाध्याये प्रयोगविधिविचारः, षष्ठे चाधिकारविधिविचारः इति सर्वं प्रकृतियागसम्बद्धं विषयजातं पूर्वषट्केन प्रतिपाद्यते। सप्तमाध्यायादारभ्य दशमाध्यायं यावदतिदेशोहबाधविचारैः विकृतियागानां स्वरूपं चिन्त्यते। अन्ते एकादशद्वादशाध्यायाभ्यां तन्त्रावापप्रसङ्ग-विचारैः सेतिकर्तव्यताकप्रकृतिविकृतियागयोः उपदिष्टातिदिष्टपदार्थेयत्तावधारणा-धीनं प्रयोगपरिमाणं निश्चीयते। एवमाहत्य द्वादशाध्यायेषु धर्मः कः? कथं वा सः अनुष्ठितोऽभ्युदयाय भवतीति प्रमाणस्वरूपसाधनफलैः सह सप्रपञ्चं प्रपञ्चितमित्यभ्युदयार्थिभिरवश्यमतिगभीरे मीमांसासागरेऽवगाहनं कार्यमेवान्यथा स्वमनीषयान्यथा ज्ञातः कृतश्च धर्मोऽनर्थाय भवेद्।

अस्मिन् मीमांसादर्शने सन्ति नैके ग्रन्थाः, तत्र श्रीमाधवाचार्यैः प्रणीतः जैमिनीयन्यायमालाख्यः ग्रन्थः श्लोकरूपेण निबद्धः सरलया गिरा स्पष्टमधिकरणसारं विवेचयति। प्रथमः प्रमाणाध्यायः पूर्वं मुद्रितः, द्वितीयो भेदाध्याय इदानीं प्रवर्तते। अत्र क्रमशः चतुर्भिः पादैः कर्मभेदो निरूप्यते। प्रथमपादे "यजेत स्वर्गकामः" "सोमेन यजेत" इत्यादिवाक्येषु आख्यात-मेवापूर्वबोधकम्, अपूर्वसदसद्भावश्चेत्यादिकः कर्मभेदचिन्तोपयुक्तः विचारः उपोद्घातरूपेण निरूपितः। द्वितीयपादे च एकप्रकरणगतानां शब्दान्तराभ्याससङ्ख्यासंज्ञागुणनिमित्तानां कर्मभेदानां चिन्ता कृता। तृतीयपादे च रथन्तरादीनां साम्नांविषये कर्मभेदापवादः, प्रकरणान्तरात्कर्मभेदश्च,

देशसंस्कारादिनां कर्मभेदकत्वचिन्तेति सर्वं विवेचितम् प्रवृत्तः। चतुर्थे च पादे प्रयोगभेदाभेदौ विवेचितौ। उक्तञ्च–

उपोद्घातः कर्मभेदमानं तस्यापवादगीः।
प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः॥ इति[1]

तत्र "यजति ददाति जुहोतीति" एकप्रकरणे श्रुतानां यागदान होमादीनां धातुभेदेन धात्वर्थभेदेऽपि भावना भिद्यते न वेति सन्देहे धातूनां भेदेऽपि भावनावाचकलिङादेः सर्वत्र प्रत्यभिज्ञयाऽभेदावगमात् धात्वर्थस्य च भावनां प्रति गुणभूतत्वाद्गुणभेदेन प्रधानभेदस्यान्याय्यत्वादभेद एवेति पूर्वपक्षे धातोरिति विवक्षितैकवचनेन सूत्रेणैकधातोरुपरि प्रत्ययविधानात् सर्वत्र धात्वर्थानुरञ्जिताया भावनायाः प्रतीतेरेकानुरञ्जितायाश्चान्यानुरञ्जना-योगात्प्रतिधात्वर्थं भिद्यत एव भावनेति राद्धान्तितम् "शब्दान्तरे कर्मभेदः कृतानुबन्धत्वाद्"[2] इति, शब्दान्तरे–धात्वन्तरे सति कर्मभेदः–भावनाभेदो भवितुमर्हति; कृतानुबन्धत्वात् तेनैव कृतावच्छेदत्वात् भावनायाः। अतः धातुभेदस्य कर्मभेदे निमित्तत्व युक्तम्। सोऽयं शब्दान्तरात्कर्मभेदः।

क्वचिदसत्यपि धातुभेदेऽभ्यासात् कर्मभेदः स्वीक्रियते, यथा "समिधो यजति" "तनूनपातं यजति" "इडो यजति" "बर्हिर्यजति" "स्वाहाकारं यजति" इति पञ्चकृत्वो यजतिश्रुतौ किं प्रथमविहितस्यैव यागस्य पुनः पुनरभ्यासः उत पञ्चापि विधय इति सन्देहे शब्दान्तराभावादत्रैकस्यैव यजतेः पुनः पुनः श्रवणात्तस्यैवायमभ्यास आदरार्थ इति पूर्वपक्षे प्राप्ते अप्रवृत्तप्रवर्तकत्वाद्विधेः सर्वेषाञ्च प्राथम्यार्हतया विध्यनुवादविनिगमाभावा-दानर्थक्यपरिहाराय भिन्नविधितया कर्मभेदः इति सिद्धान्तितम् "एकस्यैव पुनःश्रुतिरविशेषादनर्थकं हि स्याद्" इति। अयमर्थः–एकस्य विधेः पुनःश्रवणमपि एवं कर्मभेदकम्, अविशेषात् विध्यनुवादविशेषाभावाद् इतरथा पुनःश्रवणं हि–यस्माद् अनर्थकं स्याद्। सोऽयमभ्यासात् कर्मभेदः। तथा "सप्तदश प्राजापत्यान् पशूनालभेते–" त्यत्र किं सप्तदशपशुकमेकं कर्म उत सप्तदश कर्माणि विधीयन्ते इति विशये प्राजापत्यानित्यत्र कृतैकशेषाणां पशूनां

1. जैमिनीयन्यायमाला 1.1.14

तद्धितेनैकप्रजापतिदेवताकत्वबोधनादेककर्मत्वमिति प्रापय्य राद्धान्तितम्, एककर्मत्वे हि एक एवातिदेशः स्यात् ततश्चैकपशुनिष्ठमेकादशावदानमतिदेश-प्राप्तमेकपशौ निष्पन्नमितीतरेषामदृष्टार्थता स्यात्, सप्तदशकर्मत्वे तु प्रतिपशु एकादशावदानसिद्धिरिति दृष्टार्थतातः कृततद्धितदेवतासम्बन्धतया देवतासम्बद्धा-नामेकशेषतेति सप्तदशकर्माणीति भाष्यकारैः स्वमतत्वेन विचारितम्। वृत्तिकाराणामुदाहरणन्तु "तिस्र आहुतीर्जुहोति" इत्यत्र एकस्य जुहोतेः श्रवणादिकहैहोमत्वम्, त्रित्वन्तु एकादशप्रयाजादिवदावृत्त्येति पूर्वपक्षे प्राप्ते, राद्धान्तः—त्रित्वस्य तावज्जुहोतिसामानाधिकरण्यमुत्सर्गतः होमभेदकम्; एकातिरिक्तसङ्ख्यायाः पृथक्त्वसामानाधिकरण्यस्वरसत्त्वात्। "एकादश प्रयाजान् यजती"त्यत्र तु प्रकृतौ पञ्चत्वावधारणात्मकबाधकसत्वादा-वृत्त्यैकादशत्वं सम्पाद्यते। इह तु नास्ति बाधकमिति होमभेद एव युक्त इति।

तदुक्तं सूत्रकारैः— पृथक्त्वनिवेशात् सङ्ख्यया कर्मभेदः स्याद्" इति। सङ्ख्ययापि हेतुना कर्मभेदः स्यात्; कर्मपृथक्त्वनिवेशात्, कर्मपृथक्त्वेनैव सङ्ख्याया निवेशाद्, एकातिरिक्तसङ्ख्यायाः कर्मपृथक्त्वसामानाधि-करण्यादित्यर्थः। सोऽयं सङ्ख्यया कर्मभेदः। एवं ताण्ड्यब्राह्मणे श्रुते, अथैष ज्योतिरथैव विश्वज्योतिरेतेन सहस्रदक्षिणेन यजेत" इति वाक्ये ज्योतिर्विश्वज्योतिशब्दयोः प्रकृतज्योतिष्टोमानुवादकत्वं कर्मान्तरविधायकत्वं वेति विशये सत्येष इति सर्वनाम्नः प्रकृतावमर्शित्वाज्ज्योतिरादिशब्दस्य तत्समानाधिकरणत्वात्पूर्वकर्मैवानूद्य सहस्रदक्षिणालक्षणगुणान्तरं विधीयत इति प्राप्ते ज्योतिष्टोमशब्दस्य ज्योतिरादिशब्दानाञ्च स्वरूपविलक्षणत्वाद् भिन्नार्थत्वे सम्भवत्येकदेशलक्षणया एकार्थकल्पनायामन्याय्यत्वात् सर्वनाम्नश्च प्रस्तोष्यमाणपरामर्शितयापि सम्भवान्नामान्तरं कर्मान्तरं गमयतीति निर्णीतं "संज्ञा चोत्पत्तिसंयोगाद्" इत्यत्र। संज्ञा च पूर्वविलक्षणा कर्मभेदिका उत्पत्तिसंयोगात्-कर्मस्वरूपज्ञापनसमय एव तस्य नाम्नः संयोगादित्यर्थः। सोऽयं संज्ञया कर्मभेदः। तथा "वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र वाजिभ्य इत्यत्र वाजमन्नमेषामिति व्युत्पत्त्याऽऽमिक्षान्नयुक्तविश्वदेवदेवताक-कर्मानुवादेन वाजिनगुणविधानादेककर्मत्वमिति पूर्वपक्षे प्राप्ते वैश्वदेवीत्यत्र

विश्वे देवा देवता अस्या इत्यर्थेऽण्प्रत्ययविधानादन्तर्णीतेदमा परमृष्टामिक्षा-द्रव्यस्यतद्धितनिर्दिष्टविश्वदेवसम्बन्धेन श्रौततया प्रबलेन सह "वाजिभ्यो वाजिनम्" इति पदद्वयात्मकवाक्यावगतवाजिनसम्बन्धस्य विकल्पसमुच्चय-योरभावाद्वाजिनगुणविशिष्टकर्मान्तरविधानमिति सिद्धान्तितम् "गुणश्चापूर्वसंयोगे वाक्ययोः समत्वाद्" इत्यत्र। गुणश्च कर्मभेदकः, अपूर्वसंयोगे–अपूर्वकर्मसंयोगे-ऽर्थात्पूर्वकर्मसम्बन्धाभावे सति। कुतः वाक्ययोः समत्वात्- समे हि तदा वाक्ये भवतः, ततोऽविघातमनेकं कर्मेत्यर्थः। सोऽयं गुणान्तरात् कर्मभेदः। तथाऽसन्निहितदेशकालनिमित्तफलसंस्कारसम्बद्धकर्मवाक्येषु "मासमग्निहोत्रं जुहोती"–त्यादिषु किं प्रकृताग्निहोत्रादौ मासादिगुणविधानमुत तद्गुणकं कर्मान्तरविधानमिति सन्देहे कर्मान्तरविधाने गौरवप्रसङ्गादग्निहोत्रशब्देन तदनूद्य गुणमात्रविधानमिति पूर्वपक्षे प्राप्ते मासादेरनुपादेयतया साक्षाद्विधानायोगादग्नि-होत्रादेश्च विच्छिन्नप्रकरणतया प्रत्यभिज्ञाभावाच्च मासादिगुणविशिष्टं कर्मान्तरमेव विधीयते, अग्निहोत्रादि धर्मातिदेशार्थञ्चाग्निहोत्रादिनामोपदेश इति प्रकरणान्तरात्कर्मान्तरत्वं निरधारि–"प्रकरणान्तरे प्रयोजनान्यत्वम्" इत्यत्र। अयमर्थः–प्रकरणान्तरे प्रयोजनान्यत्वं विधेयभावनान्यत्वं स्यान्नतु पुनः पूर्वकर्मानुवादेन तत्र गुणविधानमिति। तदेवं कर्मभेदकानि–शब्दान्तरम्, अभ्यासः, सङ्ख्या, संज्ञा, गुणः, प्रकरणान्तरमिति षण् निमित्तानि। एतेषां लक्षणानि च पूर्वाचार्यैः सङ्ग्रहेण उक्तानि–

शब्दान्तरं धातुभेदोऽभ्यासो विधेः पुनः श्रुतिः।
उत्पत्तिस्था द्व्यादिसङ्ख्या संज्ञा चाङ्गमपूर्वगम्॥
अनुपादेयसम्बन्धोऽसन्निधिः प्रक्रियान्तरम्।
इति शब्दान्तरादीनामुक्तं लक्ष्म विचक्षणैः॥ इति

एवं कर्मभेदनिरूपणपरस्य द्वितीयाध्यायस्य जैमिनीयन्यायमालायाः प्रकाशिकाख्या व्याख्या छात्राणां मीमांसादर्शनज्ञानसौकर्याय यथामति मया कृता। अत्र सर्वेषामधिकरणानां सम्पूर्णविषयवाक्यानां प्रदर्शनपुरस्सरं ग्रन्थस्याशयो वर्णितः। क्वचित् क्वचिद् भाष्यकारीयमिदं मतम्, वार्तिककारीयमिदं मतमिति मतभेदोऽपि प्रदर्शितः।

अयं ग्रन्थः सम्प्रति विद्यापीठस्य प्रकाशनविभागतः मुद्राप्यते। इदं कार्यं प्रकाशनविभागस्य सहयोगेन विना भवितुं नार्हति, अतः प्रकाशन-विभागे कृतायामावदेनायां कृपया श्रीमद्भिः प्रकाशनविभागस्याध्यक्षैः प्रो. रमेशकुमारपाण्डेयमहोदयैः तथा तत्र सहायकाधिकारिभिः डॉ. ज्ञानधरपाठक-महाभागैश्च कृपया मम पुस्तकस्य मुद्रापणार्थमनुमतिः प्रदत्ता, एवमस्मिन् कर्मणि अपेक्षितान् सहयोगान् सहर्षं दत्तवन्तः, अतः तेषां प्रकाशनविभाग-स्याध्यक्षवर्याणां सम्प्रति कुलपतिपदे विराजमानानां विद्यामूर्त्तीनां सर्वासु दिक्षु विश्रुतकीर्तीनां प्रो. रमेशकुमारपाण्डेयमहाभागानां कृते सादरं सविनयं सप्रणामं धन्यवादान् निवेदयामि। एवं प्रकाशनविभागस्याधिकारिणां साहित्याद्यनेकशास्त्रेषु कृतभूरिपरिश्रमाणां डॉ. ज्ञानधरपाठकमहाभागानां कृतेऽपि सप्रणामं धन्यवादान् निवेदयामि। एवमेवास्य ग्रन्थस्य मुद्रणार्थं कृतपरिश्रमाणां अमर प्रिंटिंग मुद्रणालयाधिकारिणां श्रीहीरालालमहाभागानामपि धन्यवादान् निवेदयामि। अन्ते यथामति सम्पादितेऽप्यस्मिन् कार्ये याः काश्चन त्रुटयः स्युः मदीयानवधारणादिति मर्षयित्वा सूचनीयोऽयं जन इति साञ्जलिबन्धं भूयोभूयः प्रार्थये कृपाधनान्विदुषः इति निवेदयति–

विदुषां विधेयः

**प्रभाकरप्रसादः**

### जैमिनीयन्यायमालायास्तद्व्याख्यायाश्च

### द्वितीयोऽध्यायः कर्मभेदाध्यायः

# विषयसूची

#### प्रथमपादः

द्वितीयः पादः



तृतीयः पादः

# द्वितीयोऽध्यायः

## ( धर्मभेदाध्यायः )

### प्रथमः पादः

#### जैमिनीयन्यायमाला

प्रमाणमुपजीव्यत्वात् प्रथमेऽध्याय ईरितम्।
मानाधीनस्य धर्मस्य द्वितीये भेद उच्यते॥१॥

#### जैमिनीयन्यायमालाप्रकाशिका

गोकर्णाख्ये शिवक्षेत्रे धूर्जटेर्नित्यसन्निधौ।
स्थितमारामविघ्नेशं सिद्धिदं प्रणमाम्यहम्॥

विध्याद्यष्टौ प्रमाणानि धर्मे ह्युक्तानि साम्प्रतम्।
तत्स्वरूपविशेषार्थं धर्मभेदोऽत्र चिन्त्यते॥

"शास्त्रे पूर्वोत्तरीभावोऽध्यायानामभिधास्यते" इति प्रतिज्ञातत्वादादौ प्रमाणभेदाध्याययोः सङ्गतिरत्र निरूप्यते–

उपजीव्यत्वात्=कारणत्वात् प्रथमेऽध्याये प्रमाणम्=धर्मे प्रमाणं किमिति ईरितम्=उक्तम्, मानाधीनस्य धर्मस्य=धर्मस्य सिद्धेर्मानाधीनत्वात् प्रमाणनिरूपण-स्योपजीव्यत्वादादौ तन्निरूप्य द्वितीये=द्वितीयेऽध्याये भेदः=धर्मभेदः उच्यते।

अयमाशयः–"अथातो धर्मजिज्ञासा" इति धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः शास्त्रारम्भे, तदनु लक्षणप्रमाणाभ्यां भवति वस्तुसिद्धिरिति न्यायेन "चोदनालक्षणोऽर्थो धर्म" इति सूत्रेण धर्मस्य लक्षणं किम् प्रमाणञ्च किमिति निरूपितम्। अत्र च चोदनालक्षणोऽर्थः धर्म इति धर्मस्य लक्षणम्,

अर्थात् चोदनाप्रवेदितोऽर्थो धर्म इति अग्निहोत्रादीनां धर्मत्वमिति धर्मस्यासाधारण-स्वरूपम्, चोदना विधिरेव लक्षणं प्रमाणं धर्म इति प्रमाणमपि धर्मे किमिति प्रवेदितम्। तच्छेषतया तन्मूलतया चार्थवादमन्त्रनामस्मृतिशिष्टाचारवाक्य-शेषपदार्थसामर्थ्याख्यसप्तप्रमाणानीत्याहत्य प्रथमेऽध्याय अष्टौ प्रमाणान्युक्तानि। प्रमाणैः प्रमेयपदार्था एते इति सिद्धे सत्येव तेषां भेदानां विचारः शेषशेषिभावादिविचारो वा कर्तुं शक्यतेऽन्यथा प्रमेयभूतस्य धर्मस्य निश्चयाभावे धर्माणां भेदादिचिन्तानां काकदन्तपरीक्षावत्स्यात्। अतः आदौ प्रमाणानां विचारः कृतः, द्वितीये च धर्मभेदो विचार्यत इति हेतुहेतुमद्भावसङ्गतिर्युज्यते। यद्यपि शेषशेषिभावप्रयुक्त्यादीनामपि प्रमाणाधीनत्वात् धर्मे प्रमाणनिरूपणानन्तरं शेषशेषिभावादीनामपि निरूपणं प्राप्तम् तथापि शेषशेष्यादिविचाराणां कर्मभेदसिद्ध्यधीनत्वात्प्रमाणनिरूपणानन्तरं कर्मभेदविचारस्यैव प्रसक्तिः। तदुक्तं श्रीभट्टपादैः–

**शेषशेष्यादयः सर्वे कर्मभेदनिबन्धनाः।**
**कार्ये ज्ञातेऽधिकारः स्यादुपदेशोऽतिदेशधीः॥** इति[1]

अत्र द्वादशाध्यायानां क्रमः उक्तः, आदौ मानाधीना मेयसिद्धिरिति प्रमाणविचारः, ततः तदधीनः कर्मभेदविचारः, ततः कर्मभेदसिद्ध्यधीनः शेषत्वविचारः, ततः तदधीनः प्रयुक्तिविचारः ततः प्रयोज्यवर्गनिर्णयाधीनः तेषां क्रमविचारः, तत उक्ते धर्मस्वरूपे तत्राधिकारः कस्येति विचारः, एवं प्रकृतियागानां स्वरूपे तदपेक्षितोपदेशविचारे च निर्णीते विकृतियागानां सम्बद्धानामतिदेशोहबाधानां क्रमशः प्रसक्तिः, ततश्च प्रकृतिविकृतियागसम्बद्धा-नामुपदेशातिदेशविचाराणां निरूपणाधीनः उभयसाधारणः कर्मणां प्रयोग-कालेऽनुष्ठेयपदार्थानामियत्तानिर्धारणप्रयोजनः तन्त्रप्रसङ्गादिविचार इति द्वादशाध्यायेषु नियतसङ्गतिमत्त्वं ज्ञायते। एवञ्च हेतुहेतुमद्भावसङ्गत्या प्रमाणविचारानन्तरं धर्मभेदचिन्ता द्वितीयेऽध्याये प्रवर्तत इति युक्तम्।

एवं वा वक्तुं शक्यते– "चोदनालक्षणोऽर्थो धर्मः"[2] इत्यनेन धर्मस्य विधिवेद्यार्थत्वमुक्तम्, विधिश्च चतुर्विधः–उत्पत्तिविधिः विनियोगविधिः

---

१. तन्त्रवार्त्तिकम् २.१.१

२. मी.द. १.१.२

प्रयोगविधिरधिकारविधिश्चेति। तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः, अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः, प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः, फलसम्बन्धबोधको विधिः अधिकारविधिः। तत्र प्रथम-द्वितीयाभ्यामुत्पत्तिविधिव्यापारो व्युत्पाद्यते, तत्रापि विशेषजिज्ञासां प्रति सामान्यज्ञानस्य हेतुत्वादादौ प्रथमाध्यायेन सामान्यतः को धर्मः इति व्युत्पादिते धर्मभेदचिन्ताया द्वितीयेऽवसर इति। इदानीं प्रथमाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

विधिवाक्ये पदैः सर्वैरपूर्वं प्रतिपाद्यते।
प्रत्येकमथवैकेन सर्वैस्तत्प्रतिपादनम्॥२॥

फलान्वयित्वात् सर्वेषां प्रधानान्वयलाभतः।
लाघवादेकबोध्यत्वं तच्छेषस्तु पदान्तरम्॥३॥

## जैमिनीयन्यायमालाप्रकाशिका

विधिवाक्ये="सोमेन यजेत" इत्यादिविधिवाक्ये प्रत्येकं सर्वैरपि पदैः अपूर्वं प्रतिपाद्यतेऽथवा एकेनैव पदेन तस्यापूर्वस्य प्रतिपादनं भवतीति सन्देहे फलान्वयित्वात् प्रधानान्वयलाभतः सर्वैरेव पदैस्तत्प्रतिपादनमिति पूर्वपक्षे लाघवाद् एकबोध्यत्वम्=अपूर्वस्यैकेन पदेनैव बोधो भवतीति एकपदबोध्यमपूर्वम्, तच्छेषस्तु पदान्तरम्=पदान्तरम् अपूर्वप्रतिपादकपदस्य शेष एवेति भावः।

अयमाशयः–"सोमेन यजेत" "अग्निहोत्रं जुहुयात्" इत्यादि-वाक्यैर्यागहोमादीनां धर्मत्वेन विधानं भवतीति प्रमाणाध्यायेन प्रतिपादितम्। विध्यर्थवादमन्त्रनामधेयात्मकानां वेदावयवानां विधायकत्वस्तावकत्वस्मारकत्व-धात्वर्थावच्छेदकत्वरूपेण क्रमशः प्रामाण्यं भवतीति च प्रतिपादितम्। तेनैव विधिविधेयो यागः कालान्तरभाविनां स्वर्गादीनां अपूर्वद्वारा साधनं तेन धर्म इत्यपि उक्तप्राय एव विषयः। "सोमेन यजेत" इत्यादिवाक्येषु च सुबन्तपदं सोमेनेति तिङन्तपदं यजेतेति द्विविधपदानि श्रूयन्ते। तत्रापूर्वप्रतिपादनं किं सर्वैरप्यर्थात् सुबन्तपदैः तिङन्तपदैश्च भवति अथवा तिङन्तपदैरेवापूर्वं गम्यत इति सन्देहे प्राणिमात्रस्य प्रवृत्तिः किञ्चित्फलार्थमेव भवतीति

फलस्याभ्यर्हितत्वेन प्रधानत्वात् फलञ्चापूर्वद्वारैव सिद्ध्यतीति सर्वैरपि पदैरपूर्वप्रतिपादनं युक्तम्। यद्यपि लोके घटमानयेत्यादौ द्वितीययैव कर्मत्वे ज्ञाते तस्य धात्वर्थेनैवान्वयो न तु प्रधानेनेति सर्वानुभवसिद्धत्वात् तदनुसृत्य "व्रीहीनवहन्ति" "व्रीहीन् प्रोक्षती"–त्यादौ व्रीह्यादिशब्दानां प्रधानान्वयत्वा-सम्भवात् सर्वेषां सुबन्तपदानामपूर्वप्रतिपादकत्वं न सङ्गच्छते तथापि "सोमेन यजेत" इत्यादौ सोमादीनामप्यपूर्वप्रतिपादकत्वाङ्गीकारे बाधाभावात् लोकेऽपि "दण्डेन ताडये–" त्यादौ दण्डादीनामपि प्रधानान्वये बाधाभावात्, सुबन्तानामेव अपूर्वप्रतिपादकत्वं तिङन्तानामेवापूर्वप्रतिपादकत्वं वेत्यत्र विनिगमने प्रमाणाभावाच्च तिङन्तानां "यजेत" इत्यादिपदानामेवापूर्वप्रतिपाद-कत्वमित्यङ्गीकारे च सोमादीनां धात्वर्थे यागे धात्वर्थस्य च फलेऽन्वयो वक्तव्यः, तथासति धात्वर्थस्य यागादेः फलं प्रति उपादेयत्वविधेयत्वगुणत्वानां त्रिकम् सुबन्तार्थानां सोमादीनां प्रति उद्देश्यत्वानुवाद्यत्वप्रधानत्वानां त्रिकमिति एकत्र यागे विरुद्धत्रिकद्वयापत्तिः स्यात्। एतद्वारणार्थं सोमेन यागं भावयेत् यागेनापूर्वं भावयेदिति वाक्यभेदः स्वीकार्यः। विध्यावृत्तिलक्षणस्य वाक्यभेदस्य दोषत्वं नाङ्गीक्रियते चेत् "न सुरां पिबेद्" इत्यत्रापि सुरां पिबेत्, सुरां न पिबेद् इति अर्थद्वयकल्पनापत्त्या वेदवाक्यानां सन्दिग्धार्थबोधकत्वं स्यादिति महती अनर्थपरम्परा स्यात्। वाक्यभेदो महान् दोष इति ''सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते" इति नियमः आश्रीयते। तर्हि "सोमेन यजेत" इत्यादौ सोमवता यागेनापूर्वं भावयेदिति मत्वर्थलक्षणामाश्रित्य वाक्यभेदेन विनैव निर्वाहो भवतु इति चेत् तर्हि मत्वर्थलक्षणाश्रयणमेव दोषः। शक्यार्थस्वीकारे बाधे सत्येव लक्षणाऽऽश्रीयते, विनैव लक्षणां सर्वेषां पदानां प्रधानान्वयस्वीकारेणैवोपपत्तौ लक्षणाश्रयणं दोषायैव। अतः सर्वेषामपि पदानामपूर्वप्रतिपादकत्वं युक्तमिति पूर्वपक्षे प्राप्ते समाधिरभिधीयते।

सर्वेषां पदानां प्रधानान्वयलोभेनापूर्वप्रतिपादकत्वस्वीकारे बहूनामपूर्वाणां कल्पना प्रसज्यते। कल्पना चापूर्वस्यार्थापत्त्या भवति, तत्र च एकस्यैवापूर्वस्य कल्पनयोपपत्तौ बहूनामपूर्वाणां कल्पना न युज्यते; यतः कल्प्यमानञ्च लाघवानुरोधेनैव कल्पनीयम्। न चैकस्यैव पदस्यापूर्वप्रतिपादकत्वं स्वीक्रियते चेत् विरुद्धत्रिकद्वयापत्तिरिति वाच्यम्। उद्भिदादिपदानां नामत्वेनान्वयस्योक्त-

त्वादुद्भिदा यजेतेत्यत्र विरुद्धत्रिकद्वयापत्तिर्नास्त्येव, "सोमेन यजेत" इत्यत्र तु सोमशब्दस्य लताविशेषे रूढतया यागनामत्वस्य बाधात् वाक्याश्रितवाक्य-भेदापेक्षया पदाश्रितमत्वर्थलक्षणादोषस्य लघुत्वादगत्या मत्वर्थाश्रयणम्–सोमवता यागेनापूर्वं भावयेदिति। सर्वथापि बह्वपूर्वकल्पनापेक्षया वरमेकस्मादेव पदादपूर्वमिति स्वीकरणमिति सिद्धान्तः। पदान्तरन्तु अपूर्वप्रतिपादकपदस्य शेष इति प्रथमवर्णके निर्णीते द्वितीये तदपूर्वप्रतिपादकं पदं किमिति विनिगमने प्रमाणपूर्वकं निर्णयो भविष्यति।

इदानीं द्वितीयं वर्णकं निरूप्यते–

## जैमिनीयन्यायमाला

**द्रव्यादिशब्दतोऽपूर्वधीर्भावार्थपदादुत।**
**द्रव्यादीनां फलार्थत्वात्तच्छब्देन ह्यपूर्वधीः॥४॥**

**क्रियाद्वारमृते द्रव्यं फलेन न हि युज्यते।**
**भावनावाचिनोऽपूर्वमाख्यातादवगम्यते॥५॥**

**धात्वर्थव्यतिरेकेण भावना नेति चेन्न तत्।**
**सर्वधात्वर्थसम्बन्धः करोत्यर्थो हि भावना॥६॥**

**धात्वर्थः करणं तस्यां समानपदवर्णितः।**
**द्रव्याद्युपकृतिर्दृष्टा धात्वर्थोत्पादनात्मिका॥७॥**

## जैमिनीयन्यायमालाप्रकाशिका

द्रव्यादिशब्दतो=द्रव्यवाचकसोमादिसुबन्तपदतः अपूर्वधीः=अपूर्वस्य बोधो भवति उत भावार्थपदाद्=तिङन्तपदात् यजेतेत्यादिना अपूर्वस्य बोधो भवतीति सन्देहे द्रव्यादीनां=द्रव्यवाचकसोमादिपदानां फलार्थत्वाद् तच्छब्देन=सोमादिपदेनापि, अपूर्वधीः=अपूर्वबोधो भवतीति पूर्वपक्षे प्राप्ते द्रव्यं=सोमादिकं, क्रियाद्वारमृते= यागादिक्रियामन्तरा, फलेन न युज्यते=फलेन सम्बद्धो न भवति, अतः भावनावाचिन आख्यातादेव अपूर्वमवगम्यत इति सिद्धान्तः।

धात्वर्थव्यतिरेकेण भावना नेति चेत्=धात्वर्थातिरिक्तभावना नास्तीति पुनः पूर्वपक्षे प्राप्ते सर्वधात्वर्थसम्बन्धः करोत्यर्थो हि भावना=गच्छति, नयति लिखतीत्यादौ सर्वेषु तिङन्तपदेषु गमननयनलेखनादिसकलधात्वर्थसम्बद्धः प्रत्ययार्थः करोत्यर्थः भावनेत्युच्यते, समानपदवर्णितः धात्वर्थः=गमनाद्यर्थः तस्यां भावनायां करोत्यर्थे करणं भवतीति शेषः। धात्वर्थोत्पादनात्मिका= यागादिसम्पादनात्मिका, द्रव्याद्युपकृतिः= द्रव्यादीनामुपकृतिः सोमादीनामुपकृतिः दृष्टा, अतः सोमादीनां साक्षाद् भावनोत्पादकत्वं नास्त्यपि तु धात्वर्थस्य यागादेरेव भावनाकरणत्वमिति द्रव्यादिवाचकसोमादिपदानामपूर्वप्रतिपादकत्वं नास्तीति युक्तम्। अयमाशयः–"सोमेन यजेत" "उद्भिदा यजेत" इत्यादि-विधिवाक्येषु सोमादिकं सुबन्तपदं सोमादिद्रव्यवाचकम्, "यजेत" इत्यादिकं तिङन्तपदं यागादिक्रियाविषयकमिति स्पष्टम्। तत्र पूर्वाधिकरणेन एकस्यैव पदस्यापूर्वप्रतिपादकत्वे निश्चिते द्रव्यवाचकसुबन्तपदादपूर्वप्रतिपादनं भवति उत क्रियाविषयकतिङन्तपदादपूर्वमवगम्यत इति संशये पूर्वपक्ष एवमुत्थाप्यते–सुबन्तपदैः द्रव्यादिपदार्थानां स्मरणं भवति, द्रव्यादिपदार्थाश्च सिद्धाः, फलञ्च-स्वर्गादिकं साध्यम्, यद्यपि भूर्भुवः स्वः महः इत्यादिचतुर्दशलोकानां मध्ये "स्वः" इति स्वर्गलोकः प्रसिद्धः, स च सिद्ध एव तथापि सुखविशेषस्यैव स्वर्गशब्दो वाचकः, स्रक्चन्दनवनिताहिमोष्णादिषु सुखजनकत्वतदजनकत्व-दशयोः स्वर्गशब्दप्रयोगाप्रयोगदर्शनेनान्वयव्यतिरेकाभ्यां सुखमात्रवाचकत्वे निश्चिते

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
यदभिलाषोपनीतञ्च तत्पदं स्वपदास्पदम्।।"

इति अर्थवादश्रवणात् अलौकिकसुखविशेषवाचकत्वं स्वर्गशब्दस्य यथा आदित्यादिपदानां ज्योतिरादिषु लोके प्रयोगे सत्यपि "आकृष्णेन रजसा वर्तमान"[३] "आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम ह"[४] इत्यादिमन्त्रार्थवादप्रामाण्येन देवताविशेषवाचकत्वं "भावन्तु बादरायणोऽस्ति हि"[५] इत्यत्र देवताधिकरणे ब्रह्ममीमांसायां स्वीकृतम्। तस्य स्वर्गपदवाच्यस्य

३. ऋग्वेदः १.३
४. ब्र.सू. शां भाष्ये-१.३.३३
५. ब्र.सू. १.३.३३

अलौकिकसुखविशेषस्य साध्यत्वात्फलं स्वर्गादिकं साध्यम्। भट्टाचार्यैरपि "ये हि पुण्यकृतो जनास्स्वर्गं लोकं यन्ति तेषामेतानि नक्षत्राणि ज्योतींषि यथैषज्ज्योतिरिमं लोकं जयति" इति श्रवणात् इतिहासपुराणोपपन्नं मेरुपृष्ठमिति स्वर्गपदार्थमुपवर्ण्य अन्वयव्यतिरेकाभ्यां विभक्तं केवलमेव सुखं यत्संवत्सरादिष्वनुभूयमानं दुःखसाधनशीतोष्णक्षुत्पिपासादिद्वन्द्वरहितमिति निरतिशयप्रीतिविशेषमेव स्वर्गपदाभिधेयमिति वर्णितम्। विस्तरस्तु स्वर्गकामाधिकरणे भविष्यति। एवञ्च प्रकृते सुबन्तपदैर्बोध्यं द्रव्यादिकं सिद्धम्, फलञ्च साध्यमिति "भूतं भव्याय कल्पते" इति न्यायेन सुबन्तपदप्रतिपाद्यस्यैव प्रधानेन फलेनान्वयो युक्तः धात्वर्थस्य तिङन्तपदप्रतिपाद्यस्य यागादेः स्वत एव साध्यरूपत्वात्तस्य प्रधानेनान्वयो न युक्तः इति सुबन्तपदानामेवापूर्वप्रतिपादकत्वमिति पूर्वपक्षे समाधिरभिधीयते–

क्रियाप्रतिपादकैः तिङन्तपदैरेवापूर्वं कल्प्यते। यद्यपि भूतं भव्याय उपदिश्यते इति नियमेन सिद्धैरेव द्रव्यादिभिः साध्यं सम्पाद्यत इति तु सत्यम् तथापि किं सिद्धं द्रव्यादिकं स्वरूपतः साध्यस्य साधकमुत क्रियाद्वारेति विवेचनीयम्, यदि स्वरूपतः सिद्धं साध्यस्य सम्पादकमिति स्वीक्रियते तदा सदा साध्योत्पत्तिप्रसङ्गः; साधनस्य क्वचिद् विद्यमानत्वात्, यथा काष्ठस्य द्वैधीभावस्य साधनं कुठारादिकम्, तेषां सर्वत्र सुलभत्वात्, स्वरूपतः कुठारस्य साधनत्वस्वीकारपक्षेऽत्र काष्ठस्य द्वैधीभावः सर्वत्र सिद्धः स्यात्; साधनसत्वमात्रस्यैव साध्यनिर्वर्तकत्वात्। अतः द्वितीयः कल्पः अवशिष्यते साधनं क्रियाद्वारा साध्यनिर्वर्तकम्। तर्हि क्रिया च तिङन्तपदैरेव बोध्यते न तु सुबन्तपदैर्द्रव्यवाचकरिति क्रियावाचकेभ्यः यजेत जुहुयादित्यादिशब्देभ्य एवापूर्वकल्पना युक्ता। द्रव्यादीनां सोमादिसुबन्तपदाभिहितानां धात्वर्थात्मकक्रियानिर्वर्तकत्वमेवेति तच्छेषत्वं युक्तम्। [६]एवञ्च क्रियामन्तरेण सिद्धानां द्रव्यादीनां साध्यसाधकत्वानुपपत्त्या क्रियावाचकेन यजेतजुहुयादित्याख्यातेनापूर्वं प्रतीयत इति सिद्धे किं धात्वर्थेनापूर्वं प्रतीयत उत प्रत्ययार्थेनेति

---

६. एवञ्च दृष्टमेव यत् सिद्धैर्द्रव्यादिभिः यागादिक्रिया सम्पाद्यत इति अत एकेनैवापूर्वेण फलं सिद्ध्यति, अन्यथा तु यागादीनां द्रव्यादिशेषत्वे तदर्थमपूर्वान्तरं कल्पनीयं स्यात्।

विशेषो विविच्यते। यतः सर्वेषु तिङन्तपदेषु एको धात्वर्थः एकश्च प्रत्ययार्थ इति भेदः सर्वैरपि अनुभूयते। गच्छति इत्यस्य गमनं करोति, लिखति इत्यस्य लेखनं करोति, पचतीत्यस्य पाकं करोतीति विवरणदर्शनात् गमनम्, लेखः, याग इत्यादौ तथा विवरणस्यादर्शनात् तिङन्तपदेषु धात्वर्थः प्रत्ययार्थश्चेति पदार्थद्वयं सर्वथाभ्युपेयम्। तत्र पूर्वदेशविभागपूर्वकमुत्तरदेशप्राप्तिः गमनम् लेखन्या अक्षरविन्यासः लेखनम्, तण्डुलविक्लृत्तिहेतुकाधिश्रयणादिव्यापारः पाकः, इत्येवं धातुभेदेन धात्वर्था भिन्ना भिन्नाः प्रसिद्धाः। प्रत्ययार्थस्तु भावनेत्युच्यते। स च प्रत्ययार्थः अन्योत्पादानुकूलः कर्तृव्यापारः करोत्यर्थः परस्परव्यावृत्तधात्वर्थेभ्यः अन्यः सकलधात्वर्थानुगतः स्वीकार्यः। [७]"भावप्रधानमाख्यातम्" इति स्मृत्या च तस्य प्रत्ययार्थस्य प्राधान्यमवगम्यते। अत्र भावो भावना, प्रधानं प्राधान्येन मुख्यविशेष्यतया प्रतिपाद्यं यस्य तादृशमाख्यातमिति स्मृतेरर्थः। अतः अपूर्वं प्रत्ययार्थभूतेन प्रधानभूतेन भावनाभेदेनैवोत्पद्यत इति आख्यातप्रत्ययस्यैवापूर्वप्रतिपादकत्वं युक्तम्। तस्य च प्रत्ययार्थस्य भावनापदवाच्यस्य साध्यरूपस्यापि फलोत्पत्तिकाले सिद्धत्वादपूर्वसाधकत्वं युज्यत इति सिद्धं साध्यायोपदिश्यते इति न्यायोऽपि सङ्गच्छते। पचिक्रियामन्तरेण काष्ठस्थाल्यादीनामोदनसाधकत्वादर्शनात् क्रियां विना द्रव्यादीनां फलसाधकत्वं न युक्तमतः आख्यातेनैवापूर्वं गम्यत इति सिद्धान्तः।

अत्र वैय्याकरणा वदन्ति–पचति इत्यत्र पाकं करोति यजतीत्यत्र यागं करोतीति विवरणन्तु युक्तमेव, परन्तु तत्र पाकयागादिशब्दानामर्थः क इति विवेचनीयम्–पचतीत्यत्र न विक्लित्तिः पाकशब्दार्थः, यतः "प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः" इति कृष्णलेषु विक्लित्त्यसम्भवात् कृष्णलानां पाकविधानमनुपपन्नं स्यादतः अधिश्रयणफूत्कारादिव्यापारनिचय एव पाकशब्दार्थः, इति स्वीकार्यः। यजतीत्यत्र यागश्च मानसस्त्यागस्तद्धेतुर्वा प्रयत्नः सङ्कल्पो वेति स्वीकार्यः। एवञ्च एते अधिश्रयणत्यागादिकर्तृव्यापारा धात्वर्था एवेति एतदतिरिक्तं भावनापदवाच्यं किमपि नापेक्षितम्। न च पचति पाकं करोति इत्येवमुक्तविवरणानुसारेण करोत्यर्थभूतः प्रयत्नो भावनेति

७. निरुक्तम् १.१.१

वाच्यम्; तथा सति रथो गच्छतीत्येवमचेतने रथादौ प्रयत्नासम्भवात् शिष्टानां प्रयोगोऽनुपपन्नः स्यात्। न च लक्षणया रथो गच्छतीति व्यवहारस्योपपत्तिर्युज्यत इति वाच्यम्; श्रीरामो गच्छति, रथो गच्छतीति प्रतीत्योर्वैलक्षण्यादर्शनात्, गमनानुकूलव्यापारातिरिक्तस्य धात्वर्थातिरिक्तस्य प्रत्ययार्थभूतस्य भावनापद-वाच्यस्यानङ्गीकारमात्रेणैवोपपत्तौ रथो गच्छतीति प्रयोगस्य लक्षणया निर्वाहस्यान्याय्यत्वात्। ननु स्पन्दो भावना, तस्य चाचेतने चेतने च सम्भवाल्लक्षणामन्तरेणापि श्रीविघ्नहर्ता गच्छति, रथो गच्छतीत्यादिप्रयोग उपपद्यत इति चेत् "यतते" जानाती–"त्यादिष्वात्मकर्तृकेषु आत्मनि स्पन्दाभावाद् व्यभिचारान्न युक्तम्। प्रयत्नस्पन्दान्यतरो भावनेत्यपि न युक्तम्, यतः शब्दोऽभिदधातीत्यत्राचेतने निर्गुणे शब्दे स्पन्दस्य प्रयत्नस्य वान्यतरस्याप्यभावाद्व्यभिचारात्। किञ्च व्यापारमात्रस्य भावनात्वे त्यजिगम्योः पर्यायत्वापत्तेः धात्वर्थातिरिक्ताया भावनायाः स्वीकारो न युज्यते तदपेक्षया धातूनामेव फले तज्जनकव्यापारे च शक्तिस्वीकारे लाघवात्। धातूनामुभयत्र फले तदनुकूलव्यापारे च शक्तेरस्वीकारे फल एव च शक्तेः स्वीकारे "श्रीरामो ग्रामं गच्छती"–त्यत्र ग्रामप्राप्तिः फलम्, तच्च ग्रामेऽस्ति प्राप्तिरूपफलस्य च्च गम्धातुनाभिधानाद् ग्रामो गमनवान् इत्यादिप्रतीत्यापत्तिः। गमनानुकूलव्यापारानन्तरमपि गमनं भवतीति प्रयोगापत्तिश्च। फलानुत्पाद-दशायामपि फलानुकूलव्यापारारम्भमात्रेण पाको भवतीति शिष्टप्रयोगस्याना-पत्तिश्च। फलानुकूलव्यापारमात्रे धातूनां शक्तेः स्वीकारे त्यजिगम्योः पर्यायापत्तिश्चोक्तैव। अतः धातूनामेव फले तज्जनकव्यापारे च शक्तिस्वीकारेण पृथक्प्रत्ययार्थरूपभावनास्वीकारमन्तरेणैवोपपत्तौ भावनास्वीकारे गौरवम्। तिङ्प्रत्ययैश्च फलव्यापाराश्रयस्य कर्मकर्त्रादिरूपस्य बोधनमिति तिङ्प्रत्ययानाञ्च न वैय्यर्थ्यम्। अतः भावनास्वीकारः किमर्थ इति चेदुच्यते–

पचादिधातोः तिङादिप्रत्यये कृते **पचति** इति रूपं भवति तस्य च पाकं करोतीति विवरणं सर्वानुभवसिद्धम्। एवमेव घञ्प्रत्यये कृते पच्धातोः पाकः इति रूपं भवति, तत्र चैवं विवरणं नोपलभ्यते। तथैव पच् धातोः ण्वुल् प्रत्यये कृते पाचक इति रूपं भवति तस्य च पाकस्य कर्ता इत्येवं विवरणं स्वीक्रियते, वैय्याकरणैरपि पच् धातोरत्र पाकार्थत्त्वम् तदुत्तरकृत्यप्रत्ययस्य कर्तृत्वार्थकत्वञ्च स्वीकृते। एवञ्च धातोरेकत्र फले

शक्तिः पाचक, पाक इत्यत्र, एकत्र च पचतीत्यत्र फले तदनुकूलव्यापारे च शक्तिरिति वैरूप्याङ्गीकारापेक्षया सर्वत्र धातोः फल एव शक्तिस्वीकारो युक्तः। तदनुकूलव्यापारश्च तिङर्थः तिङन्तपदैः बोध्यते स एव भावः, भावनेत्युच्यते इति युक्तम्। "भावप्रधानमाख्यातमि" ति स्मृतिरपि धात्वर्थातिरिक्तभावनास्वीकारे सङ्गच्छते। एवञ्च पचतीत्याख्यातपदेषु धातूनां करोत्यर्थसामानाधिकरण्यात् कृदन्तपदेषु च करोत्यर्थसामानाधिकरण्यादर्शनात् तिङ्प्रत्ययार्थो भावना धात्वर्थातिरिक्ताभ्युपेयेति ज्ञायते। तदुक्तम्–"क्रियावचना धातवः। कथं ज्ञायते क्रियावचनाः पचत्यादय इति? यदेषां करोतिना सामानाधिकरण्यम्, कृभ्वस्तयः क्रियासामान्यवचनाः क्रियाविशेषवचनाश्च पचत्यादयः"[८]इति। एवञ्चान्योत्पत्त्यनुकूलो व्यापारः प्रत्ययार्थो भावनेत्युच्यते। "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येन"[९] "इति स्मृत्या प्रत्ययार्थभूताया भावनायाः प्राधान्यमवगम्यते। प्राधान्यादेव भावनायास्ततः अपूर्वं बोध्यते, प्रकृत्यर्थभूतः धात्वर्थस्तस्यां भावनायां समानपदश्रुत्या करणत्वेनान्वेति, द्रव्यादयः सिद्धपदार्थाः धात्वर्थस्य यागादेः सम्पादका इति सर्वं निरवद्यम्, एकस्माद्वाक्यादेकमेवापूर्वं कल्प्यत इति लाघवञ्च।

अस्याधिकरणस्य प्रयोजनञ्च पूर्वपक्षे द्रव्यवाचकसुबन्तपदानामप्यपूर्वबोधकत्वात् प्राधान्यमतः "न प्रधानानां प्रतिनिधि" रिति न्यायेन द्रव्याद्यपचारे प्रतिनिधेरुपादानं न युज्यते, सिद्धान्ते तु आख्यातपदानामेवापूर्वबोधकत्वेन प्राधान्यात् द्रव्याद्यपचारे तेषां प्रतिनिधेरुपादानं युज्यते, अत एव च सोमद्रव्यस्य पूतिकद्रव्यं प्रतिनिधित्वेन "यदि सोमं न विन्देत पूतीकानभिषुणुयादि"[१०] ति शास्त्रोक्तं सङ्गच्छते।

द्वितीयाधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**अपूर्वसदसद्भावसंशये सति नास्ति तत्।**
**मानाभावात् फलं यागात् सिद्ध्येच्छास्त्रप्रमाणतः॥८॥**

---

८. शाबरभाष्यम् २.१.१

९. भाट्टदीपिका २.१.१

१०. मीमांसादर्शनम् ६.३.१३

क्षणिकस्य विनष्टस्य स्वर्गहेतुत्वकल्पनम्।
विरुद्धं मान्तरेणातः श्रेयोऽपूर्वस्य कल्पनम्॥९॥

अवान्तरव्यापृतिर्वा शक्तिर्वा यागजोच्यते।
अपूर्वमिति तद्भेदः प्रक्रियातोऽवगम्यताम्॥१०॥

### जैमिनीयन्यायमालाप्रकाशिका

एकस्मात् पदादपूर्वमाख्यातपदादपूर्वमिति प्रथमाधिकरणे वर्णकाभ्यां यन्निर्णीतं तत्तदैव युज्यते यदि अपूर्वं नाम किञ्चिद् वस्तु स्वीक्रियते चेत्, परन्तु "यजेत स्वर्गकाम" इत्यादिविधौ साक्षाद्यागस्यैव स्वर्गजनकता श्रूयते, अतः अपूर्वसद्भावमङ्गीकृत्य कृतो विचारो व्यर्थ इत्याक्षेपे प्राप्ते तत्समाधानायापूर्वं साधयितुमिदमधिकरणमारभ्यते "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" श्येनेनाभिचरन् यजेत "इत्यादिवाक्यैः साध्यसाधनभावः दर्शपूर्णमासादि-यागस्वर्गादिफलयोः साक्षादवगम्यते, मध्येऽपूर्वं नाम वस्त्वन्तरं न श्रूयते, यथा तैलमर्दनेन सुखं भावयेदिति वाक्येन तैलमर्दनसुखयोः साध्यसाधनभावः वैद्यकशास्त्रेणावगते तत्र मध्यवर्ति किमपि वस्त्वन्तरं न श्रूयते न वा कल्प्यते तथात्रापि किमप्यपूर्वमश्रुतं न कल्पनीयम्। क्षणिकस्य देवतोद्देशेन द्रव्यत्यागात्मकस्य यागस्य कालान्तरभाविफलसाधनत्वानुपपत्त्या मध्ये किमप्यपूर्वं कल्प्यते चेत् तत्केन रूपेण कल्प्यत इति विचारणीयम्। यदि तद्यागसाध्यत्वेन कल्प्यते तदा स्वर्गस्य यागसाध्यत्वं श्रुतं बाधितं स्याद्। यदि स्वर्गस्य साधनत्वेनापूर्वं कल्प्यते तदा यागस्य स्वर्गसाधनत्वं श्रुतं बाधितं स्यात्। उभयथापि यागस्वर्गयोर्मध्ये श्रुतः साध्यसाधनभावो विरुद्ध्यते। नच यागस्वर्गयोर्मध्ये कल्प्यमानमिदमपूर्वं यागस्यैव शक्तिरूपेण अवान्तरव्यापाररूपेण वा स्वीक्रियते इति "व्यापारेण व्यापारिणो नान्यथासिद्धिरिति" न्यायेन यागस्य साधनत्वं स्वर्गं प्रति यद् बोधितन्तत्तथैव सङ्गच्छत इति साध्यसाधनभावस्य बाधप्रसङ्गो नास्तीति वाच्यम्; शक्तिमति व्यापारवति वा यागे विनष्टे शक्तिव्यापारयोरवस्थानायोगात्तादृशापूर्वस्यापि स्वर्गस्य प्राप्तिपर्यन्तं स्थायित्वासम्भवात्तत्कल्पनैव व्यर्था। लाघवात् श्रुतिप्रामाण्याच्च यागस्वर्गयोः साध्यसाधनभावस्य रक्षणार्थं विनष्टोऽपि यागः स्वर्गं साधयतीति स्वीकार एव युक्तः, तन्मध्येऽपूर्वस्याश्रुतस्य कल्पना

नोचिता। तदुक्तं मिश्रपादैः—

साध्यसाधनभावो हि श्रूयते स्वर्गयागयोः।
वस्त्वन्तरस्य सद्भावे श्रुतिरेव विरुध्यते।। इति[११]

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते—
विनष्टस्यापि हेतुत्वं न दृष्टं न श्रुतं क्वचित्।
तत्कल्पनाद्वरं कल्प्यमपूर्वं स्वर्गकारणम्।।

"यजेत स्वर्गकामः" इदं वाक्यं स्वर्गयागयोः साध्यसाधनभावं साक्षाद् बोधयति, न तु विनष्टयागस्य स्वर्गहेतुत्वम्, न वा स्वर्गयागयोर्मध्यवर्त्त्यपूर्वं स्वर्गसम्पादकमस्तीति विषये साक्षात् किमपि प्रतिपादयति। अतः श्रुतार्थस्यानुपपत्त्यान्यतरः पक्षः कल्पनीयः, अर्थापत्त्या कल्पनञ्च प्रमाणान्तराविरोधेनैव कार्यम्। विनष्टस्य वस्तुनः कारणत्वं लोके कुत्रापि न दृष्टम्, यत् पुनः बौद्धाः विनष्टाद् बीजादङ्कुरोत्पत्तिं दृष्टान्तीकृत्य असत्कारणतावादं स्वीकुर्वन्ति तच्च असतः सर्वत्र सुलभत्वात् सर्वं सर्वत उत्पद्येत शशविषाणादिभ्योऽप्यङ्कुरादयो जायेरन्नित्यादिबहुदोषग्रस्तत्वान्न युक्तम्, बीजमेवाङ्कुरस्य कारणं, न तु बीजनाश इत्येव युक्तम्। "सदेव सोम्येदमग्र आसीद्"[१२] "कथमसतः सज्जायेत"[१३] इति श्रुत्यैवासत्कारणतावादस्य निराकृतत्वादपि न युक्तम्। अतः विनष्टो यागः स्वर्गं सम्पादयतीति कल्पना नोचिता, तर्हि याग एव तावत् स्वर्गप्राप्तिं यावत् स्थास्यतीति श्रुतिप्रामाण्यात् कल्पनीयमिति वाच्यम्; तदपि न सङ्गच्छते "न ह्यागमाः सहस्रं घटं पटयितुमीशते" इति न्यायात्। यागस्य च "यजतिचोदना द्रव्यदेवताक्रियम्"[१४] इति चतुर्थे क्रियारूपत्वस्य वक्ष्यमाणत्वात् क्रियायाश्च क्षणिकत्वस्य सर्वप्रमाणसिद्धत्वात्। अतः यागस्वर्गयोर्मध्ये श्रुतस्य साध्यसाधनभावस्यानुपपत्त्यापूर्वं कल्पनीयमित्येव युक्तम्। न च तदपूर्वं व्यापारात्मकं शक्त्यात्मकं वा भवतु, विनष्टे यागे क्व तिष्ठतीति वाच्यम्;

११. शास्त्रदीपिका २-१.१
१२. छान्दोग्योपनिषत् ६.२.१.
१३. छान्दोग्योपनिषत् ६.२.२.
१४. मीमांसादर्शनम् ४.२.१२

श्रुतफलसाधनत्वान्यथानुपपत्त्या कल्प्यमाना शक्तिर्यथा कार्यं निर्वहति तथैव कल्प्येति आत्मनिष्ठतयैव कार्यनिर्वाहिकेति आत्मनिष्ठैव सा शक्तिः कल्प्यते; धर्मिग्राहकप्रमाणेन सर्वत्र धर्मी तथैव सिद्धो भवति यथा स्वस्य बाधो न स्यादिति सर्वसम्मतम्, अतः अत्रापि यागेन यजमानस्यात्मनि यागस्य शक्त्यात्मकमपूर्वमुत्पद्यत स्वर्गञ्च कालान्तरे सम्पादयति। अपूर्वस्य व्यापारात्मकत्वेऽपि पूर्वानुभवादौ संस्कारस्य व्यापारंत्वदर्शनाद् तैलपान-कर्मण्यसत्यपि तेन पुष्टौ कर्तव्यायां तैलपरिणामभेदानां तस्यावान्तर-व्यापारत्वदर्शनाच्च व्यापारिणः सत्त्वं व्यापारस्य कार्यसम्पादने न प्रयोजकमिति न दोषः। व्यापारेण व्यापारिणो नान्यथासिद्धिरिति न्यायेनापूर्वाङ्गीकारे यागस्य साधनत्वमविरुद्धम्। एवञ्च यागस्वर्गयोर्मध्येऽपूर्वस्याङ्गीकारे यागस्वर्गयोः साध्यसाधनभावो न विरुध्यते, अपूर्वानङ्गीकार एव स्वर्गयागयोः श्रुतः साध्यसाधनभावः प्रमाणान्तरेण बाधितो भवतीति अन्वयव्यतिरेकाभ्यां यागः अपूर्वद्वारा स्वर्गसम्पादक इति अपूर्वस्यास्तित्वं निश्चीयते। अपूर्वञ्चानेकविधम्—अङ्गापूर्वम्, उत्पत्यपूर्वम् परमापूर्वमिति। सर्वस्य प्रधानयागस्य पूर्वाङ्गाणि, उत्तराङ्गाणि च भवन्ति। प्रधानयागात् पूर्वमनुष्ठीयमानानि पूर्वाङ्गाणि, प्रधानयागानुष्ठानानन्तरमनुष्ठीयमानान्यङ्गानि उत्तराङ्गाणीत्युच्यन्ते। सर्वेषामङ्गानां प्रधानयागेन सह साहित्यमपेक्षितम्। भिन्नभिन्नकालानामङ्गानां कथं साहित्यमिति विचारे स्वस्वापूर्वद्वाराङ्गानां प्रधानेन साहित्यं वक्तव्यम्। तानि चाङ्गजन्यान्यपूर्वाणि अङ्गापूर्वाणि, प्रधानयागजन्यान्यपूर्वाण्युत्पत्यपूर्वाणि। तत्र प्रधानयागानुष्ठानात्पूर्वं क्रियमाणाङ्गजन्यापूर्वाणां प्रधानजन्यापूर्वोत्पत्तावुपयोगः, प्रधानयागानुष्ठानानन्तरं क्रियमाणाङ्गजन्यापूर्वाणामुत्पन्नापूर्वस्थितावुपकार इति सकलस्याप्यङ्ग-जातस्यापूर्वाणां परमापूर्व उपकारत्वं सर्वथापि अस्तीति न कस्याप्यङ्ग-स्यान्यथाकरणं शास्त्रसम्मतमिति ज्ञायते। अयमेव वैदिककर्मणां लौकिक-कर्मणामपेक्षया विशेषः। लौकिकेऽपि गृहनिर्माणादिकर्मणि प्रधानकर्म, अङ्गकर्म इति कर्मणां द्वैविध्यम्, प्रधानकर्माङ्गकर्मणां साहित्यमपेक्षितमेव, परन्तु लौकिककर्मस्वपूर्वकल्पनाया अभावात् प्रधानकर्मानुगुण्येनाङ्गकर्मणा-मन्यथाकरणमपि सम्भाव्यते। प्रधानयागजन्यापूर्वमुत्पत्यपूर्वमित्युक्तम्। अङ्गापूर्वाण्युत्पत्यपूर्वाणि च मिलित्वा फलजननसमर्थमपूर्वमुत्पादयन्ति। तदेव परमापूर्वमिति कथ्यते। इदमेव परमापूर्वं यजमानात्मनि स्थितं स्वर्गसम्पादकं

भवतीति निश्चीयते। दर्शपूर्णमासचातुर्मास्यादियागेषु पुनः नाना प्रधानयागाः भिन्नकालानुष्ठेया सन्तीति तेषां साहित्यार्थं साङ्गतत्तत्प्रधानजन्योत्पत्त्यपूर्वाणां समुदायं परिकल्प्यैकेकस्मात् समुदायात् समुदायापूर्वं स्वीकृत्य समुदायापूर्वाणां साहित्येन परमापूर्वमुत्पद्यते इति कल्प्यते। "धर्मं जैमिनिरत एव"[१५] इति ब्रह्ममीमांसायामपि याग एवापूर्वद्वारा स्वर्गस्योत्पादक इति जैमिनिमतमिति निरूपितम्। अनेन "फलमत उपपत्तेः"[१६] इति ईश्वर एव कर्मफलस्य दाता ईश्वरप्रसादादेव कर्म विनष्टमप्यपूर्वमन्तरा फलं साधयतीति "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयती"[१७]–इत्यादि श्रुतिमाश्रित्य वेदान्तिभिः स्वीक्रियते तदपि निरस्तम्। तेषामयमाशयः–यद्यपि "तृप्त एवैनमिन्द्र" इत्यादिवाक्यानि अर्थवादवाक्यान्येव तथापि रात्रिसत्रन्याये[१८] यथा अर्थवादवाक्येनैव फलं कल्प्यते तथात्रापि "स्वर्गकामो यजेत" इत्यादावनुपस्थितापूर्वकल्पनापेक्षया उक्तार्थवादोपात्तदेवताप्रसादस्यैव द्वारत्वं वरमिति। एतदर्थं देवताधिकरणे[१९] ब्रह्ममीमांसाया "जगृम्भा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम्। विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः।।[२०] इति मन्त्रमाश्रित्य "विग्रहो हविषां भोग ऐश्वर्यञ्च प्रसन्नता। फलप्रदानमित्येतत्पञ्चकं विग्रहादिकम्।।[२१] देवतानां विग्रहादिकं समर्थयन्ति वेदान्तिनः। अत्रोच्यते देवताप्रसादस्य ईश्वरप्रसादस्य वा द्वारत्वं कल्प्यते चेत् प्रसादस्यापि इच्छाविशेषत्वात् इच्छायाश्च क्षणिकत्वात् व्यापारान्तरं तस्यापि अवश्यं कल्पनीयं तदपेक्षया वरमपूर्वस्यैव द्वारत्वं लाघवात्। किञ्च देवताप्रसादस्य देवतानिष्ठत्वेन यजमानात्मनि फलजनकत्वानुपपत्तिः, यतः कार्यकारणयोरैकाधिकरण्यमवश्यं वक्तव्यमन्यथा गृहान्तरे वह्निरस्तीति गृहान्तरे पाकोत्पत्तिः स्यात्। अतः यागजन्यमपूर्वं यागकर्तृनिष्ठं यागकर्तुः

---

१५. वेदान्तदर्शनम् ३.२.४०
१६. वेदान्तदर्शनम् ३.२.३९
१७. तैत्तिरीयसंहिता २.५.४
१८. मीमांसादर्शनम् ४.३.६
१९. वेदान्तदर्शनम् १.३.२
२०. ऋक्संहिता १०.४७.१
२१. कल्पतरु १.३.३३

फलं सम्पादयतीत्येव युक्तम्। देवताप्रसादस्य द्वारत्वकल्पनायां देवतायाश्चैतन्यं विग्रहादि पञ्चकमित्यादिकं बहु कल्पनीयं भवतीति महद्गौरवम्। उक्तश्रुतिवाक्यानामर्थवादत्वं रात्रिसत्रन्यायाद्वैषम्यमित्येतत् सर्वं नवमे[२२] निराकरिष्यते। अनेनेदं न सिद्ध्यति देवतापूजादिकं न कर्तव्यमिति यतः विहितत्वादेव पूजादिकं "सन्ध्यां मनसा ध्यायेत्" "यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद् वषट्करिष्यन्"[२३] इति विधेः ध्यानञ्च सर्वमवश्यमेव कर्तव्यम्, विधिबलादेव यदर्थं यत् कर्म विहितं तदर्थं तत्कर्म साधयत्येव, यथानियमं कर्म कर्तव्यं तेनैव विहितफलसिद्धिर्भविष्यतीति अविकृतरूपेण कर्मानुष्ठानस्य सिद्धिर्भवत्वित्येतदर्थं मीमांसकानामयमुपक्रमः। अनेन "तस्माच्छास्त्रं प्रमाणन्ते कार्याकार्यव्यवस्थितौ"[२४] इति भगवदुक्तं वेदस्य स्वतः प्रामाण्यं सर्वथापौरुषेयत्वञ्च सिद्ध्यतः। अत एव "स्वर्गकामो यजेत" इत्यादौ "तस्य ज्ञानमुपदेश"[२५] इत्युपदेशात्मको विधिरुक्तः, न त्वाज्ञाद्यात्मकः; तस्य चापौरुषेये वेदेऽसम्भवात्। उपदेशश्च नियोज्यप्रयोजने कर्मणि लोकशास्त्रयोः प्रसिद्धः। तद्यथा "आरोग्यकामो जीर्णे भुञ्जीत" "एष सुपन्था गच्छतु भवाननेने"–ति। आज्ञा चोत्तमनियोक्तृका यथा गामानयेति। अभ्यर्थना चानुत्तमनियोक्तृका यथा मम पुत्रमध्यापयेति। अनुज्ञा च प्रवृत्तस्य नियोक्तृका यथेच्छसि तथा कुर्विति। अत्राज्ञायामभ्यर्थनायाञ्च नियोक्तृ-पुरुषप्रयोजनमवगम्यते। अनुज्ञायामुपदेशे च नियोज्यप्रयोजनमवगम्यते, तत्राप्यनुज्ञायां प्रवृत्तस्य नियोज्यस्य प्रयोजनम्, उपदेशे तु अप्रवृत्तस्य नियोज्यस्य प्रयोजनमिति विशेषः। एवञ्च अप्रवृत्तप्रवर्तकत्वे सति नियोज्यप्रयोजनसाधन-विषयत्वमुपदेशत्वमिति फलितम्। न चोपदेशोऽपि नियोज्यप्रयोजनसाधन-विषयोऽभिप्रायविशेष इति कथमपौरुषेयवेदे सम्भवतीति वाच्यम्; परस्य स्वस्य वा प्रयोजनमनभिसन्धायापि पामराणां मार्गाद्युपदेष्टृत्वं भूतार्थविषये दर्शनादुपदेशो नाभिप्रायविशेषः इति नियोज्यप्रयोजनस्योद्देश्याभावेऽपि तेन नियोज्यस्य प्रयोजनं सिद्ध्यति, न नियोजकस्य किञ्चिदिति अपौरुषेयेणापि

२२. मीमांसादर्शनम् ९.१.१

२३. ऐतरेयब्राह्मणम् ३.२.१

२४. श्रीमद्भागवद्गीता १६.२४

२५. मीमांसादर्शनम् १.१.५

वेदेन उपदेशः क्रियत इति युक्तम्। इदमेव भट्टाचार्यैरुक्तम्–

"यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रते–"[२६]ति

अत एव

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।।[२७]

शास्त्रलक्षणं सङ्गच्छते। ईश्वरवादिभिरपि ईश्वरः "लोकवत्तु लीला-कैवल्यम्"[२८] इति न्यायेन जगत्सृजति, तस्योद्देश्यं किमपि नास्ति तथापि तेन प्राणिमात्रस्य कल्याणं सिध्यतीति वक्तव्यम्। अतः तेषामीश्वरकल्पनम्, शास्त्रेश्वरयोः सम्बन्धकल्पनमित्यादिकल्पनागौरवं प्रसज्यते। अत्र तु शास्त्रेण स्वर्गयागयोः साध्यसाधनभाव उपदिष्टस्तदन्यथानुपपत्त्या मध्येऽपूर्वमेकं कल्पनीयमिति लाघवम्।

इदानीं गुरुमतेनेदमधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

यागक्रिया सूक्ष्मरूपा परमाण्वात्मसंश्रिता।
यावत्फलं नियोगाख्यं नापूर्वमिति चेन्न तत्।।११।।

मानहीनं क्रियासौक्ष्म्यं नियोगस्तु लिङादिना।
अभिधेयः पृथग्यागादपूर्वं कार्यमस्त्यतः।।१२।।

### जैमिनीयन्यायमालाप्रकाशिका

यागक्रिया=यागात्मकक्रिया याग एवेत्यर्थः। सूक्ष्मरूपा परमाण्वात्म-संश्रिता यावत्फलं स्थास्यतीति शेषः। नियोगाख्यमपूर्वं नास्ति चेदिति पूर्वपक्षे प्राप्ते न तत्=तन्न युक्तमिति सिद्धान्तः। अत्र हेतुः–**क्रियासौक्ष्म्यं मानहीनम्**=याग एव सूक्ष्मरूपेण स्थास्यतीत्यत्र प्रमाणं नास्ति, अतः **लिङादिना**=यजेतेत्यत्र लिङाभिधेयः नियोगः यागात् पृथगपूर्वं कार्यमस्ति।

२६. श्लोकवार्त्तिकम् १.१.५

२७. भामती १.१.४

२८. ब्रह्मसूत्रम् २.१.३३

अयमाशयः– गुरुमते– "तस्य निमित्तपरीष्टि"–[२९] रिति प्रतिज्ञानुसारेण शास्त्रप्रामाण्यमध्यायार्थ इति प्रथमेऽध्याये बाह्यहेतूत्थमप्रामाण्यं स्थूलतममादिमे पादेऽर्थवादमन्त्रोत्थमप्रामाण्यं स्थूलतरं द्वितीयपादे स्मृत्युत्थमप्रामाण्यं स्थूलं तृतीये, विधिप्रभेदोत्थं सूक्ष्ममप्रामाण्यं चतुर्थे पाद इति क्रमशः अप्रामाण्यशङ्कानां बहुमुखेन निरासपूर्वकमनपेक्षत्वलक्षणं प्रामाण्यं वेदस्य स्थापितम्। द्वितीयेऽध्याये शास्त्रभेदो निरूप्यते। द्वेधा हि शास्त्रभेदः–साध्यभेदादनुबन्धभेदाच्च। तत्र साध्यं सप्तविधम्–उत्पत्तिप्राप्ति-संस्कृतिविकृतिकरणोपकारकरणावान्तरव्यापाराधिकाररूपम्। संयवनस्य पिण्ड उत्पाद्यः, दोहनस्य पयः प्राप्यम्, प्रोक्षणस्य व्रीहयः संस्कार्याः, अवघातस्य व्रीहयः विकार्याः, दर्शपूर्णमासादिकरणानि प्रति प्रयाजादीनामुपकारः साध्यः, आग्नेयादीनां प्रत्येकं करणावान्तरव्यापाररूपाणि अपूर्वाणि साध्यानि, सर्वेषां चैषामधिकारापूर्वं परमसाध्यम्। तैः साध्यैर्नियोगाः "पिष्टं संयौति" त्यादिशास्त्राणि भिद्यन्ते। तथा द्रव्यदेवतादिरूपभेदाद् धात्वर्थभेदः, ततश्च नियोगावच्छेद-कधात्वर्थात्मकविषयभेद इति स्थितिः। अतः कार्यभेदो नाध्यायार्थः अपि तु शास्त्रभेद एव।

अत्राभिभिसन्धिः– अत्र शास्त्रं नाम न तिङन्तसुबन्तचयात्मकं वाक्यमात्रम्, अपि तु साक्षात् परम्परया वा मानान्तरागोचरकार्यप्रतिपादकः शब्दराशिः, तद्भेदश्च भिन्नशास्त्रार्थसमर्पकः, तेषाञ्च न लोकप्रसिद्धत्वम्, लोके शास्त्रस्य शास्त्रत्वानगतेः। अतः लोकाप्रसिद्धत्वेन व्युत्पादनार्हः शास्त्रभेद एवाध्यायार्थः "अप्राप्ते तु शास्त्रमर्थवद्" इति न्यायात्। यागादिकर्मस्वरूपन्तु लौकिकमेवेति तद्भेदोऽपि लोकसिद्ध एवेति न तद्भेदो नाध्यायार्थः। प्रथमेऽध्याये शास्त्रस्य प्रामाण्ये निरूपिते प्रमाणभूतशास्त्रभेदस्यैव जिज्ञासितत्वात् जिज्ञासाप्रसूतञ्च व्युत्पाद्यमिति न्यायेन शास्त्रभेद एव व्युत्पाद्यः। अत्रायं विवेकः– भाट्टमते धर्मे प्रमाणनिरूपणं प्रथमाध्यायार्थः, अतः द्वितीये धर्मभेदविचारोऽध्यायार्थत्वेन युक्तः। गुरुमते तु शास्त्रस्य प्रामाण्यनिरूपणं प्रथमाध्यायार्थः स्वीकृतः प्रथमाध्याये वेदार्थस्य जिज्ञास्यतया प्रतिज्ञातत्वात् "तस्य निमित्तपरीष्टि" रिति प्रामाण्यपरीक्षायाश्च प्रतिज्ञातत्वात्, अतः

---

२९. मीमांसादर्शनम् १.१.३

द्वितीये शास्त्रभेदविचार एव प्रसक्त इति। एतदुपोद्धातत्वेन शास्त्रभेदचिन्तौपयिकतया भावार्थाधिकरणमादिमं प्रवृत्तम्। अत्र "उद्भिदा यजेत पशुकाम" इत्याद्याः साधिकारचोदना उदाहरणम्। भावार्थो विषयो द्रव्यगुणौ वेति अनियमः उत भावार्थ एवेति विशये भावार्थविषयो नियोग इति भाट्टमते यथा तथैव निरूपितो राद्धान्त इति विशेषभेदाभावादाचार्यैः प्रथमाधिकरणं गुरुमते पृथङ् न निरूपितम्। द्वितीयेऽपूर्वाधिकरणे किञ्चिद्वैशिष्ट्यमस्तीति पृथङ्निरूपितम्। अत्रापि भाट्टमतवदेव अपूर्वं नास्ति उतास्तीति संशयः। अयं विशेषः भाट्टमतेऽपूर्वमवान्तरव्यापारात्मकं शक्त्यात्मकं वेति न प्रधानं, प्रधानं स्वर्गादिकमेव, अत्र गुरुमते तु अपूर्वमेव प्रधानम् कृतिसाध्यं मानान्तराप्रमेयम्।

तदुक्तम्–

"कृतिसाध्यं प्रधानं यत् कार्यमित्यभिधीयते।"[३०]

"क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत्।
अतो मानान्तरापूर्वमपूर्वमिति गीयते।।"[३१]

"कार्यत्वेन नियोज्यञ्च स्वात्मनि प्रेरयन्नसौ।
नियोग इति मीमांसानिष्णातैरभिधीयते।।"[३२]

"आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये।"
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः।।"[३३] इति

अत्रैवं पूर्वपक्षः– अपूर्वं नास्त्येव तत्सद्भावे प्रमाणाभावात्। न तावत् तत्र प्रत्यक्षादि प्रमाणम्; मानान्तराप्रमेयमिति स्वीकारात्। प्रत्यक्षादिप्रमाणविषयत्वे हि अपूर्वत्वं व्याहन्येत " मानान्तरापूर्वमपूर्वमिति गीयते" इत्युक्तेः। न च शब्दः प्रमाणम्; अपूर्वमस्तीति बोधकशास्त्राभावात्। न च

३०. प्रकरणपञ्चिका पृ.सं. २६६ का.हि.वि.वाराणसी; संस्करणम् प्रथमम्
३१. प्रकरणपञ्चिका पृ.सं. २७५
३२. प्रकरणपञ्चिका पृ.सं. २७९.
३३. प्रकरणपञ्चिका पृ.सं. २८१

वैदिकलिङादिरेव तत्र प्रमाणमिति वाच्यम्; लोके "गामानय" इत्यादौ लिङादेः आनयनादिक्रियात्मककार्यवाचकत्वावगमात् लोकव्युत्पत्त्यनुसारेण "स्वर्गकामो यजेत" इत्यादौ वैदिकलिङादेरपि यागादिक्रियात्मककार्य-वाचकत्वस्यैव युक्तत्वात् तदतिरिक्तापूर्ववाचकत्वे प्रमाणाभावाच्च। न च "स्वर्गकामो यजेते-" त्यत्र काम्यस्वर्गविशिष्टस्य कामिनो नियोज्यत्वेनान्वयः श्रूयते, स्वर्गकामश्च नियोज्यः स्वकाम्यस्वर्गसाधनमेव कार्यतयावगच्छति। काम्यञ्च स्वर्गादि देशान्तरकालान्तरभावि, क्षणिकस्य यागस्य क्रियारूपस्य देशान्तरकालान्तरभाविनः स्वर्गस्य साधनत्वयोग्यताया बाधात् कामिनियोज्या-न्वयोपपत्त्यर्थं स्थायिकार्यमेव लिङाद्यर्थ इति वाच्यम्; "धर्मिकल्पनातो वरं धर्मकल्पनम्" इति न्यायेन स्वर्गस्य साधनत्वयोग्यताया क्षणिकयागे बाधात् स्थायिकार्यकल्पनापेक्षया लाघवात्- यागक्रियाया एव स्थायित्वकल्पनाया युक्तत्वात्। अत्र स्थायिकार्यमपूर्वं धर्मिभूतम्, यागक्रिया च "यजेत" इति श्रुतिगम्या तस्याः स्थायित्वमात्रं कल्पनीयमिति धर्मकल्पना, अतः धर्मिकल्पनातो धर्मकल्पनं वरमिति न्यायः यागक्रियाया एव स्थायित्वकल्पने सङ्गच्छते। अनेन च श्रुतहानिरश्रुतकल्पनेति दोषद्वयमपि वारितं भवति "यजेत" इति श्रुतः यागः स्वर्गसाधक इत्यङ्गीकारात्, अश्रुतस्यापूर्वस्य लिङ्वाच्यत्व-कल्पनाभावात् यागक्रियायाः तावत्स्थायित्वे वाक्यमेव प्रमाणमिति पूर्वपक्षे प्राप्ते-

समाधिरभिधीयते-लोके "गामानये" त्यादौ लिङा आनयनादि-क्रियाभिधीयते, सा च क्रिया क्षणिका फलविनाश्येति मानान्तरेण ज्ञायते। तत्र क्रियायाः फलविनाश्यत्वमेव क्षणिकत्वे तन्त्रम्, लौकिककार्ये क्रियानन्तरमेव फलमुत्पद्यत इति क्षणिकत्वे सिद्धे वेदे च "यजेत स्वर्गकामः" इत्यादौ क्रियाया अनन्तरमेव स्वर्गो नोत्पद्यते अतः स्वर्गोत्पत्तिपर्यन्तं क्रियायाः स्थायित्वं वक्तव्यमिति स्वीकारो न युक्तः, "शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्" कारकावस्थोत्पन्नफलविनाश्यत्वमेव क्रियाणां लोकेऽवागमात्, कारकावस्थोत्पन्नफलविनाश्यत्वमेव क्रियाणां क्षणिकत्वे तन्त्रमिति स्वीकर्तव्यतया कालान्तरभाविफलोत्पत्तिपर्यन्तं क्रियायाः स्थायित्वं न युज्यते,

अन्यथा साधनानां कारकत्वं व्याहन्येत। यतः "क्रियायोगि कारकमुच्यते,"[३४] अतः क्रियास्थितिक्षण एव कारकावस्थेति कथ्यते, तथाचाद्ये फलक्षणे क्रिया कारकं फलञ्चेति त्रितयस्य सद्भावात् कारकावस्थायां क्रियाफलोत्पत्तिर्वक्तव्या, तेन च कालान्तरभाविनि स्वर्गे क्रियाफलत्वं न सम्भवतीति यागक्रियाजन्यमपूर्वं स्वीकार्यम्। न च क्रियाजनकत्वं कारकत्वमिति शाब्दिकाः क्रियानिमित्तमेव कारकमाचक्षत इति तन्मतविरोधः शङ्क्यः, निमित्तनैमित्तिकभाव एवात्रापि क्रियायोगत्वमुच्यते, स च क्रियायोगः क्रियाद्यक्षणात् पूर्वक्षणनियतस्थितेः यावत्क्रियान्त्यक्षाणानुवृत्त्या च भवति। अत एव "फलायोगव्यवच्छिन्नं कारणं करण-" मिति करणकारक-लक्षणमपि न्यायनयोक्तं सङ्गच्छते। न च छिदिक्रियायोगाभावेऽपि छेदकः कुठार इति व्यवहारो न स्यादिति वाच्यम्; स्वरूपयोग्यतामाश्रित्य गौणोऽयं व्यवहारः इति उक्तरीत्या क्रियानिमित्तत्वमाश्रित्यैव कुठारादौ करणत्वं युक्तम्। एवञ्च कारकावस्थितफलनाश्यत्वात् क्रियाणां क्षणिकत्वमेव स्वीकार्यम्। "यजेत स्वर्गकाम" इत्यादौ तेन स्वर्गस्य कारकावस्थित-फलत्वासम्भवात् यागक्रियाफलत्वेनापूर्वमाश्रयणीयम्। न च "धर्मिकल्पनातो वरं धर्म कल्पनेति" न्यायावतारो युक्तः; यत्र धर्मकल्पनायां मानान्तरविरोधो नास्ति तत्रैव तन्न्यायस्यावतारात् "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपी"-ति न्यायात् स्थायि यागजन्यमपूर्वं कल्पनीयम्। आश्रयनाशादपि यागादिक्रियायाः स्थायित्वकल्पनं न युक्तम्, यागादेश्च कार्यद्रव्याश्रितत्वाद् द्रव्याणाञ्च स्वर्गादिफलपर्यन्तं स्थायित्वाभावात् क्रियाणां क्षणिकत्वं विहाय स्थायित्वाङ्गीकारे बहुप्रमाणविरोधात् "यजेत स्वर्गकामः" इति श्रुत्यैव भगवत्या मानान्तराविरुद्धं यावत्फलकालस्थाय्यपूर्वरूपं कार्यं लिङाद्यर्थतया कामिनियोज्यान्वयसमभिव्याहाराद्बोध्यत इति चतुरस्रम्। एवञ्च लिङाद्यर्थत्वेनापूर्वं स्थायि स्वीकार्यम्, अपूर्वमेव नियोगः कार्यमिति च गीयते इति सिद्धान्तः। आक्षेपसङ्गत्येदमधिकरणं प्रवृत्तमतः पूर्वाधिकरणस्य यत् प्रयोजनं भावार्थपदादेवापूर्वं गम्यत इति भावार्थस्यैव प्राधान्याद् द्रव्यादीनामपचारे प्रतिनिधेः सद्भावः सिद्धान्ते, पूर्वपक्षे तु प्रतिनिध्यभावः इति तदस्याप्यधिकरणस्य प्रयोजनमतः पृथक्प्रयोजनं नापेक्षते- उक्तञ्च

३४. नयविवेकः २.१.४

भाष्ये–

"आक्षेपेष्वपवादेषु प्राप्त्यां लक्षणकर्मणि।
प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्तते॥"[३५] इति।

इदानीं तृतीयमधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

अवघातादिनापूर्वमुत्पाद्यं विद्यते न वा।
यजत्यादिवदस्त्येव वाक्यवैय्यर्थ्यमन्यथा॥१३॥

दृष्टे तुषविमोके तु नापूर्वं द्रव्यतन्त्रतः।
स्याद्यजत्यादिवैषम्यं नियमापूर्वकृद्वचः॥१४॥

## जैमिनीयन्यायमालाप्रकाशिका

अवघातादिना=व्रीहीनवहन्ति, तण्डुलान् पिनष्टीत्यादिविधौ अवहन्तीत्याद्याख्यातेभ्यः अपूर्वमुत्पाद्यं विद्यते न वेति संशये, यजत्यादिवत्="यजेत स्वर्गकामः" इत्यादौ यजेतेत्याद्याख्यातेभ्यः अपूर्वमुत्पद्यते इति पूर्वाधिकरणे यन्निर्णीतं तद्वदवहन्तीत्याद्याख्यातेभ्योऽपि अपूर्वमुत्पद्यत इति वक्तव्यम्; अन्यथा वाक्यवैय्यर्थ्यम्=तेभ्योपूर्वं नोत्पद्यत इति स्वीकारे" अवघातादिजन्यतुषविमोकस्य दृष्टत्वात् तन्मात्रप्रतिपादकत्वे विधिवाक्यानामुक्तानां वैय्यर्थ्यं स्यादिति पूर्वपक्षे, नापूर्वं स्याद्= तेभ्योऽपूर्वं नोत्पद्यत इति सिद्धान्तः। तत्र हेतुः–द्रव्यतन्त्रतः=व्रीहीनवहन्तीति विधिषु द्वितीयया विभक्त्या व्रीहीणां प्राधान्यात् द्रव्यपरतन्त्रता, यजत्यादिवैषम्यम् यजतीत्यादौ तु यागादीनामेव प्राधान्याद्विधीनामन्यतन्त्रता नास्तीति तत्रापूर्वोत्पत्तिः स्वीक्रियते इति वैषम्यम्, वचः=व्रीहीनवहन्तीत्यादिवचः तुषविमोके दृष्टफले सत्यपि नियमापूर्वकृद्=नियमांशेऽपूर्वबोधकमिति न व्यर्थमिति भावः।

अयमाशयः–प्रथमद्वितीयाधिकरणाभ्यां "सोमेन यजेत" "हिरण्यमात्रेयाय ददाति" "तस्मात् सुवर्णं हिरण्यं भार्यम्" "श्येनेनाभिचरन् यजेत"

---

३५. शाबरभाष्यम् २.१.७

"चित्रया यजेत पशुकामः" "अग्निहोत्रं जुहोति"–इत्यादिधर्मप्रमाणभूतवाक्येषु येषां शब्दानामुच्चारणोत्पत्तौ प्रयोगकाले येषामर्थो नोपलभ्यते तान्याख्यातानि तेभ्योऽपूर्वं प्रतीयेत इति निश्चितम्। तेनाख्यातपदानामपूर्वप्रतिपादकत्वेन प्राधान्यमिति, आख्यातप्रत्ययैर्भावनाभिधीयते, भावना चान्योत्पादकस्वभावेति च निरूपितम्। "यजेत स्वर्गकाम" इत्यत्र भावनाया उत्पाद्यमन्यत् किमिति विचारे तद् अपूर्वमिति स्वीकृतम्। इदानीमपवादसङ्गत्या भावनोत्पाद्यं क्वचिदपूर्वं नास्त्यपि त्वन्यदेवेति निरूपणार्थं तद्द्वारा प्रधानकर्म गणुकर्मेति कर्मभेदनिरूपणार्थमिदमधिकरणं प्रवृत्तमिति शास्त्राध्यायपादसङ्गतयः। अतः अत्र "व्रीहीनवहन्ति" "तण्डुलान् पिनष्टि" "पिष्टानि संवपति" इत्यादि-वाक्यानि विषयवाक्यानि। उक्तवाक्येषु किमवघातादिभ्योऽपूर्वमुत्पद्यते न वेति संशयः।

अत्र पूर्वपक्षः– अवघातादिभ्योऽपूर्वमुत्पद्यते न वेति विचारार्थं किमवघाताद्यर्थाः व्रीहय उत व्रीह्यर्था अवघातादय इति विचारणीयम्, अत्र यदि अवघाताद्यर्थाः व्रीहयः तर्हि अवघातादीनामुद्देश्यत्वात् प्राधान्यम्, प्राधान्याच्च तेभ्योऽपूर्वं प्रतीयेत इति प्रथमः कल्पः। यदि तु व्रीह्यर्थमवघातादयस्तर्हि व्रीहीणामेवोद्देश्यत्वात्प्राधान्यमिति अवघातादीनां गुणत्वात्तेभ्योऽपूर्वं न प्रतीयेत इत्युत्तरः कल्पः। यद्यपि "व्रीहीनवहन्ती"–त्यादौ व्रीहीन्, तण्डुलान्, पिष्टानीति स्पष्टं साध्यत्वार्थकद्वितीयया व्रीह्यादीनामेव प्राधान्यमवगम्यत इत्यवघातादीनां व्रीह्याद्यर्थमेव प्रतीयते तथापि तथात्वे वाक्यवैय्यर्थ्यम्। यतः अवघातेन व्रीहीणां तुषविमोको भवतीति लोकत एव सिद्धत्वात् विधेः वैय्यर्थ्यमेव, यदि च विधेः साफल्यार्थं तुषविमोकातिरिक्तं किमप्यदृष्टं व्रीहिष्ववघातेनोत्पद्यत इति स्वीक्रियते तदा "व्रीहीनवहन्ती"– ति वाक्यस्य अवघातादिविशिष्टव्रीहीन् सम्पादयेदित्यर्थो वक्तव्यस्तत्र द्रव्यादेकमपूर्वमवघातादेकमपूर्वमित्यपूर्वद्वयं कल्पनीयं भवति। अदृष्टद्वयकल्पनाया गौरवाद् व्रीहीणामेवावघातार्थत्वं वक्तव्यं लाघवाद् "व्रीहीन्" इति द्वितीयाश्रुतेश्च लक्षणया "सक्तून् जुहोती"–तिवद् तृतीयार्थत्वमाश्रयणीयम्। तथा च सक्तुभिर्जुहोतीतिवद् व्रीहिभिरवहन्तीति अर्थाद् व्रीहीणामवघातेनापूर्वं भावयेदिति वाक्यार्थः सम्पद्यते, अतः अवघातादिभ्योऽप्यपूर्वमुत्पद्यत इति पूर्वपक्षः। अत्रायं प्रयोगः–

व्रीहीनवहन्ति, तण्डुलान् पिनष्टि, पिष्टानि संवपति इत्यादौ अवघातपेषण-संवपनानि अपूर्वजनकानि विहितधात्वर्थत्वाद् यजत्यादिधात्वर्थवत्, विपक्षे एतद्विधिवाक्यवैय्यर्थ्यरूपो बाधकस्तर्कः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तः– अवघातादिभ्योऽपूर्वं नोत्पद्यते; अवघातादीनां द्रव्यतन्त्रत्वात्, अवघातादीनां व्रीह्यादिद्रव्यार्थत्वात्, अवघातपेषणादिना व्रीहितण्डुलादिषु तुषविमोकपिष्टादिकार्यं दृष्टमेव साध्यते। न चावघातादीनां दृष्टफलकत्वे विधीनां वैय्यर्थ्यमुक्तमिति वाच्यम्; विधीनामत्रनियमांशे विधित्वमिति स्वीकारान्न वैय्यर्थमतः सर्वे द्रव्यविधयो नियमविधय इति न्यायः सङ्गच्छते। अत एवादृष्टद्वयकल्पनापि न प्रसज्यते–क्रत्वर्थतया प्राप्तमेव व्रीह्यादिद्रव्यमुद्दिश्यावघातादिमात्रं विधीयते, अवघातस्य च व्रीह्यादिद्रव्यार्थत्वं दृष्टवैतुष्यद्वारैव भवतीति एकस्यापि अदृष्टस्यापेक्षाभावात्। अदृष्टद्वयकल्पना तदा प्रसज्यते यदा व्रीह्यादिसाधका-वघातादिविधिराश्रीयते अवघातेनैकमपूर्वं व्रीह्यादिद्रव्याच्चैकमपूर्वमिति, यदा वावघातादिविशिष्टं व्रीह्यादिद्रव्यमनेन विधिना विधीयत इति स्वीक्रियते। प्रकृते त्ववघातः व्रीह्याद्यर्थः, प्रयोजनञ्च तुषविमोकात्मकं दृष्टमेवेति स्वीकारात् किमप्यदृष्टं न कल्पनीयम्। नियमांशेऽदृष्टस्य स्वीकाराद्विधिः सफलो भवति, तच्च नियमादृष्टस्य क्रियाफलानुनिष्पाद्यत्वेन फलव्यवहारयोग्यत्वं न युक्तमिति अवघातादितोऽपूर्वं न प्रतीयत इत्येव सिद्धान्तः। अत्रायं प्रयोगः– अवघातपेषणसंवपनानि नापूर्वजनकानि दृष्टफलकत्वात् अध्ययनविधिवत्। विपक्षे सम्भवति दृष्टे फलेऽदृष्टकल्पना न युक्तेति गौरवम्। यजत्यादौ तु दृष्टफलत्वाभावाद् अवश्यमपूर्वं कल्पनीयमिति विषमो दृष्टान्तः।

इदानीं गुरुमतेनेदमधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**द्वितीयां सक्तुवद् भङ्क्त्वा नियोगेऽन्वीयतां क्रिया।**
**साक्षादिति न मन्तव्यं दृष्टस्यात्रोपपत्तितः॥१५॥**

## जैमिनीयन्यायमालाप्रकाशिका

**क्रिया**= व्रीहीनवहन्तीत्यादौ सर्वत्रावघातादिक्रिया **द्वितीयां**= व्रीहीनित्यादौ द्वितीयाविभक्तिः **सक्तुवद् भङ्क्त्वा**=सक्तुभिर्जुहोतीतिवद् विपरिणामेन साक्षात् नियोगेऽपूर्वे अन्वीयताम्=अन्वेतीति स्वीक्रियतामिति न मन्तव्यम्; अत्र= व्रीहीनवहन्तीत्यादौ दृष्टस्य=तुषविमोकाद्यात्मकदृष्टफलस्य उपपत्तितः=उपपत्तेः।

अयमाशयः—पूर्वाधिकरणाभ्यां भावार्थेभ्योऽपूर्वमुत्पद्यते, अपूर्वमेव लिङोभिधेयमिति निरूपितम्। अत्र सर्वेषामेव भावार्थानामपूर्वविषयता साक्षात् उत भावार्थानां मध्येऽस्ति कश्चन विशेष इति संशयः। अत्र पूर्वपक्षस्तु–सर्वेषामेव भावार्थानामपूर्वविषयता युक्ता; साक्षात् सम्बन्धलाभात्। नचावघातादीनां सामर्थ्यादेव द्रव्यगतातिशयजनकत्वप्रतीतेर्नियोगीयद्रव्यद्वारा नियोगान्वयोपपत्तौ साक्षादपूर्वविषयत्वकल्पना न युक्तेति वाच्यम्; लोकावगतचिकीर्षितार्थलोभेन परम्पराश्रयणमन्याय्यम्, शाब्दव्यवहारे प्रमाणान्तरानवतारात् "सक्तून् जुहोतीत्यत्र" द्वितीयायाः तृतीयार्थे विपरिणामेन सक्तुभिर्होतव्यमिति साक्षान्नियोगेन सक्तूनामन्वयस्य यथा स्वीक्रियते तथात्रापि "व्रीहीन्" इत्यत्र द्वितीयाया विपरिणामेन व्रीहिभिरवहन्यादिति भावार्थस्य सर्वत्र नियोगेन साक्षात्सम्बन्धो युक्त इति। सिद्धान्तस्तु–अवघातादीनां द्रव्यगतातिशयजननस्वभावत्वं लोकादवगम्यते। शब्दोऽपि लोकावगतस्वरूपस्वभावमेव पदार्थं नियोगान्वयितया बोधयति। मानान्तरावगतदृष्टस्वभावालोचनेनैव नियोगान्वये सति अदृष्टाश्रयण-स्यायोग्यत्वात्, अन्यथा सर्वेषां साक्षात्सम्बन्धे इदं करणम्, इयमितिकर्तव्यतेति विभागाभावेन सर्वं परिप्लुतं स्यात्। अतः भावार्थोऽपि स्वभावानुसारि दृष्टं स्वकार्यं वाञ्छति। "सक्तून् जुहोती" त्यत्र तु होमेन सक्तुगतदृष्टोप-कारस्यासम्भवात् द्वितीयायाः तृतीयार्थे लक्षणा स्वीक्रियते इह तु लोकावगतपदार्थस्वभावविरुद्धविषयत्वकल्पनातः तदनुकूलनियमादृष्ट-कल्पनमेवोचितम्। प्रयोजनञ्च प्रैयङ्गवेऽपि चरौ व्रीहय उत्पाद्या अवघातार्थत्वेन पूर्वपक्षे। सिद्धान्तस्तु प्रैयङ्गवे चरौ व्रीहीणामपेक्षाभावात् पुनः अवघातार्थत्वेन व्रीहयो नोत्पाद्याः, अवघातस्य तुषविमोकार्थत्वादिति लाघवमनुसरति।

इदानीं चतुर्थाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

सम्मार्ष्टि स्रुच इत्यत्र किं प्रधानाख्यकर्मता।
गुणकर्मत्वमथवा दृष्टाभावेऽवघातवत्॥१६॥

गुणत्वं न हि सम्भाव्यं प्राधान्यन्तु प्रयाजवत्।
अदृष्टकल्पनेनापि गुणत्वं स्याद् द्वितीयया॥१७॥

## जैमिनीयन्यायमालाप्रकाशिका

"स्रुचः सम्मार्ष्टि" इत्यत्र किं प्रधानकर्मताथवा गुणकर्मत्वमिति संशये अवघातवत् दृष्टाभावे=दृष्टप्रयोजनाभावे गुणत्वं न सम्भाव्यम् किन्तु प्रयाजवत् प्राधान्यं=प्रधानकर्मत्वमेव स्यादिति पूर्वपक्षे द्वितीयया=स्रुच इत्यत्र साध्यत्वबोधकद्वितीयाश्रवणाद् दृष्टप्रयोजनाभावेऽपि अदृष्टकल्पनेन= अदृष्टप्रयोजनकल्पनेन गुणत्वं=गणकर्मत्वं स्यादिति सिद्धान्तः।

अयमाशयः– पूर्वाधिकरणे "व्रीहीनवहन्ती"–त्यादौ दृष्टतुषविमोकादिप्रयोजनसत्वात् "दृष्टं वरमदृष्टतः" इति न्यायेन अवघातादीनां व्रीह्यर्थत्वं स्वीकृत्य "अवहन्ती"–त्यादौ भावार्थेभ्यः अपूर्वं नोत्पद्यत इति निर्णीतमत्र तु "स्रुचः सम्मार्ष्टि" इत्यादौ सम्मार्गतः स्रुचां कोऽपि दृष्टोपकारः न सम्भाव्यते, यतः प्रक्षाल्य दर्भेष्वासादितानां स्रुचामेव वेदाख्यदर्भमुष्टिविशेषाग्रैः सम्मार्गः वाक्येनानेन विधीयते, तेन दृष्टं फलं व्रीहीणां तुषविमोकवत् किमपि स्रुचां वक्तुं न शक्यते। आदिपदेन ग्राह्येषु "व्रीहीन् प्रोक्षति" "आज्यमुत्पुनाति" "हविरभिमृशति" इत्यादौ प्रोक्षणोत्पवनादिनापि व्रीहीणामाज्यस्य वा किमपि दृष्टोपकारो न सम्भाव्यते। अतः सम्मार्गप्रोक्षणादिनापूर्वमुत्पद्यत इति वक्तव्यम्। पूर्वाधिकरणं "तानि द्वैधाधिकरणम्" इत्युच्यते, तत्र च "तानि द्वैधं गुणप्रधानभूतानि" [३६]इति कर्मणां द्वैविध्यमुक्त्वा "यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात्" [३७]यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् इति क्रमशः

३६. मीमांसादर्शनम् २.१.४
३७. मीमांसादर्शनम् २.१.५

प्रधानकर्म गुणकर्म किम् किमिति प्रतिपादितम्। अनेन प्रधानगुणकर्मणोरिदं लक्षणं फलितं भवति यैः आख्यातपदैरर्थादाख्यातपदबोध्यकर्मभिः द्रव्यं नोत्पादयितुमिष्यते तानि आख्यातानि प्रधानभूतानि अर्थात्तदाख्यातबोध्यं कर्म प्रधानकर्म। यैराख्यातैः अर्थादाख्यातपदबोध्यकर्मभिः द्रव्यमुत्पादयितुमिष्यते तानिआख्यातानि गुणभूतानि अर्थात्तदाख्यातपदबोध्यं कर्म गुणकर्म इति। अत्र द्रव्यमुत्पादयितुमिष्यत इत्यस्य भावः एवं वक्तव्यः- दृष्टधर्मवत्तया द्रव्यमुत्पादयितुमिष्यत इति; यतः अवघातादिना व्रीह्यादीनामुत्पत्तिस्तु न भवति किन्तु तुषविमोकात्मकोपकारस्तु भवत्येव एवञ्चेदमुक्तं भवति दृष्टोपकारकत्वलाभे गुणकर्मत्वम्, तदलाभे च प्रधानकर्मत्वमिति। अतः "स्रुचः सम्मर्ष्टि" इत्यादौ सम्मार्गतः स्रुचां दुष्टोपकारकत्वस्यालाभादवश्यं स्रुगादिविशिष्टसम्मार्गः अपूर्वार्थं विधीयत इति वक्तव्यमतः स्रुचां सम्मार्गः, व्रीहीणां प्रोक्षणम् एवं जातीयकं कर्म प्रधानकर्म प्रयाजादिवदिति पूर्वपक्षे प्राप्ते उच्यते-

"स्रुचां सम्मार्गः" "व्रीहीणां प्रोक्षणमि-" त्येवंजातीयकं कर्म द्रव्यार्थत्वेन विहितमदृष्टद्वारोपकारकमपि अवघातवद् गुणकर्म एव; स्रुचः "व्रीहीन्" इत्येवं द्वितीयाश्रुतेः। तथाहि- गुणकर्मत्वे प्रधानकर्मत्वे वा दृष्टोपकारकत्वमदृष्टोपकारकत्वं वा न तन्त्रम्। किन्तु यागसाधनगत-संस्कारजनकत्वं गुणकर्मत्वे तन्त्रम्, साधननैरपेक्ष्येण यागादौ साक्षादपूर्वाधायकत्वं प्रधानकर्मत्वे तन्त्रम्। साधनोद्देश्यकं कर्म गुणकर्म, प्रधानोद्देश्यकं कर्म प्रधानकर्म इति कर्मणां द्वैविध्यम्। यतः उद्देश्यं प्रधानं भवति। "स्रुचः" इत्यत्र द्वितीयाश्रुत्या व्रीहीनवहन्तीत्यत्र व्रीहीणामिव स्रुचामुद्देश्यत्वं गम्यते। अतः स्रुक्प्रधानकं सम्मार्गकर्म गुणकर्म एव, सम्मार्गतः स्रुचां दृष्टोपकारस्यादर्शनाददृष्टोपकारः कल्प्यत इति त्वन्यत्। एवञ्च "फलभावना-करणयागादिसाधनद्रव्यगतदृष्टादृष्टान्यतरसंस्कारजनकं कर्म गुणकर्म, फलभावनाकरणयागादौ द्रव्यनैरपेक्ष्येण साक्षादपूर्वाधायकं कर्म प्रधानकर्मेति" कर्मणां भेदस्य लक्षणे। "व्रीहीनवहन्ति" "स्रुचः सम्मार्ष्टि" इत्युभयत्रापि द्वितीयाश्रुत्या द्रव्यस्योद्देश्यत्वं गम्यते, उद्देश्यं च प्रधानं साध्यञ्चेति "घटं करोती-" त्यादौ लोके व्यवहारादवगम्यते। अत एव सूत्रकारैः "यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत" "यैस्तु द्रव्यं न चिकीर्ष्यते तानि

प्रधानभूतानी" ति गुणप्रधानकर्मणोः लक्षणे चिकीर्ष्यते इति शब्दः प्रयुक्तः। चिकीर्ष्यते इत्यस्योत्पादयितुमिष्यत इत्यर्थः। द्वितीयाश्रुत्या चात्र द्रव्यमुत्पादयितुमिष्टं साध्यमिति ज्ञाते यत्र दृष्टोपकारः नावलोक्यते तत्रादृष्टोपकारस्य कल्पनापूर्वकं गुणकर्मत्वमिति निश्चीयते। न च "बल्वजान् शिखण्डकान् कुरु" इत्यादौ लौकिकप्रयोगे "सक्तून् जुहोति" इत्यादौ वैदिकप्रयोगे च द्वितीयायाः करणत्वं गम्यते–बल्वजैस्तृणविशेषैः शिखण्डकान् कुरु, सक्तुभिर्होमं भावयेदिति, अतः द्वितीयाश्रुतेः करणत्वकर्मत्वयोर्बोधक-त्वात्कथमत्र कर्मत्वमेव बोध्यत इति निश्चीयते, विनिगमने प्रमाणाभावादिति वाच्यम्। घटं करोतीत्यादौ द्वितीयायाः करणत्वासम्भवात्, विषयतासम्बन्धेनात्र कृतिकरणत्वं घटे स्वीक्रियते चेदपि "ईश्वरः जगत् सृजती" त्यादौ जगति नित्यकृतिकरणत्वस्य विषयतासम्बन्धेनाप्यसम्भवात् द्वितीयायाः उत्सर्गतः कर्मत्वमेवार्थः स्वीकार्यः, "कर्मणि द्वितीया" इत्यनुशासनबलाच्च द्वितीया-श्रुतेः कर्मत्वमर्थः निश्चीयते। कर्मत्वञ्च परसमवेतक्रियाफलशालित्वमतः द्वितीयाश्रुत्या साध्यत्वं गम्यते। "कर्तुरीप्सिततमं कर्म"[३८] "तथा युक्तं चानीप्सितम्"[३९] इति सूत्राभ्यां साध्यत्वमीप्सितानीप्सितसाधारणं कर्मत्वं यत्र तत्र द्वितीयेत्युक्तं भवति। न च सूत्रद्वयं "कर्तुरीप्सिततमं कर्म" "तथा युक्तं चानीप्सितम्" इति व्यर्थं "साध्यं कर्म" इत्येव सूत्रमेकं कुतो न कृतमिति वाच्यम्; "अग्नेर्माणवकं वारयति" इत्यत्र माणवकस्य कर्मसंज्ञापवादेन "वारणार्थानामीप्सितः" इत्यपादानत्वापत्तौ, "पुष्पाणि स्पृहयति" इत्यत्र च पुष्पशब्दस्य "स्पृहेरीप्सितः" इति सूत्रेण संप्रदानत्वापत्तौ च तन्निवृत्तये प्रकृष्टेप्सितस्य कर्मसंज्ञाविधानार्थं "कर्तुरीप्सिततमं कर्म" इति सूत्रस्यापेक्षितत्वात्, एवं "विषं भुङ्क्ते" "ग्रामं गच्छंस्तृणं स्पृशति" इत्यादौ द्वेष्योपेक्ष्ययोरपि सङ्ग्रहार्थं "तथा युक्तं चानीप्सितम्" इत्यस्याप्यावश्यकत्वात्। पूर्वाधिकरणे च "व्रीहीनवहन्ती-" त्यादौ वैतुष्यादिविशिष्टत्वेन व्रीह्यादेः साध्यत्वस्य द्वितीयाश्रुत्या गम्यते इति निर्णीतत्वात् शिष्टप्रयोगानुगृहीतव्याकरणानुसारेण साध्यत्वमेव द्वितीयार्थ इति युक्तम्। "परशुना च्छिनत्ती"-त्यादौ सिद्धरूपस्य परशोः करणत्वस्य दर्शनात्साधनत्वं

---

३८. पाणिनिसूत्र १.४.४९

३९. पाणिनिसूत्र १.४.५०

तृतीयार्थः इति निश्चीयते। "बल्वजान् शिखण्डकान् कुरु" इत्यत्र तु बल्वजानां शिखण्डकाकारेण साध्यत्वाद् द्वितीयायाः साध्यत्वं न व्यभिचरति। यदि च करोतेरेककर्मकत्वेन कर्मान्तरान्वयानुपपत्तिरित्युच्यते तदा लक्षणया द्वितीयायाः करणत्वबोधकत्वमतः उत्सर्गतः शक्त्या द्वितीयायाः साध्यत्वमर्थः क्वचिल्लक्षणया साधनत्वं बोध्यत इति युक्तम्। अतः "सक्तून् जुहोती-" त्यत्र सक्तूनां भूते भाविनि वा ज्योतिष्टोमे उपयोगासम्भवाल्लक्षणया सक्तुभिर्होमं भावयेदित्यर्थः कल्प्यते। तदुक्तम्–

"भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते।
सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ताः क्वचित्॥"[४०] इति।

एवञ्च द्वितीयायाः साध्यत्वे शक्तिः तृतीयायाश्च साधनत्वे शक्तिरिति प्रकृते "स्रुचः सम्मार्ष्टी"–त्यादिष्वपि व्रीहीनवहन्तीत्यादाविव द्रव्यस्यैव साध्यत्वात् "यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत" इति लक्षणानुसारेण गुणकर्मत्वमेव। अयञ्च विशेषः व्रीहीनवहन्तीत्यादौ अवघातस्य दृष्टोपकारकत्वम् "स्रुचः सम्मार्ष्टी-" त्यादौ सम्मार्गस्यादृष्टोपकारकत्वम्, "सक्तून् जुहोती-" त्यादौ होमस्य सक्तूनां प्रति दृष्टोपकारकत्वस्य अदृष्टोपकारकत्वस्य वासम्भवात् साधनत्वमेव लक्षणया द्वितीयाभिधत्त इति स्वीक्रियते।

प्रयोजनञ्च सम्मार्गस्य प्रधानकर्मत्वे पशुचातुर्मास्यादिषु च स्रुग्वृद्धावपि कपिञ्जलाधिकरणन्यायेन तिसृभिरेव सम्मार्गः, यवप्रयोगेऽपि व्रीहीन् प्रोक्षतीत्यस्य प्रधानकर्मबोधकत्वात् प्रोक्षणार्थं व्रीहय उत्पाद्याः पूर्वपक्षे, सिद्धान्ते तु स्रुचां सम्मार्गस्य गुणकर्मत्वात् संस्कार्यत्वात्स्रुचां सर्वा एव स्रुचः सम्मार्ष्टव्याः, एवं व्रीहीन् प्रोक्षतीत्यत्र गुणकर्मत्वात् यवप्रयोगे तस्याप्राप्तेः व्रीहयः प्रथङ्नोत्पाद्या इति भेदः।

इदानीं पञ्चमाधिकरणं निरूप्यते–

जैमिनीयन्यायमाला

प्रउगं शंसतीत्यादौ गुणतोत प्रधानता।
दृष्टा देवस्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः॥१८॥

४०. तन्त्रवार्त्तिकम् २.१.४

**स्मृत्यर्थत्वे स्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनम्।**
**तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतम्॥१९॥**

## जैमिनीयन्यायमालाप्रकाशिका

प्रउगं शंसतीत्यादौ='प्रउगं शंसति" "आज्यैः स्तुवते" इत्यादिवाक्य-विहितानां स्त्रोत्रशस्त्राणां गुणता=गुणकर्मत्वम् उत=अथवा प्रधानता=प्रधानकर्मत्वमिति संशये देवस्मृतिर्दष्टा=स्तोत्रशस्त्राभ्यां स्तुत्यदेवस्य स्मरणं भवतीति दृष्टफलम् तेन स्तोत्रशस्त्रयोर्गुणकर्मतेति पूर्वपक्षे स्तोत्रशस्त्रयोर्गुण-कर्मत्वस्वीकारे स्तौतिशंस्योः=स्तुवते, शंसतीति धात्वोः श्रौतार्थस्य स्तवनाख्यस्य बोधः स्यादतः अदृष्टमुपेत्यापि=स्त्रोत्रशस्त्राभ्यामदृष्टफलमुत्पद्यत इति अदृष्टकल्पनद्वारापि श्रुतये=श्रुतिप्रमाणात् स्त्रोत्रशस्त्रयोः प्राधान्यं=प्रधानकर्मत्वं मतम्=सम्मतमिति सिद्धान्तः।

अयमाशयः—पूर्वाधिकरणे "स्रुचः सम्मार्ष्टी-" त्यादीना दृष्टप्रयोजनाभावेऽपि गुणकर्मत्वमुक्तम्, स्त्रोत्रशस्त्राभ्यान्तु गुणिप्रकाशनं दृष्टं प्रयोजनमस्तीति गुणकर्मत्वं सुतरां युक्तमिति पूर्वपक्ष उपस्थाप्यते। ज्योतिष्टोमे "प्रउगं शंसति" "मरुत्वतीयं शंसति" "निष्केवल्यं शंसति" "वैश्वदेवं शंसति" "अग्निमारुतं शंसति इति शस्त्राणि विहितानि। "बहिष्पवमानेन स्तुवते" "आज्यैः स्तुवते" "माध्यन्दिनेन पवमानेन स्तुवते" "पृष्ठैः स्तुवते" "यज्ञायज्ञीयेन स्तुवते" इति च स्तोत्राणि विहितानि। स्तुवते स्तौतीत्यर्थः, शंसति प्रशंसतीत्यर्थः, अतः उभयोः स्तुतित्वम्। स्तुतिश्च गुणिनिष्ठगुणाभिधानम्, स्तोत्रशस्त्रयोः स्तुतिविशेषत्वम्। तत्र प्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं स्तोत्रमुच्यते, अप्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणाभिधानं शस्त्रमुच्यत इत्यनयोर्भेदः। प्रउगादिशब्दाः शस्त्रविशेषस्य वाचकाः, बहिष्पवमानादिशब्दाश्च स्तोत्रविशेषस्य वाचकाः। गुणिनिष्ठगुणाभिधानञ्च गुणिनः प्रकाशार्थमेव भवति, यतः गुणद्वारैव गुणिनः प्रकाशनं भवति नान्यथेति ज्ञायते, यथा—"एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात्"[४१] इत्यादौ एकदन्तादिगुणद्वारा श्रीमहागणपतेः प्रकाशनं

४१. गणेशार्थवशीर्षोपनिषत्

भवति। अतः व्रीहीन् प्रोक्षतीत्यत्र प्रोक्षणेन व्रीहीणां संस्कारो भवतीति द्रव्यसंस्कारकत्वेन प्रोक्षणस्य गुणकर्मत्वं पूर्वाधिकरणे "यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत" इति न्यायेन निर्णीतम् तथात्रापि स्तोत्रादिना गुणिनः स्तुत्यस्य देवस्य संस्कारो भवत्यतः स्तोत्रशस्त्रयोः गुणकर्मत्वं युक्तमिति पूर्वपक्षः। अत्र दृष्टान्तरूपेण याज्यापुरोनुवाक्यादिमन्त्रा उपलभ्यन्ते। तथाहि–"अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति"[४२] इति याज्यामन्त्रे मूर्धत्वादिगुणबोधे सत्यपि देवताप्रकाशन एव तात्पर्यमिति स्वीक्रियते तथात्रापि गुणसम्बन्धबोधे सत्यपि गुणबोधमन्तरा गुणिप्रकाशस्यासम्भवात् स्तोत्रादेः गुणिप्रकाशने तात्पर्यमिति आख्यातस्य गुणिसंस्कारबोधकत्वात् गुणकर्मत्वम्। एवं पूर्वपक्षे प्राप्त उच्यते–स्तोत्रशस्त्रयोः प्रधानकर्मत्वमेव; श्रुत्या गुणसम्बन्धस्यैव प्रतीतेः। तथाहि–स्तुवते, शंसति इति स्तौतिशंसत्योरेव श्रवणात् स्तौतिशंसत्योश्च गुणसम्बन्धबोधन एव शक्तिरिति "देवदत्तो वक्रकेशान्त" इति कथने स्तुतित्वबोधस्य "वक्रकेशान्तं देवदत्तमानय" इति कथने स्तुतित्वाभावस्य च दर्शनादन्वयव्यतिरेकाभ्यां गुणसम्बन्धाभिधाने स्तुतित्वं गुणिनः प्रकाशे स्तुतित्वाभाव इति व्यवहारान्निश्चीयते। अतः स्तोत्रशस्त्रयोः देवतासंस्कारकत्वाभावात् अदृष्टार्थकत्वात् प्रधानकर्मत्वं युक्तम्। याज्यामन्त्राणान्तु देवतास्मारकत्वोद्देशेनेव विहितत्वात् गुणाभिधानमुखेनगुणिप्रकाशकत्वं युक्तम्, तत्र तत्तद्देवताककर्मणि प्रवृत्ते समाप्ते च अध्वर्युणा हविरग्नौ प्रक्षेप्तव्यम्, यजमानेन च तां तां देवतामुद्दिश्य त्यागः कर्तव्यः। तदर्थं देवतास्मरणस्यावश्यकत्वात् तदर्थमेव याज्यामन्त्राः[४३] पठ्यन्ते इति स्तोत्रशस्त्रयोः याज्यादिमन्त्राणाञ्च महान् भेदः। अतः "यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वाद्" इति न्यायेन स्तोत्रशस्त्राभ्यां गुणसम्बन्धमात्रं कीर्त्यत इति गुणिनः प्रकाशे स्त्रोत्रशस्त्रयोस्तात्पर्याभावात् तयोः प्रधानकर्मत्वमेव युक्तम्। तयोः प्रधानकर्मत्वस्वीकारे महेन्द्रग्रहयाज्यादिसन्निधौ विहितयोरिन्द्रपदघटितस्तोत्रशस्त्रयोः प्रयाजादिवददृष्टद्वारा क्रत्वर्थतया नान्यत्रोत्कर्षोऽपेक्षित इति

४२. ऋ.वं. ८.४४.१६

४३. "अमुं यज अमुं यज" इति प्रेषानन्तरं होत्रोच्चार्यमाणाः मन्त्रा याज्यामन्त्रा इति, "अग्नयेऽनुब्रूही"ति प्रेषानन्तरमुच्चार्यमाणा मन्त्राः पुरोनुवाक्या इत्युच्यन्ते।

लाघवम्। अन्यथा स्तोत्रशस्त्रयोर्गुणकर्मत्वे गुणिप्रकाशने तात्पर्यन्तयोरस्तीति इन्द्रादिप्रकाशनरूपप्रयोजनवशेन यत्रेन्द्रस्तत्र महेन्द्रग्रहयाज्यादिसन्निधौ विहितानामिन्द्रपदघटितस्तोत्रशस्त्राणामुत्कर्षः प्रसज्यते; "विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना"[४४] इति न्यायेनेन्द्रस्तुत्या महेन्द्रसंस्कारासम्भवाद् इति गौरवम्।

प्रयोजनञ्च पूर्वपक्षे विकृतौ देवतान्तरविधाने प्राकृतऋग्बाधेन वैकृतदैवत्य ऋगन्तरागमः कार्यः, सिद्धान्ते विकृतौ देवतान्तरविधाने सत्यपि "आग्नेयीषु स्तुवते" इत्येवंविधवचनाभावे प्राकृतानामेव मन्त्राणामविकारेण प्रयोगः कार्यः।

इदानीं षष्ठाधिकरणं निरूप्यते—

**जैमिनीयन्यायमाला**

**देवांश्च याभिर्यजत[४५] इत्याख्यातन्तु मन्त्रगम्।**
**विधायकं न वान्येन समत्वात् तद्विधायकम्॥२०॥**

**यच्छब्दादेः क्षीणशक्तिर्न विधिस्त्रिविधं ततः।**
**आख्यातमभिधानञ्च प्रधानगुणकर्मणी॥२१॥**

देवांश्च याभिर्यजत इत्याख्यातन्तु="देवांश्च याभिर्यजते ददाति च, ज्योगित्ताभिः सचते गोपतिः सह" इति वाक्ये श्रुतम् यजते, ददाति इत्याख्यातपदं, मन्त्रगम्=मन्त्रभागस्थं, विधायकं न वेति सन्देहे अन्येन=ब्राह्मणवाक्येन विधायकेन "सोमेन यजेत" इत्यादिवाक्येन, समत्वात्=समानयोगक्षेमत्वात् तद्विधायकमेवेति पूर्वपक्षे यच्छब्दादेः=अत्र वाक्ये याभिः ताभिः इति यत्तदिति सर्वनामश्रवणात्, क्षीणशक्तिः=विधायकत्वशक्तेः क्षीणत्वान् न विधिरत्रेति सिद्धान्तः। ततः=तस्माद्धेतोः आख्यातं त्रिविधं भवति—अभिधानम्-अभिधायकम्, प्रधानगुणकर्मणी=प्रधानकर्मविधायकम्, गुणकर्मविधायकञ्चेति शेषः।

---

४४. जै.सू. १०.४.१४

४५. अत्र मुद्रितपुस्तके वेदांश्येति पाठो दृश्यते, परन्तु मन्त्रवाक्यानुसारेण न्यायमाला-विस्तरानुसारेण च "देवांश्च याभिर्यजते "इति पाठश्चेत् समीचीनमिति भाति।

अयमाशयः– पूर्वाधिकरणे स्तोत्रशस्त्रयोः श्रुत्या गुणाभिधायकत्वात् गुणिसंस्कारकत्वं न सङ्गच्छत इति हेतुना प्रधानकर्मत्वं निर्णीतम्, अत्रापि "देवांश्च याभिर्यजते" इत्यादावपि श्रुत्याख्यातस्य विधायकत्वात् मन्त्रवर्णे श्रुतस्यापि विधायकत्वमेव युक्तमिति आख्यातस्य विध्यात्मकस्य प्रधानकर्म-विधायकत्वं गुणकर्मविधायकत्वमिति द्वैविध्यमेव उत प्रकारान्तरत्वमप्यस्तीति विवेचनार्थमधिकरणं प्रवर्तते। मन्त्रभागगतानि सर्वाणि विधिवाक्यानि ब्राह्मणभागे श्रुतानि च यच्छब्दादिघटितानि विधिवाक्यान्यस्याधिकरणस्य विषयः। "देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह"– याभिर्गोभिः यजते गोपतिर्यजमानः यागं करोति ददाति च=यासां गवां दानं करोति ताभिर्गोभिः सह ज्योगित्=चिरमेव सचते परलोकेऽवतिष्ठत इति मन्त्रस्य भावः, अतः मन्त्रेणानेन गवां यागः दानञ्च विधीयेते "तुल्यञ्च साम्प्रदायिकम्" इति न्यायेन "सोमेन यजेत" इति ब्राह्मणगतविधिवाक्येन मन्त्रभागगत-विधिवाक्यस्य समत्वात् मन्त्रभागगतविधिवाक्यैरपि कर्माणि विधीयन्त इति स्वीकारस्य युक्तत्वादन्यथा द्वैरूप्यकल्पने गौरवात् सर्वत्राख्यातपदं विधायकमिति पूर्वपक्षे प्राप्ते सिद्धान्तः।

उच्यते–उत्सर्गतः आख्यातपदं विधिप्रत्ययुतं विधायकमेव, परन्तु अत्र "याभिर्यजते ताभिः सह सचते" इति यच्छब्दश्रवणात् विधेः प्रवर्तनात्मिका विधिशक्तिः क्षीणेति युक्तम् यच्छब्दस्यानुवादकत्वस्य लौकिकप्रयोगे दर्शनात्। लोके यत्तदादिशब्दानां सिद्धवद्भावानुवादकत्वं "सोऽयं देवदत्त" इत्यादौ दृश्यते, न चात्र संसर्गे विशिष्टे वा वाक्यतात्पर्यं दृश्यते अपि तु संसर्गागोचर-यथार्थज्ञानजनन एव वाक्यतात्पर्यं दृश्यते। अतः प्रकृतवाक्येऽपि गोदानं गोयागो वा न विधीयते अपि तु प्राप्तस्यैव गोयागस्य गोदानस्य वानुवादो भवति। अतः सर्वत्र आख्यातपदं विधायकमेवेति नियमो नास्त्यपि तु मन्त्रभागेऽभिधायकमित्यपि स्वीकारो युक्तः। अत्र आचार्यैः "यच्छब्दादेः क्षीणशक्ति" रिति श्लोके यच्छब्दादेरित्यत्रादिपदेनोत्तमपुरुषामन्त्रणास्यन्त-रूपादीनां ग्रहणं कार्यमिति बोधितम्। "अग्नये जुष्टं निर्वपामि"[४६]

४६. तै.संहिता १.१.४१

इत्यादावुत्तमपुरुषप्रयोगः, "अग्ने यशस्विन् यशसे ममार्पय"[४७] इत्यादावामन्त्रणम् –"उर्वी चासि वस्वी चासि"[४८] इत्यादावस्यन्तरूपम्। "इषे त्वोर्जे त्वा"[४९] इति त्वान्तरूपम्। "इन्द्रावरुणा सौमनसमदृप्तम्"[५०] इत्यादौ आशीर्वादरूपम्। इत्यादिमन्त्रेषु श्रुतानामाख्यातपदानां विधायकत्वं नास्त्यपि तु अभिधायकत्वमेव। तदित्थमाख्यातपदानां क्वचिद्विधायकत्वं क्वचिदभिधायकत्वमिति द्वैविध्यं, तत्रापि विधायकत्वं क्वचिद् द्रव्यसंस्कारकत्वाभावे प्रधानकर्मविधायकत्वरूपेण बोध्यते, क्वचिच्च गुणकर्मत्वरूपेण बोध्यते इति द्वैरूप्यमवगम्यते। अत्र प्रधानकर्मपदेनारादुपकारकं कर्म बोध्यते। देवतोद्देशेन द्रव्यत्यागो याग इति यागलक्षणस्य वक्ष्यमाणत्वेन यागशरीरघटकीभूतद्रव्यदेवतयोः संस्कारकत्वाद् व्रीह्यवघातादीनां सन्निपत्योपकारकत्वम्, यागफलप्राप्तावुपकारकत्वात् कर्मणां प्रयाजादीनामारादुपकारकत्वमित्यनयोर्भेदः। इदानीं सप्तमाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

अहे बुध्निय मन्त्रं म इति मन्त्रस्य लक्षणम्।
नास्त्यस्ति वाऽस्य नास्त्येतदव्याप्त्यादेरवारणात्॥२२॥

याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम्।
तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते॥२३॥

## जैमिनीयन्यायमालाप्रकाशिका

अहे बुध्निय मन्त्रं मे="अहे बुध्निय मन्त्रं मे गोपाय, यमृषयस्त्रैविदा विदुः, ऋचः सामानि यजूंषि, सा हि श्रीरमृता सताम्"[५१] इति श्रुतौ मन्त्रशब्दः श्रुतः। तत्र मन्त्रस्य लक्षणं नास्त्यस्ति वेति संशये अव्याप्त्या-देरवारणात्=अव्याप्त्यतिव्याप्तिदोषाणां "विहितस्य अभिधायको मन्त्र" इत्यादिलक्षणे वारणस्यासम्भवात् मन्त्रस्य निर्दुष्टं लक्षणं न सम्भवतीति

४७. तै.संहिता १.१.१.३
४८. तै.संहिता १.१.९
४९. तै.संहिता १.१.१
५०. ऋग्वेदसंहिता ५.५९.७
५१. तै.ब्रा. ९.२.१.२६

पूर्वपक्षे प्राप्ते दोषवर्जितं लक्षणं "याज्ञिकानां समाख्यानम्"=याज्ञिकानां मन्त्र इति यद्वेदवाक्यं प्रसिद्धन्तदेव मन्त्रात्मकं वाक्यमिति मन्त्रलक्षणं निर्दुष्टमिति सिद्धान्तः। ते च याज्ञिका अनुष्ठानस्मारकादिवाक्यं मन्त्र इति वदन्ति, अतः तेषां समाख्यानमेव मन्त्रः क इति निर्णये प्रयोजकमिति भावः।

अयमाशयः– पूर्वाधिकरणे "देवाँश्च याभिर्यजते" इत्यादिमन्त्रवाक्येषु श्रुतानामाख्यातपदानां विधायकत्वं नास्त्यपि तु अभिधायकत्वमेवेति निर्णीतम्। अतः प्रसङ्गतः मन्त्रस्य किम् लक्षणमिति विचारः प्रवर्तते। "अहे बुध्निय" इति उक्तमन्त्रे मन्त्रस्य रक्षणं प्रार्थितम्। अयं मन्त्रः आधाने आवसथ्याग्ने-रुपस्थाने विनियुक्तः–अतः अस्य यज्ञपरं व्याख्यानमित्थम्- अहे–अहिंसक, बुध्निय–बुध्नं हृदयं तत्र भवः बुध्नियः हृद्गतः उपास्य आवसथ्याग्निः, तस्य सम्बोधनं बुध्निय इति मे मन्त्रं–मम मन्त्रं, गोपाय–रक्ष। यं मन्त्रम् ऋषयः मन्त्रद्रष्टारः, त्रैविदाः–त्रीन् वेदान् विदन्तीति त्रिविदः त एव त्रैविदाः, स्वार्थेऽण् विदुः=ज्ञातवन्तः, तं गोपायेत्यन्वयः ते मन्त्राः के इति जिज्ञासायामुक्तम्–"ऋचः सामानि यजूंषि" इति। सा हि=त्रयी एव, सतां–सज्जनानाम् अमृता=अनश्वरा, श्रीः सम्पदिति मन्त्राणां माहात्म्यं कीर्त्यते। अहे बुध्निय=इत्यस्य अहिर्बुध्न्यः देवताविशेषः इति केचित्, परमेश्वर इति च केचिद् व्याख्यानं कुर्वन्ति। अत्र वाक्ये ऋक्सामयजुषां मन्त्रत्वं श्रूयते, अतः सर्वत्रानुगतं मन्त्रलक्षणं किमिति विशये लक्षणं नाम लक्ष्यनिष्ठोऽसाधारणधर्मः, लक्ष्यस्य परिचायकः, स्वेतरव्यावृत्तिबोधनार्थं व्यवहारार्थं वापेक्ष्यते। अतिव्याप्त्यव्याप्त्यसम्भवदोषाभाव एव तत् सङ्गच्छते। पूर्वत्र प्रथमद्वितीये चतुर्थाधिकरणे मन्त्राणामर्थप्रकाशकत्वं निर्णीतम्। अतस्तदनुसारेण "विहितार्थाभिधायको मन्त्र" इति तल्लक्षणमुच्यते चेत् लक्षणमिदमदृष्टार्थजपादिमन्त्रेष्वव्याप्तम्, "वसन्ताय कपिञ्जलानालभते" "इत्यश्वमेधप्रकरणे श्रुते मन्त्रत्वेन प्रसिद्धे वाक्ये प्रमाणान्तरेणाप्राप्तार्थकतया विधायके विहितार्थाभिधायकत्वाभावादव्याप्तञ्च। मन्त्रशब्दस्य यौगिकार्थमनुसृत्य मननान्मन्त्रः, मननहेतुर्मन्त्र इति लक्षणमुच्यते चेत् श्रवणस्य मनन-हेतुत्वाद्वेदान्तादिश्रवणेऽतिव्याप्तिः।" "बर्हिर्देवसदनं दामि" इत्यादिवाक्येषु

मन्त्रत्वप्रसिद्धिमाश्रित्य "उत्तमपुरुषान्तो मन्त्रः" इति "असिपदान्तो मन्त्र" इति वा लक्षणं कथ्यते चेत्तेष्वेव वाक्येषु परस्परमव्याप्तिरिति सर्वत्रानुगतातिव्याप्त्यव्याप्त्यादिदोषरहितस्य लक्षणस्यासम्भवान्मन्त्रस्य निर्दुष्टं लक्षणं नास्तीति पूर्वपक्षे प्राप्ते उच्यते मन्त्रस्यापि निर्दुष्टं लक्षणं सम्भवत्येव। विहितार्थाभिधायकत्वादिलक्षणे दोषे सत्यपि मन्त्र इति याज्ञिकानां समाख्यानस्यैव निर्दुष्टलक्षणत्वं सङ्गच्छते। तथाहि–तृतीयेऽध्याये अङ्गत्वबोधकानि षट् प्रमाणानि निरूपयिष्यन्ते, तानि–श्रुतिः, लिङ्गम्, वाक्यम्, प्रकरणम्, सन्निधिः, समाख्या चेति षट्। तत्र अबोधकत्वबाधितत्वयोरप्रामाण्यकारण-योरभावाच्छुतिलिङ्गादिपञ्चकवत्समाख्यानस्यापि प्रामाण्यमुपपाद्यते। एवञ्च यत्र वेदवाक्ये मन्त्र इति याज्ञिकानां समाख्यानमस्ति तद्वाक्यं मन्त्रात्मकमिति अतिव्याप्त्यव्याप्तिदोषरहितं मन्त्र इति याज्ञिकानां समाख्यानमेव मन्त्रस्य लक्षणं भवितुमर्हति। "वसन्ताय कपिञ्जलानालभेत" इत्याद्यप्राप्तार्थविधाय-कवेदवाक्यानां "अग्निमीळे पुरोहितम्" इत्यादिस्तुतिरूपाणां श्रुतिवाक्यानां "उरु प्रथस्व" इत्यादीनामनुष्ठानस्मारकवेदवाक्यानाम् "इषे त्वा" इत्यादीनां त्वान्तानां वेदवाक्यानाम्, "अग्न आयाहि वीतये" इत्यादीनामामन्त्रणोपेतानां वेदवाक्यानाम्, "अग्नीदग्नीन्विहर" इत्यादीनां प्रैषरूपाणां वेदवाक्यानाम्, "अधः स्विदासीदुपरि स्विदासीत्" इत्यादीनां विवेचनपराणां वेदवाक्यानाम्, "अम्बे अम्बिके अम्बालिके न मा नयति कश्चन" इत्यादीनां प्रार्थनारूपाणां वेदवाक्यानाम्, "पृच्छामि त्वा परमन्तं पृथिव्याः" इत्यादीनां प्रश्नरूपाणां वेदवाक्यानाम्, "वेदिमाहुः परमन्तं पृथिव्याः" इत्यादीनामुत्तररूपाणां श्रुतिवाक्यानाम्, इत्येवमत्यन्तविजातीयानां विविधरूपाणां श्रुतिवाक्यानां मन्त्र इति समाख्यानमन्तरा मन्त्रत्वेन परिज्ञानस्यासम्भवाद् याज्ञिकानां समाख्ययैव मन्त्रत्वेन बोधो भवतीति स्वेतरव्यावृत्तमन्त्रत्वज्ञानार्थं मन्त्र इति व्यवहारार्थञ्च याज्ञिकानां समाख्यानात्मकं मन्त्रलक्षणं युक्तम्। याज्ञिकाश्च अनादिकालतः स्वाध्यायपरम्परारक्षणैकदक्षाः यद् यद् वाक्यं मन्त्रवाक्यमिति स्मरन्ति तेषामेव मन्त्रत्वमिति नान्धपरम्परादोषगन्धस्यापि अवकाशः।

प्रयोजनञ्च "मन्त्रेषु कर्माणि कवयो यान्यपश्यन्" इत्यादौ मन्त्रात्मकलक्ष्यस्य लघूपायेन ग्रहणम्।

इदानीमष्टमाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

**नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यतेऽथवा।**
**नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः॥२४॥**

**मन्त्रश्च ब्राह्मणञ्चेति द्वौ भागौ तेन मन्त्रतः।**
**अन्यद् ब्राह्मणमित्येतद् भवेद् ब्राह्मणलक्षणम्॥२५॥**

## जैमिनीयन्यायमालाप्रकाशिका

एतद् ब्राह्मणेत्यत्र="एतद्ब्राह्मणान्येव पञ्च हवींषि" इति श्रुतौ "ब्राह्मणम्" इति यत्पदमस्ति तस्य ब्राह्मणस्य लक्षणं विद्यतेऽथवा नास्तीति संशये इयन्तो वेदभागाः इति क्लृप्तेः वेदभागाः एतावन्त एवेति परिमाणस्य निश्चयस्य अभावात् ब्राह्मणस्य लक्षणं नास्तीति पूर्वपक्षे प्राप्ते मन्त्रश्च ब्राह्मणञ्चेति द्वौ भागौ=वेदस्य द्वौ भागौ मन्त्रः ब्राह्मणमिति स्तः तेन=अतः, मन्त्रतः अन्यद् ब्राह्मणम्=मन्त्र इति प्रसिद्धिः यद्वेदवाक्ये नास्ति तद् ब्राह्मणम् इत्येतद् ब्राह्मणलक्षणं भवेदिति सिद्धान्तः।

अयमाशयः– पूर्वाधिकरणे प्रसङ्गाद् यत्र वेदवाक्ये मन्त्र इति याज्ञिकानां प्रसिद्धिस्तद्वेदवाक्यं मन्त्रत्वेन ज्ञेयमिति मन्त्रलक्षणं निर्दुष्टं भवतीत्युक्तम्। मन्त्रप्रसङ्गाच्च ब्राह्मणस्य लक्षणमत्र चिन्त्यते। पूर्वपक्षस्तु वेदे बहुविधानि वाक्यानि श्रूयन्ते, तेषु मन्त्रत्वेन याज्ञिकानां समाख्यामाश्रित्य केषुचिद् वाक्येषु मन्त्रत्वे निश्चिते, तद्भिन्नानां हेत्वर्थवादादिवाक्यानां विविधानां श्रवणाद् मन्त्रत्वेन प्रसिद्धेष्वपि वाक्येषु हेत्वर्थवादादीनां दर्शनात् ब्राह्मणस्य लक्षणं निर्दुष्टं न सम्भवतीति।

सिद्धान्तस्तु "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति द्वैविध्यस्यैवाङ्गीकारान् मन्त्रलक्षणे ज्ञाते परिशेषन्यायेन तद्भिन्नो वेदभागः ब्राह्मणमिति ब्राह्मणलक्षणं युक्तमेव। अत्र मीमांसादर्शने "तच्चोदकेषु मन्त्राख्या" "शेषे ब्राह्मणशब्दः" इति मन्त्रब्राह्मणयोर्लक्षणमुक्तम्। याज्ञिकैरापस्तम्बाचार्यैः– "मन्त्रब्राह्मणयोर्वेद-नामधेयम्" "कर्मचोदना ब्राह्मणानि" "ब्राह्मणशेषोऽर्थवादः" "निन्दा प्रशंसा

परकृतिः पुराकल्पश्च" "अतोऽन्ये मन्त्राः" इति सूत्रैः ब्राह्मणावशिष्टो वेदभागो मन्त्रः इति मन्त्रलक्षणं कृतमिति ज्ञायते। सर्वथापि वेदस्य द्वैविध्यमङ्गीकृत्य एकस्य परिशेषन्यायेन लक्षणं स्वीक्रियत इति साम्यं दृश्यते। क्वचित्प्राचीनैः हेत्वादीनां सङ्ग्रहः कृतः एवं दृश्यते–

हेतुर्निवचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥ इति॥

एतेषामुदाहरणानि च मन्त्रवाक्येषु ब्राह्मणवाक्येषु च दृश्यन्ते। तथाहि–

१. "इन्दवो वा मुशन्ति हि" (तै.सं. १.४.४) "शूर्पेण ह्यन्नं क्रियते" श.ब्रा.२.५.२.२९

२. "उदानिषुर्महीरिति तस्मादुदकमुच्यते" [तै.सं.५.६.१] "तद्दध्नो दधित्वम्" तै.सं. २.५.९.४

३. "मोघमन्नं विन्दते अप्रचेताः" (ऋ.२.६.३३) "अयज्ञिया वै माषाः" मै.सं. १.४.१०

४. "अग्निर्मूर्धा दिवः ककुत्पतिः" ऋ.सं. ६.३.३९ "वायुर्वै क्षेपिष्ठा देवता" तै.सं. २.१.१

५. अधः स्विदासीदुपरि स्विदासीत् तै.ब्रा. २.८.९.५ "तद्व्य-चिकित्सज्जुहवानि, मा हौषम्" तै.ब्रा. २.१.२

६. "कपिञ्जलानालभेत" मै.सं. २४.२० "यजमानेन संमितौदुंम्बरी भवति" तै.सं. ६.२.१०

७. "सहस्रमयुता ददत्" "माषानेव मह्यं पचते"

८. "यज्ञेन यज्ञमयजन्त देवाः" तै.सं. ५.३.१० "पुरा ब्राह्मणा अभैषुः

९. "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेत्"

तै.सं. २.३.१२

अत्र क्रमशः हेतुपरं, निर्वचनपरं, निन्दापरं, प्रशंसापरम्, संशयपरं, विधिपरं, परक्रियापरं, पुराकल्पपरं व्यवधारणपरञ्च वाक्यानि मन्त्रभागेषु ब्राह्मणभागेषु च प्रायः उपलभ्यन्ते, अतः "हेत्वादीनामन्यतमं ब्राह्मणम्" इति ब्राह्मणलक्षणं वक्तुं न शक्यते, मन्त्रवाक्येष्वतिव्याप्तेः। अतः गत्यन्तराभावात् पूर्वोक्तरीत्या याज्ञिकानां समाख्यामाश्रित्य यत्र मन्त्र इति प्रसिद्धिः तद्वाक्यं मन्त्रवाक्यम्, मन्त्रवाक्यमिति वेदवाक्ये याज्ञिकानां यत्र प्रसिद्धिर्नास्ति तद्ब्राह्मणवाक्यमिति ब्राह्मणलक्षणं युक्तम्। लक्षणचिन्तायाः प्रयोजनञ्च "एतद्ब्राह्मणान्येव" इत्यादौ लघूपायेन लक्ष्यावगम एव।

इदानीं नवममूहाद्यमन्त्रताधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

**ऊहप्रवरनाम्नां किं मन्त्रतास्त्यथवा नहि।**
**मन्त्रास्तदेकवाक्यत्वान्न तल्लक्षणवर्जनात्॥ २६॥**

## जैमिनीयन्यायमालाप्रकाशिका

ऊहप्रवरनाम्नां="अग्नये जुष्टं निर्वपामि" इति श्रुतस्य सौर्ययागे "सूर्याय जुष्टं निर्वपामि" इति प्राकृतस्य प्रयोगस्य अन्यथाभावात्मकः ऊहः, "अग्ने महाँ असि ब्राह्मण भारत असावसौ" इति श्रुतेः "असावसौ" इत्यस्य स्थाने "भार्गवच्यावनाप्नवानौर्वजामदग्न्य" इत्यादि यत् प्रक्षिप्यते, तदेव प्रवरपदाभिधेयम्। एवं होतृवरणमन्त्रे "असौ मानुषः" इत्यत्रासौ इत्यस्य स्थाने होतुर्नाम रामः, कृष्ण इत्येवं प्रक्षिप्यते। अत्रैतेषामूहप्रवरनाम्नां किं मन्त्राता अस्ति न वेति विशये तदेकवाक्यत्वात्=मन्त्रेण सहैकार्थप्रतिपादकत्वेन एते मन्त्रा इति पूर्वपक्षे तल्लक्षणवर्जनात्=मन्त्र इति याज्ञिकानां समाख्यानाभावाद् ऊहप्रवरनाम्नां मन्त्रत्वं नास्तीति सिद्धान्तः।

अयमाशयः– सप्तमाष्टमाधिकरणाभ्यां वेदस्य मन्त्रब्राह्मणात्मक-भागद्वयात्मकत्वं स्वीकृत्य मन्त्र इति याज्ञिकानां समाख्यानस्यैव मन्त्रलक्षणत्वम्, तदवशिष्टो भागः ब्राह्मणपदाभिधेय इति ब्राह्मणलक्षणञ्च निर्णीते। तेन

कर्माङ्गशब्दत्वेनानुगतीकृतमृग्यजुःसामान्यतमत्वं मन्त्रत्वमिति मन्त्रलक्षणमुक्तं भवति, इदानीमूहप्रवरनाम्नां विषये अनुमितवेदविषये चिन्ता प्रवर्तते किमेतेषां मन्त्रत्वमुत ब्राह्मणत्वमिति। तत्र प्रवरोहनामधेयानां वेदे प्रत्यक्षमनाम्नातानामपि मन्त्रमध्यपठितत्वेन मन्त्रेण सहैकार्थप्रतिपादकतया मन्त्रकार्यापूर्वीयदेवता-प्रकाशकात्वेन च मन्त्रत्वमेव युक्तमिति पूर्वपक्षे प्राप्ते समाधानमभिधीयते–

आम्नातेषु अर्थात् वेदत्वेन पठ्यमानेषु वाक्येष्वेवायं विभागः मन्त्रः, ब्राह्मणमिति। अनाम्नातानां पौरुषेयपदानां वेदत्वमेव नास्ति अतः ऊहप्रवरनामधेयेषु मन्त्रलक्षणस्य ब्राह्मणलक्षणस्य चाभावान्न मन्त्रत्वं न वा ब्राह्मणत्वमिति युक्तम्। प्रयोजनञ्च ऊहप्रवरनामधेयेषु भ्रेषे [५२]मन्त्रभ्रेषनिमित्तं प्रायश्चित्तं न कार्यं सिद्धान्ते, पूर्वपक्षे तु तत्कार्यमिति विवेकः। एवं "यज्ञकर्मण्यजपन्यूङ्खसामसु" इति मन्त्रेषु विहितमैकश्रुत्यं ऊहप्रवरनामधेयेषु पूर्वपक्षे प्रवर्तते, सिद्धान्ते नेति भेदः।

इदानीं दशमैकादशद्वादशाधिकरणानि निरूप्यन्ते–

## जैमिनीयन्यायमाला

**नर्क्सामयंजुषां लक्ष्म साङ्कर्यादिति शङ्किते।**
**पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्वसङ्करः॥२७॥**

## जैमिनीयन्यायमालाप्रकाशिका

ऋक्सामयजुषां=ऋचां साम्नां यजुषां च, लक्ष्म=लक्षणं, साङ्कर्यान्नेति, शङ्किते=शङ्कायाम्, पादश्च=पादबद्धा मन्त्रा ऋचः, गीतिः=गीतिरूपा मन्त्राः सामानि, प्रश्लिष्टपाठः=पादगीतिवर्जिता मन्त्राः यजूंषीति असङ्करः=परस्परं भेदः अस्तीति सिद्धान्तः।

अयमाशयः–अत्र द्वितीयेऽध्याये प्रथमे पादे पूर्वत्र षष्ठेऽधिकरणे विधिमन्त्राधिकरणे मन्त्रगतानां विधीनां गुणकर्मपरत्वं प्रधानकर्मपरत्वं वा नास्त्यपि त्वभिधायकत्वमेवेति निर्णीते तत्र मन्त्रलक्षणं प्रसक्तम्, मन्त्रलक्षणे निश्चितेऽत्रानुप्रसक्तमृक्सामयजुषां लक्षणविवेचनम्, अतः प्रसक्तानुप्रसक्त्या

---

५२. भ्रेषे=स्कलने, यथोचितादधः पतनं भ्रेषः।

ऋक्सामयजुषां लक्षणपराणि दशमैकादशद्वादशाधिकरणानि प्रवर्तन्ते। अभियुक्तोपदेशानां प्रामाण्यात् पादबद्धा मन्त्रा ऋचः, गीतिरूपा मन्त्रा सामानि, ऋक्सामभिन्नाः प्रश्लिष्टपठिता मन्त्रा यजूंषीति ऋक्सामयजुषां लक्षणानां सम्भवाद् एतेषां साङ्कर्यं नास्तीति सिद्धान्ते निर्णीयते। प्रयोजनञ्च लघूपायेन लक्ष्यावगमः, तेन च "उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना" इति ऋगादिभेदेन धर्मभेदविधानात्तदपेक्षितं किमृग्लक्षणम्? किञ्च सामलक्षणम् किञ्च यजुर्लक्षणामिति निर्धारणम्। "यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद् ब्रह्मयज्ञः सन्तिष्ठते" इति ब्रह्मयज्ञे ऋगादीनां विनियोगात्तदर्थं लघूपायेन लक्ष्यावगमः।। इदानीं त्रयोदशाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

प्रोक्षणीरासादयेति निगदस्त्रिविधाद्बहिः।
यजुर्वोच्चैस्त्वधर्मस्य भेदादस्य चतुर्थता।।२८।।

परप्रत्यायनार्थत्वादुच्चैस्त्वं यजुरेव सः।
तल्लक्षणेन युक्तत्वात्त्रैविध्यमिति सुस्थितम्।।२९।।

## जैमिनीयन्यायमालाप्रकाशिका

प्रोक्षणीरासादयेति निगदः=परसम्बोधनार्थं श्रुता मन्त्रा निगदाः प्रोक्षणीरासादय, अग्नीदग्नीन् विहर इत्यादिमन्त्राः, त्रिविधाद्बहिः= ऋक्सामयजुर्भेदेन भिन्नेभ्यः त्रिविधमन्त्रेभ्यः बहिर्भूताश्चतुर्थकोटिका मन्त्रा उत यजुर्मन्त्रा एवेति संशये उच्चैस्त्वधर्मस्य भेदाद्="उच्चैर्निगदेन" इति निगदानामुच्चैस्त्वधर्मस्य विधानाद् यजुषामुपांशुत्वस्य विधानाद् उभयोर्धर्मभेदाद्, अस्य=निगदस्य चतुर्थता=चतुर्थकोटिकत्वमेव युक्तमिति पूर्वपक्षे प्राप्ते–सः= निगदः यजुरेव=यजुर्मन्त्र एवेति सिद्धान्तः। अत्र हेतुः तल्लक्षणेन युक्तत्वाद्=यजुर्लक्षणेन युक्तत्वादिति। निगदानामुच्चैस्त्वं परप्रत्यायनार्थत्वाद्= परसम्बोधनार्थत्वाद् विहितमिति शेषः। अतः त्रैविध्यमिति सुस्थितम्= ऋक्सामयजुर्भेदेन मन्त्राणां त्रैविध्यमेवेति भावः।

अयमाशयः– पूर्वाधिकरणेषु ऋक्सामयजुषां लक्षणानि निर्धारितानि- पादबद्धा मन्त्रा ऋङ्मन्त्राः, गीतिरूपा मन्त्राः साममन्त्राः, तदुभयलक्षणभिन्ना

मन्त्राः यजुर्मन्त्रा इति। अत्र यजुर्लक्षणस्य क्वचिदतिव्याप्तिरित्याक्षेपसङ्गत्येदमधिकरणं प्रवर्तते। "अग्नीदग्नीन्विहर" "बर्हिस्तृणीहि" "प्रोक्षणीरासादय" इत्यादीनि प्रैषार्थत्वेन प्रवृत्तानि वाक्यानि श्रूयन्ते। अत्राग्नीध्रादेः परस्य प्रोक्षण्यासादनादिस्मरणमपेक्षितमिति परसम्बोधनार्थमध्वर्युणा वाक्येनानेन प्रैषो दीयते। "प्रैषेषु पराधिकारात्"[५३] इति तृतीयाष्टमे प्रैषाणां प्रेष्यपुरुषान्तरविषयत्वं वक्ष्यते। एतेषां वाक्यानां पादबद्धत्वाभावादृङ्मन्त्रत्वं न सङ्गच्छते। गीतिरूपत्वाभावाच्च साममन्त्रत्वं न युक्तम्। यजुर्मन्त्रत्वमपि न सम्भवति; धर्मभेदात्। "उपांशु यजुषा" इति विधानादेतेषां यजुर्मन्त्रत्वे तद्वदुपांशुधर्मकत्वं स्यात्। तथा सति "उच्चैर्निगदेन" इति विधानं विरुध्येत. अतः प्रश्लिष्टपाठरूपस्य ऋक्सामभिन्नरूपस्य च यजुर्लक्षणस्य सत्वेऽपि निगदानां धर्मभेदादेव यजुर्मन्त्रत्वं न युज्यते। "तच्चोदकेषु मन्त्राख्या" इति न्यायेन याज्ञिकानां मन्त्रत्वप्रसिद्ध्या मन्त्रत्वं निगदेष्वस्तीति ऋक्सामयजुर्मन्त्रत्वाभावे परिशेषान्निगदाख्या मन्त्रास्तेभ्यो बहिर्भूताश्चतुर्थप्रकारका इत्येव युक्तमिति पूर्वपक्षे प्राप्ते समाधिरभिधीयते–"उच्चैर्ऋच्चा क्रियते, उपांशु यजुषा उच्चैः साम्ना उच्चैर्निगदेन"[५४] इति हि विहितम्। अत्र ऋक्सामनिगदानाङ्कृते उच्चैस्त्वधर्मः विहितः। यजुषां कृते उपांशुत्वधर्मो विहितः। अतः ऋक्साममन्त्रयोः लक्षणभेदे सत्यपि स्वरात्मकधर्मैक्यं दृश्यते, यजुर्मन्त्रनिगदमन्त्रयोःस्वरात्मकधर्मभेदे सत्यपि प्रश्लिष्टपाठरूपलक्षणैक्यं दृश्यते, तथाचात्र धर्मभेदः लक्षणभेदे न तन्त्रमिति निश्चीयते। अतः यजुषां निगदानाञ्च ऋक्सामभिन्नत्वरूपस्य प्रश्लिष्टपाठरूपस्य च लक्षणैक्यादैक्यमेव युक्तम्। निगदानां परसम्बोधनार्थत्वादुपांशुस्वरेण तदसम्भवादुच्चैस्त्वं विधीयते इति यजुर्मन्त्ररूपत्वेऽपि निगदानामुच्चैस्त्वं युक्तम्। निगदशब्दोऽपि नितरां गद्यन्त इति व्युत्पत्त्या गदतेर्धातोः गद्यमित्यादौ पादबन्धरहितप्रश्लिष्टपठिते प्रसिद्धेः प्रश्लिष्टपाठात्मकयर्जुवाचकः इति ज्ञायते। "उपांशु यजुषा" "उच्चैर्निगदेन" इत्यत्र यजुर्मन्त्राणां निगदमन्त्राणां वैक्येऽपि संज्ञाभेदः ब्राह्मणपरिव्राजकन्यायेन सङ्गच्छते इति न दोषः। "एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायांश्च

---

५३. जै.सू. ३.८.२२

५४. ऐ.ब्रा. ५.५.६

वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति"[५५] "ब्राह्मणः पाण्डित्यं निर्विद्य"[५६] इत्यादिश्रुतौ ब्राह्मणपदस्य श्रवणाद् ब्राह्मणानामेव परिव्राजकत्वेऽधिकार इति नियममनुसृत्य ब्राह्मणत्वे सत्यपि परिव्राजके परिव्राजकत्वव्यपदेशः यथा भवति तथा यजुष्ट्वे सत्यपि नितरां गद्यन्ते उच्चैरुच्चार्यन्त इति व्युत्पत्तिसिद्धगुणविशेषनिबन्धन एव यजुषां केषाञ्चित् निगदत्वव्यपदेश इति संज्ञाभेदः व्याप्यव्यापकभावेन यजुष्ट्वावान्तरव्याप्यस्यैव निगदत्वमिति युक्तम्। अत एव "उच्चैर्निगदेन" इत्यत्र परप्रत्यायनरूप-कार्यवशेन निगदत्वेन प्राप्ते यजुर्मन्त्रे उपांशुत्वव्यावृत्त्यर्थमुच्चैस्त्वं विधीयते तक्रकौण्डिन्यन्यायेन कौण्डिन्याय तक्रमितिवत्। न च निगदानां यजुष्ट्वे कार्यवशेन यजुर्धर्मस्योपांशुत्वस्य बाधो न युक्तः, लिङ्गेन श्रुतिबाधस्यायोगादिति वाच्यम्; प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य प्राबल्यस्य स्मृतिपादे निर्णीतत्वात् मन्त्रस्योपांशुत्वमङ्गम्, अर्थप्रत्यायनन्तु कार्यं प्रधानम्, तस्य लिङ्गरूपदुर्बलप्रमाणगम्यत्वेऽपि स्वरूपतो बलत्वेन तेना उपांशु यजुषा इति श्रुत्या प्राप्तस्यापि दुर्बलस्योपांशुत्वस्य बाधो युक्त एव। एवञ्च निगदानां यजुष्ट्वमेव, निगदत्वञ्चोच्चैस्त्वनिबन्धनम्। न च निगदत्वस्योच्चैस्त्वनिबन्धनत्वे ऋक्साममन्त्रयोरपि उच्चैस्त्वधर्मस्य "उच्चैर्ऋच्चा क्रियते" "उच्चैः साम्ना" इति विधानात्तयोरपि निगदत्वं स्यादिति वाच्यम्; "अयाज्या वै निगदाः" "ऋचो याज्या भवन्ति" इति ऋचः पृथङ्निर्देशात् पादबद्धमन्त्रत्वरूपस्य ऋग्लक्षणस्य गीतिरूपस्य सामलक्षणस्य निगदमन्त्रेभ्यो भेदकस्य सत्वाद् ऋक्साममन्त्रयोर्निगदत्वं न युज्यते। अत एव "नमः प्रवक्त्रे" "देवेद्धो मन्विद्ध" इत्यादीनां निगदत्वेन प्रसिद्धानां मन्त्राणां वचनेनैवोपांशुत्वस्यैव प्रतिपादनं प्रतिप्रसवरूपेण स्वीक्रियते। अतः यजुष्ट्वमेव निगदानामिति चतुर्थकोटिकल्पना नोचिता। अत्र च सुब्रह्मण्यावाक्यशेषे "मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजु-" रिति निगदस्य यजुष्ट्वसङ्कीर्तनमपि प्रमाणं भवति। "अहे बुध्निय मन्त्रं मे गोपाय। यमृषयःत्रैविदा विदुः। ऋचः सामानि यजूँषि। सा हि श्रीरमृता सताम्" इत्यत्र सर्वं वाक्यं सावधारणमिति न्यायेन ऋक्सामयजुषां मन्त्रत्वेन श्रवणमतिरिक्तस्य निगदस्य पृथक्

५५. बृहदारण्यकोपनिषत् ३.५

५६. बृहदारण्यकोपनिषत् ३.५

चतुर्थप्रकारकमन्त्रत्वं वारयति। "यदृचा क्रियते तदुच्चैः उपांशु यजुषा उच्चैः साम्ना" इति उच्चैस्त्वादिधर्मविधायकस्य वाक्यस्योपक्रमेऽपि "अग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः आदित्यात् सामवेद" इति ऋग्यजुस्साम्नामेव पृथक् पृथग्वेदत्वेन श्रवणं निगदानां चतुर्थप्रकारकत्वे सम्यङ् न सङ्गच्छेत। अनेनैव ज्ञायते यद् यजुष्ट्वेन निगदानामुपांशुत्वे सत्वेऽपि परप्रत्यायन-रूपकार्यानुरोधेनैवोच्चैस्त्वविधानमिति। तदेवं निगदानां यजुष्ट्वमेवेति मन्त्राणां ऋग्यजुस्सामभेदेन त्रैविध्यमेवेति पूर्वाधिकरणे निर्णीतं सुस्थितम्। प्रयोजनञ्च निगदानां भ्रेषे यजुर्भ्रेषनिमित्तं प्रायश्चित्तमनुष्ठेयं सिद्धान्ते, पूर्वपक्षे तन्नेति भेदः। एवं "सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसती" ति वाचस्तोमे विहिते शंसने निगदानामपि यजुष्ट्वेन शंसनं सिद्धान्ते, पूर्वपक्षे तन्नेतिभेदः। कुतूहलवृत्तिकारास्तु–केचित्तु यजुर्भ्रेषप्रायश्चित्तं वर्णयन्ति। तदयुक्तम् "यद्युक्तो यज्ञ आर्तिर्भवति भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहुयादथ यजुष्टो भुव इति दक्षिणाग्नावाग्नीध्रे सोमे" इति यजुर्भ्रेषप्रायश्चित्तम्। तदिदं निगदानां यजुष्ट्वाभावेऽपि यजुर्वेदविहितकर्माङ्गत्वमात्रेण तद्भ्रेषे सम्भवति, तत्र ऋगादिपदानां वेदपरत्वात्। त्रयो वेदा अजायन्त, भूरित्यृग्वेदात् भुव इति यजुर्वेदात् स्वरिति सामवेदात् इत्युपक्रमे "ऋग्वेदेन ऋग्वेदं भिषज्यति यजुर्वेदेन यजुर्वेदं सामवेदेन सामवेदम्" इत्युपसंहारे च वाजसनेयके, तथा ऐतरेयकताण्डकतलवकारीयब्राह्मणेषूपक्रमे वेदानामेव श्रवणादिति वदन्ति। खण्डदेवाचार्यैर्भाट्टदीपिकायां निगदानां यजुष्ट्वे निगदभ्रेषेऽपि यजुर्भ्रेषनिमित्तप्रायश्चित्तमित्यपि प्रयोजनमिति स्वीकृतम्। शास्त्रदीपिकायाः टीकायां मयूखमालिकायामपि निगदानां यजुष्ट्वे यजुर्भ्रेषप्रायश्चित्तमित्यपि प्रयोजनमिति व्याख्यातम्। इदानीं चतुर्दशाधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**देवस्य त्वेति वाक्यस्य भिन्नत्वमथवैकता।**
**ऐक्यप्रयोजकस्यात्र दुर्बोधत्वेन भिन्नता॥३०॥**

**विभागे सति साकाङ्क्षस्यैकार्थत्वं प्रयोजकम्।**
**तस्माद्वाक्यैक्यमेतेन यजुरन्तोऽवधार्यते॥३१॥**

## जैमिनीयन्यायमालाप्रकाशिका

"देवस्य त्वेति"="देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि" इति वाक्यस्य, भिन्नत्वम्=बहुवाक्यकत्वमुतैकता-एकवाक्यत्वमिति सन्देहे अत्र ऐक्यप्रयोजकस्य=एकवाक्यत्वस्य प्रयोजकस्य दुर्बोधत्वेन=निर्णेतुमशक्यत्वेन भिन्नता=बहुवाक्यकत्वमेव युक्तमिति पूर्वपक्षे प्राप्ते विभागे सति साकाङ्क्षस्यैकार्थत्वम्=विभागे सति साकाङ्क्षम् अविभागे चैकार्थम् तत्त्वमेकवाक्यत्वस्य प्रयोजकम्, तस्माद्वाक्यैक्यम्=देवस्य त्वेत्यारभ्य निर्वपामीत्यन्तमेकवाक्यम्, एतेन यजुरन्तो=यजुर्मन्त्रे एकस्य यजुर्मन्त्रस्य कुत्र समाप्तिरिति, अवधार्यते=निश्चीयत इति सिद्धान्तः।

अयमाशयः—ऋक्सामयजुर्भेदेन मन्त्राणां त्रैविध्यमेवेति निगदानां चतुर्थप्रकारत्वशङ्कायाः समाधानपूर्वकं पूर्वाधिकरणे निर्णीतम्। तत्र पादबद्धमन्त्रा ऋचः, एवं अप्रश्लिष्टपाठात्मक गीतिरूपा मन्त्राः साममन्त्रा इति तेषां भेदस्यार्थात् एकस्या ऋचः क्व समाप्तिः एकस्य साम्नः क्व समाप्तिरिति विषये सन्देहाभावाद् गद्यरूपस्य यजुर्मन्त्रस्य कथमयमेको यजुर्मन्त्रः अर्थात् कियान् भाग एकयजुर्मन्त्रत्वेन ग्राह्य इति यजुर्मन्त्राणां वाक्यसमाप्तिः कथं निर्णेयेति सन्देहवारणार्थमिदमधिकरणं प्रवर्तते। निगदानां यजुष्ट्वस्य पूर्वाधिकरणे निर्णीतत्वात्तदनु यजुर्मन्त्राणामेवावान्तरभेदविवेचनस्य प्रसङ्गादपीदमधिकरणं प्रवर्तते। तत्रोदाहरणत्वेनाय यजुर्मन्त्रो विचार्यते— "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि" अस्मिन् यजुर्मन्त्रे संशयः किं देवस्येत्यारभ्य निर्वपामीत्यन्तमेक एव मन्त्रः उत "देवस्य त्वा प्रसवे" "अश्विनोर्बाहुभ्याम्" "पूष्णो हस्ताभ्याम्" "अग्नये जुष्टं निर्वपामि" इत्यादीना बहूनां यजुर्मन्त्राणां समूहः इति संशये पूर्वपक्ष एवमुपस्थाप्यते— वाक्यैक्यस्य प्रयोजकं यदि अर्थैक्यम् तदा एकस्मिन् पदेऽतिव्याप्तिः। तद्यथा "यजेत" इत्येकं पदम्, यागेन भावयेदित्यर्थं बोधयति, तत्र अर्थैक्यं यज् धातोः "त" प्रत्ययस्य चास्तीति एकस्मिन् पदे लक्षणमिदमतिव्याप्तम्। यदि च पदसमूहो वाक्यमित्युच्यते तदा "देवस्य त्वा सवितः" इत्यादिना पदद्वयमध्ये पदत्रयमध्ये वा पदसमूहत्वेन वाक्यत्वापत्तिः। "एकतिङ् वाक्यमित्युच्यते" चेत् "अग्निमीळे पुरोहितम्" इत्यादिमन्त्रे ऋङ्मन्त्रभागेऽति-

व्याप्तिः स्यात्, यतः अत्र यजुर्भेदविचारः प्रवृत्तः, न तु लौकिकवैदिकसाधारण-वाक्यमात्रस्य विचार प्रवर्तते। यदि च "इज्यते अनेनेति यजुरिति व्युत्पत्त्या यावान्पदसमूहः प्रयुक्तो यागसाधनतामश्नुते तावदेकं यजुरिति एकवाक्यत्वस्य प्रयोजकं यजुर्भेदविचारायोपयुक्तं स्यादित्युच्यते तर्हि" "भगो वां विभजतु" "अर्यमा वां विभजतु" "पूषा वां विभजतु" इति भिन्नेषु यजुर्वाक्येषु पुरोडाशीयपिष्टविभागरूपैकार्थतया समग्रस्य पदसमूहस्य यागसाधनतास्तीति सम्पूर्णं पदजातमेकं यजुर्वाक्यं स्याद्। "अश्विनोर्बाहुभ्याम्" "पूष्णो हस्ताभ्याम्" इति यजुर्भागस्यापि लिङ्गाद्यागसाधनता सिद्ध्यति, यज्ञोपवीताभिमन्त्रणादौ कर्मसाधनत्वेन विधानश्रवणादपि सकलं "देवस्य त्वेत्यारभ्य निर्वपामी"–त्यन्तं पदजातं बहूनां यजुर्भेदानां समूहात्मकं स्यादित्येकयजुष्ट्वं समग्रस्य वाक्यस्य न सिद्ध्येत्। अतः यजुर्वाक्येषु एकवाक्यत्वस्य प्रयोजकं किमिति निरूपयितुमशक्यत्वात् "देवस्य त्वेति" वाक्यस्य एकयजुष्ट्वमिति वक्तुं न शक्यते, वाक्यभेद एवात्र युक्त इति पूर्वपक्षे प्राप्ते सिद्धान्त उच्यते।

"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति" यजुर्मन्त्रेषु एकवाक्यत्वस्य प्रयोजकम्।" यद्विभागे साकाङ्क्षमविभागे चैकार्थम्, तदेकं वाक्यमित्यर्थः। अत्र यद्विभागे साकाङ्क्षं तदेकं वाक्यमिति लक्षणमुच्यते अविभागे चैकार्थम् इति नोपादीयते चेत् "स्योनन्ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः" इति मन्त्रे वाक्यद्वयमस्तीति वाक्यभेदः स्वीक्रियते याज्ञिकैः यतः अत्र स्योनमित्यारभ्य कल्पयामीत्यन्तं पदजातं सदनकरणार्थत्वेन लिङ्गाद्विनियुक्तम्। तस्मिन् सीदेत्यारभ्य निर्वपामीत्यन्तं पदजातं लिङ्गात्पुरोडाशप्रतिष्ठापने विनियुक्तम् इति यजुर्भेदो युक्तः। परन्तु तस्मिन् सीद इत्यादिपदजातस्य सामर्थ्यज्ञानार्थमर्थादर्थबोधार्यं पूर्वसमूहस्य पदजातस्य साकाङ्क्षा भवति; तस्मिन्नित्यत्र तच्छब्दस्य पूर्वपरामर्शकत्वादतः यद्विभागे साकाङ्क्षं तदेकवाक्यमित्यङ्गीकारे अत्र स्योनमित्यारभ्य सुमनस्यमान इत्यन्तं पदजातस्यैकयजुष्ट्वं स्यात्तेन सदनकरणे प्रतिष्ठापने उभयत्रापि विनियोगः स्यात्। तेन च बलाबलाधिकरणे वाक्याल्लिङ्गस्य बलीयस्त्व इदमुदाहरणं न सङ्गच्छेत। स्वीकृतञ्चाकरे वाक्याल्लिङ्गस्य प्राबल्य इदमुदाहरणम्।

अत: वाक्यलक्षणे "अविभागे चैकार्थम्" इति उपादत्तम्, तेन "स्योनमि"-त्यादिवाक्ये पदसमूहात्मके 'स्योनमित्यारभ्य कल्पयामी'-त्यन्तस्य पदसमूहस्य "तस्मिन्नित्यारभ्य सुमनस्यमान" इत्यन्तस्य चैकार्थत्वाभावाद् यद्विभागे साकाङ्क्षमविभागे चैकार्थमिति एकवाक्यलक्षणस्याभावात् यजुर्भेद उक्तस्थले सिद्ध्यति। यदि च "यद्विभागे साकाङ्क्षमि"-त्यंशस्यानुपादाय अविभागे एकार्थमेकवाक्यमित्युच्यते तदा पूर्वोक्तप्रकारेण "भगो वां विभजतु" "पूषा वां विभजतु" इत्यादि वाक्यानां नैकयजुष्ट्वेन स्वीकृतानां द्रव्यविभागरूपस्यार्थस्य प्रयोजनस्यैकत्वादेकयजुष्ट्वं स्यात्। अत: अत्र लक्षणे "यद्विभागे साकाङ्क्षमविभागे चैकार्थं तदेकवाक्यम्". समेषामपि पदानां सार्थक्यम्। अत्र एकार्थमित्यत्रार्थपदेन प्रयोजनं ग्राह्यम्,[५७] न तु अभिधेयत्वम्; "भगो वां विभजतु" इत्यादिवाक्येषु एकाभिधेयत्वाभावाद्विभागे साकाङ्क्षमित्यस्य वैय्यर्थ्यापत्ते:, एकाभिधेयत्वस्य "हस्त: कर:" इत्यादिपर्यायशब्देषु सत्वादतिव्याप्तिश्च। प्रकृतोदाहरणे "देवस्य त्वेति" मन्त्रे अग्नये जुष्टं निर्वपामीत्यन्तं पदजातं निर्वापरूपस्यैकस्यैवार्थस्यार्थान्निर्वापरूपकार्यात्मकयागसाधनस्य बोधकत्वादग्नये जुष्टमित्यादिसमूहे पृथक्कृते पूर्व: देवस्य त्वेति समूह: साकाङ्क्षो भवत्यत एकयजुष्ट्वं सिद्ध्यति। तदेवं यजुर्मन्त्रेषु एकवाक्यत्वस्य प्रयोजकस्य सत्वात् "देवस्य त्वेत्यारभ्य निर्वपामी-" त्यन्तमेक एव यजुर्मन्त्र:। एवमन्यत्रापि यजुर्मन्त्रस्य कुत्र समाप्तिरिति प्रश्लिष्टपठितानां यजुर्मन्त्राणामवान्तरभेदस्य निश्चय: सुकर एवेति सिद्धान्त:।

प्रयोजनञ्च "यत्स्वाध्यायमधीयीतैकामप्यृचं यजु: साम वा तद् ब्रह्मयज्ञ: सन्तिष्ठते" इति ब्रह्मयज्ञे एकस्य यजुर्मन्त्रस्यापि अध्ययनं ब्रह्मयज्ञाङ्गत्वेन विधानं श्रूयते तत्र एकयजुष्ट्वस्य निश्चये यावदेकं यजुस्तावदेव प्रयोक्तव्यम्, न तु तदेकदेश इति विवेक:।

इदानीं पञ्चदशाधिकरणं निरूप्यते-

**जैमिनीयन्यायमाला**

**इषे त्वादिर्मन्त्र एको भिन्नो वैक: क्रियापदे।**
**असत्यर्थास्मारकत्वादेकादृष्टस्य कल्पनात्॥३२॥**

५७. "प्रयोजनवाच्यभिप्रायेण देवस्य त्वेत्युदाहृतम्" इति हि वार्त्तिकम्। तन्त्रवार्त्तिकम्-२.१.१६

छेदने मार्जने चैतौ विनियुक्तौ क्रियापदे।
अध्याहृते स्मारकत्वान्मन्त्रभेदोऽर्थभेदतः॥३३॥

## जैमिनीयन्यायमालाप्रकाशिका

इषे त्वादिर्मन्त्रः=इषेत्वोर्ज्जेत्वा इति श्रुतः पदसमुदायात्मको मन्त्रः, एको भिन्नो वा=एकयजुर्मन्त्रात्मकः उत यजुर्मन्त्रद्वयात्मक इति संशये एकयजुर्मन्त्रात्मक एवेति पूर्वपक्षः, अत्र हेतुः–असति क्रियापदे अर्थास्मारकत्वात्, उक्तपदसमुदाये क्रियापदस्याभावात् स पदसमुदायः कस्यापि प्रयोजनस्य स्मारको नास्ति, अतः अदृष्टप्रयोजनं कल्पनीयम्, अदृष्टस्य कल्पनायाम् एकमन्त्रात्मकत्वे **एकादृष्टस्य** कल्पनात्=एकस्यैवादृष्टस्य कल्पनायां लाघवात्। मन्त्रद्वयात्मकत्वे अदृष्टद्वयस्य कल्पनापत्तेः गौरवादेकयजुर्मन्त्रात्मक एव युक्तः, इति पूर्वपक्षे–

छेदने मार्जने चैतौ विनियुक्तौ="इषेत्वेति आच्छिनत्ति," "ऊर्जे त्वेत्यनुमार्ष्टि" इति श्रुत्या पलाशशाखायाः छेदने मार्जने च पृथक् पृथक् मन्त्रद्वयं विनियुक्तमतः अध्याहृते क्रियापदे=तदनुसारेण क्रियापदेऽध्याहृते सति स्मारकत्वात्=छेदनमार्जनरूपार्थयोः स्मारकत्वाद् अर्थभेदतः= छेदनमार्जनाख्यप्रयोजनभेदतः **मन्त्रभेदः**=यजुर्मन्त्रद्वयात्मक इत्येव युक्तमिति सिद्धान्तः।

अयमाशयः–पूर्वाधिकरणे "एकप्रयोजनसमर्थं विभज्यमाने साकाङ्क्षपदजातमेकं यजुरिति" निर्णीतम्। इदानीं तन्न्यायेन "इषे त्वा ऊर्ज्जे त्वा" इत्यत्रापि एकवाक्यतयैकयजुष्ट्वं स्वीकार्यमिति पूर्वपक्षः उपस्थाप्यते। अतः अत्र प्रत्युदाहरणसङ्गतिः। पूर्वाधिकरणे यद् वाक्यमुदाहृतम् "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि" इति, अत्र मन्त्रे "निर्वपामि" इति क्रियापदस्य विद्यमानत्वात् तेन निर्वापरूपस्यैकस्य प्रयोजनस्य दृष्टस्य सत्वात् तदर्थस्य समर्पकत्वेन सकलस्यापि पदजातस्य एकार्थत्वस्य सत्वात्, तद्विभागे च पदजातस्य साकाङ्क्षत्वात् "विभागे साकाङ्क्षमविभागे चैकार्थम्" इत्येकवाक्यस्य प्रयोजकस्य सत्वादेकयजुष्ट्वं स्वीकृतम्। प्रकृते "इषेत्वोर्ज्जेत्वा" इत्यत्र पदचतुष्टयात्मकमेकं

यजुरुत "इषे त्वा" इति पदद्वयात्मकमेकं यजुः, "ऊर्ज्जे त्वा" इति च पदद्वयात्मकं यजुरन्तरमिति यजुर्भेद इति सन्देहे क्रियापदस्याभावात् किमपि दृष्टं प्रयोजनं न ज्ञायते, अतः विभागे साकाङ्क्षमविभागे चैकार्थं वा नास्ति, अत एव यजुर्द्वयकल्पनापि न सङ्गच्छते; किन्तु निष्प्रयोजनकपदचतुष्टयस्य "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधिपरिगृहीतत्वानुपपत्त्या किमपि अदृष्टं प्रयोजनं कल्पनीयम्। प्रतिपादितञ्चैतज्जिज्ञासाधिकरणे–अध्ययनविधेः किमपि भाव्यमपेक्षते, तच्च दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वाद् दृष्टमर्थज्ञानमेव प्रयोजनमिति। तेन अर्थज्ञानञ्च कर्मोपयोगितया फलवदिति येषां स्वाध्ययविधिपरिगृहीतपद्रानां दृष्टद्वारा कर्मोपयोगिता नास्ति तेषामदृष्टद्वारा कर्मोपयोगिता कल्पनीयेति प्रतिपादितञ्जातम्। अत एव "वायुर्वै क्षेपिष्ठा देवता" इत्याद्यर्थवादवाक्यनां स्वार्थबोधे प्रयोजनाभावाद्विधिशेषतयार्थ-वत्त्वमर्थवादाधिकरण उक्तम्, एवं प्रथमद्वितीये मन्त्राधिकरणे "हुम्फट्" "वौषड्" आदिमन्त्राणामदृष्टार्थत्वमुक्तम्। अतः "इषे त्वोर्ज्जेत्वा" इति पदचतुष्टयस्याप्यदृष्टद्वारा कर्मोपयोगित्वं वक्तव्यम्। कल्पनीयञ्चादृष्टञ्चेल्ला-घवानुरोधेनैव तत्कल्पनीयमिति पदचतुष्टयस्याप्येकादृष्टार्थत्वञ्चेदेकमेवादृष्टं कल्पनीयमिति लाघवम्; अन्यथा अदृष्टद्वयकल्पनापत्त्या गौरवम्। उक्तञ्च–

**प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि।**
**बालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः॥** इति।

एवञ्च पदचतुष्टयस्याप्युक्तस्यैकादृष्टार्थत्वादेकार्थत्वमस्तीति एकवाक्यत्वस्य प्रयोजकस्य घटकीभूतस्य "विभागे साकाङ्क्षम्" इत्यस्यांशस्याभावेऽपि "ऐकार्थमविभाग" इत्यस्यांशस्य सत्वाद् एकवाक्यत्वं युक्तमतः "इषे त्वोर्ज्जे त्वे" ति पदचतुष्टयस्यैकयजुष्ट्वमेवेति पूर्वपक्षः। अथवोक्तपदचतुष्टयस्यैकादृष्टार्थत्वे सिद्धे तेनैव च विभागे साकाङ्क्षत्वमपि सिद्ध्यतीति उक्तैकवाक्यत्वस्य प्रयोजकस्य सत्वादेवैकयजुष्ट्वमिति पूर्वपक्षे प्राप्ते–समाधिरभिधीयते–"इषे त्वोर्ज्जे त्वा" इत्यस्यायमर्थः:– अत्र इट्शब्दोऽन्नवाचकः, तस्य चतुर्थ्येकवचनमिषे इति, "त्वा" इत्यस्य त्वामित्यर्थः। एवमूर्क्शब्दः अन्नरसस्य वाचकः, तस्य चतुर्थ्येकवचनमूर्ज्जे इति "त्वा" इत्यस्य त्वामित्यर्थः, तथाच अन्नाय अन्नरसाय त्वामिति

पर्यवस्यति। अतः "इषेत्वा" इति पदयोः "ऊर्ज्जे त्वा" इति पदयोश्चार्थात् पदद्वयात्मकसमूहेनैकेन सहेतरस्य आकाङ्क्षा नास्तीति विभज्यमानसाकाङ्क्षत्वं नास्तीति सत्यम्, परन्तु लाघवानुरोधेनैकार्थत्वमिति तदनुरोधेन एकयजुष्ट्वं यदुक्तं तन्न युज्यते। यतः "इषे त्वा" "ऊर्ज्जे त्वा" इति पदसमुदाययोः स्वरूपतः निराकाङ्क्षत्वे ज्ञाते तदनुरोधेन प्रयोजनद्वयं कल्पनीयमेव, यथा विश्वजिता यजेत "इत्यादौ अश्रुतफलेषु यागेषु भेदेनैव फलं कल्प्यते, प्रयाजेषु "समिधो यजति" "इडो यजति" इत्येवं विहितेषु भिन्नं भिन्नमेवापूर्वं स्वीक्रियते। स्वरूपतो निराकाङ्क्षाणामपि लाघवानुरोधेनैकं प्रयोजनं कल्प्यते चेद्विश्वजिदादिचोदनानामप्येकमेव फलं स्वीक्रियेत। समिदादियागानामप्येकमेवापूर्वं फलत्वेन स्वीक्रियेत। उक्तञ्च मिश्रपादैः–

> **यद्यप्येषामदृष्टोऽर्थस्तथापि न तदेकता।**
> **रूपतो हि निराकाङ्क्षा भिन्नत्वेनावधरिताः॥**
>
> **अन्योन्यानादरेणैव प्रार्थयन्ते प्रयोजनम्।**
> **यथापेक्षमतस्तेषां भिन्नादृष्टप्रकल्पनम्॥**
>
> **यथा विश्वजिदादीनां भेदेन फलकल्पना।**
> **यथा च समिदादीनामपूर्वं भिन्नमिष्यते॥** इति।

किञ्चात्रादृष्टार्थत्वकल्पनापि नापेक्षते। "इषे त्वेत्याच्छिनत्ति "ऊर्जे त्वेत्यनुमार्ष्टि" इति वचनेनैव छेदनमार्जनयोर्भेदेन विनियोगश्रवणात् तत्तत्कार्यस्मारकत्वेनोभयोरर्थभेदात् अविभाग एकार्थत्वं नास्ति विभागे साकाङ्क्षत्वञ्च नास्तीत्युभयाभावप्रयुक्तैकवाक्यत्वाभावो निश्चीयते। अतः इषे त्वेत्येकं यजुः, ऊर्जे त्वेत्येकं यजुरिति यजुर्भेदोऽत्र युक्तः। उक्तञ्च भट्टाचार्यैः–

> **अन्योन्यनिरपेक्षाणां कार्यान्यत्वे नियोगतः।**
> **प्रत्येकं यागहेतुत्वाद्यजुष्ट्वमवकल्पते॥** इति।[५८]

---

५८. तन्त्रवार्त्तिकम् २.१.१५

भाष्ये चोक्तम्– "नन्विदानीमेवोक्तं नात्र दृष्टोऽर्थ इति। यद्यपि प्रत्यक्षादिना प्रमाणेन नोपलभ्यते। श्रुत्या तु गम्यते।"[५९] इति एवम् "आयुर्यज्ञेन कल्पताम्" "प्राणो यज्ञेन कल्पताम्" "अपानो यज्ञेन कल्पताम्" इत्यादिना "यज्ञो यज्ञेन कल्पताम्" इत्यन्तं "कल्पताम्" इति पदघटितानि दश वाक्यानि श्रूयन्ते। तत्र दश पदसमूहानामेकयजुष्ट्वमुत यजुर्भेद इति विषये "क्लृप्तीर्वाचयती"–ति कलृप्तिबहुत्वस्य विधानाद्यजुर्भेद इति युक्तम्। यद्यप्यत्र "कल्पताम्" "कल्पताम्" इति क्रियाभेदस्य स्पष्टत्वात् यजुर्भेदः स्फुट एव, "इषे त्वोर्ज्जे त्वे"–त्यत्र तु क्रियापदस्याश्रवणाल्लाघवेनै-कादृष्टार्थत्वमिति तत्प्रयुक्तमेकयजुष्ट्वं पूर्वपक्ष आशङ्कितमिति स्थलद्वये वैषम्यम्, तथापि क्लृप्तिसामान्यस्यैकत्वादायुरादिभेदेन भेदाभावात्प्रयोजनभेदो नास्ति यथा "अग्नये जुष्टं निर्वपामी"–त्यत्र निर्वाप एक एव प्रयोजनम्, तस्य विशेषणम्–सवितुः प्रसवे, अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् "इति, न हि विशेषणभेदेन सामान्यं भिन्नं भवति इत्येकयजुष्टं स्वीकृतम्, तथात्रापि प्रयोजनैक्यात्तदनुरोधेन विभागे साकाङ्क्षत्वमप्यस्तीति यजुरेकमेवेति पूर्वपक्षो युज्यते। सिद्धान्तस्तु "क्लृप्तीर्वाचयती "ति वचनं श्रूयते। क्लृप्तिपदं न कल्पतामिति पदपरम्, न वा क्लृप्तिपदघटितमन्त्रपरम्; लक्षणापत्तेः, अपि तु क्लृप्तिक्रियारूपार्थपरम्। क्लृप्तीः इति बहुवचनश्रवणात् क्लृप्तिक्रिया-रूपार्थानामपि भेदः निश्चीयते। तेन बहुत्वविशिष्टक्लृप्तिवचनविधिः कल्प्यते, तेन विधिना "आयुर्यज्ञेन कल्पताम्" इत्यादौ आयुरादिविशिष्ट-क्लृप्तिविशेषरूपार्थभेदाद्यजुर्भेदः इति।

प्रयोजनञ्च "इषे त्वोर्जे त्वे–" त्यत्र पूर्वपक्षे पदचतुष्टयस्य सकृत् प्रयोगः, सिद्धान्ते तु पदद्वयस्यैवेति भेदः। "आयुर्यज्ञेन कल्पताम्" इत्यादिक्लृप्तिमन्त्रेषु चैकमन्त्रभ्रेषे पूर्वपक्षे समस्तपदजातस्योच्चारणम्, सिद्धान्ते तु तस्यैव मन्त्रस्यावृत्तिरिति भेदः।

इदानीं षोडशाधिकरणं निरूप्यते, तत्र वर्णकद्वयम्। आदौ प्रथमं वर्णकं निरूप्यते–

---

५९. शाबरभाष्यम् २.१.१६

## जैमिनीयन्यायमाला

या ते अग्ने रजेत्यध्याहारो यद्वानुषञ्जनम्।
तनूरित्यन्यशेषत्वादध्याहारोऽत्र लौकिकः॥३४॥

वेदाकाङ्क्षा पूरणीया वेदेनेत्यनुषञ्जनम्।
अन्यशेषोऽपि बुद्धिस्थो लौकिकस्तु न तादृशः॥३५॥

## जैमिनीयन्यायमालाप्रकाशिका

या ते अग्ने रजेति="या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत् स्वाहा। या ते अग्ने रजाशया, या ते अग्ने हराशया," इति मन्त्रे "रजाशया", "हराशया" इत्यत्र साकाङ्क्षत्वाद् अध्याहारः=लौकिक क्रियापदस्याध्याहारो यद्वा अनुषञ्जनम्=पूर्ववाक्यस्यैव तनूर्वर्षिष्ठेत्यादिभागस्य साकाङ्क्षितस्याकाङ्क्षापूरणार्थं ग्रहणं वेति संशये अध्याहारोऽत्र लौकिकः=लौकिकक्रियापदस्याध्याहारः तनूरित्यन्यशेषत्वाद्= तनूर्वर्षिष्ठेत्यादिभागस्य अयाशयेत्यस्य शेषत्वादिति पूर्वपक्षे अनुषञ्जनमेव युक्तमिति सिद्धान्तः। तत्र हेतुः-वेदाकाङ्क्षा वेदेन पूरणीया=वैदिकी आकाङ्क्षा वेदवाक्यैरेव पूरणीयेति नियमात्, अन्यशेषोऽपि बुद्धिस्थः=तनूर्वर्षिष्ठेत्यादेर-याशयेत्यस्य शेषत्वेऽपि पूर्ववाक्यस्थत्वेन बुद्धिस्थत्वात्, लौकिकस्तु न तादृशः=लौकिकं किमपि पदजातं तथा बुद्धिस्थं नास्ति, अतः पूर्ववाक्यशेषस्यैवानुषञ्जनमिति सिद्धान्तः।

अयमाशयः– पूर्वाधिकरणे "इषे त्वोर्ज्जे त्वे"–त्यत्र यजुर्भेदः निर्णीतः, तेन यजुःपरिणामस्य निर्धारणमवगतमत्राप्यनुषङ्गाध्याहारविवेचनमुखेन यजुःपरिमाणस्य निर्धारणं क्रियत इति सङ्गतिः। ज्योतिष्टोम उपसद्धोममन्त्रा आम्नाताः–"या ते अग्ने" इत्यादिना, अस्यायमर्थः–अग्ने! ते=तव, या अयाशया तनूः=लोहमयी तनूः, वर्षिष्ठा=अतिशयेन वृद्धिं गता, गह्वरेष्ठा गह्वरे तीक्ष्णे लोहे स्थिता, उग्रं वचः=क्षुत्पिपासादिकम्, त्वेषं वचः=महापातकम्, अपावधीत्=नाशयामास, तया तन्वा ममापि क्षुत्पिपासादिकं नाशमेतु इति भावः। अत्र उग्रं वचः, त्वेषं वचः इति मन्त्रभागस्य क्षुत्पिपासादिकम्, महापातकमिति चार्थः ब्राह्मणवाक्यैः ज्ञायते। तथा च ब्राह्मणम् "अशनायापिपासे

ह वा उग्रं वचः। एनश्च वैरहत्यञ्च त्वेषं वचः" इति। अतः प्रथममन्त्रस्यार्थः परिपूर्णः इति स निराकाङ्क्षः। पुराणेष्वपि–कालीकरालीमनोजवादिजिह्वाभेदेन अग्निं, सम्बोध्य पापेभ्यः महाभयाच्च रक्षां कुरु इति प्रार्थना दृश्यते–

**"कराली नाम या जिह्वा महाप्रलयकारणम्।**
**तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात्।।**[६०] इत्यादिना।

द्वितीयतृतीयमन्त्रौ "या ते अग्ने रजाशया" "या ते अग्ने हराशया" इति। तत्र रजाशया इत्युक्तौ रजतमयी तनूः, हराशयेत्युक्तौ स्वर्णमयी तनूः इत्यर्थो गृह्यते। द्वावपि साकाङ्क्षौ। अतः द्वितीयतृतीयमन्त्रयोराकाङ्क्षानिवारणार्थं वाक्यशेषः अपेक्षते। स वाक्यशेषः लौकिकोऽध्याहार्यः उत पूर्वमन्त्रस्य यः शेषः "तनूर्वर्षिष्ठा" इत्यारभ्य स्वाहान्तभागः तस्यानुषङ्गोऽत्र कार्य इति सन्देहः।

अत्रैवं पूर्वपक्ष उपस्थाप्यते–"समिधो यजति" इत्यादि प्रयाजवाक्यानां "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति अधिकारविधेश्चैकवाक्यत्वं स्वीक्रियत उभयाकाङ्क्षासत्वात्। अतः यत्र उभयस्याप्याकाङ्क्षा दृश्यते तत्रैकवाक्यत्वं युक्तम्। एकस्मिन् वाक्येऽपि क्रियापदस्य कारकपदस्य चोभयस्य चाकाङ्क्षासत्वादेकवाक्यत्वं स्वीक्रियते। प्रकृते तु प्रथममन्त्रस्याकाङ्क्षा नास्त्येव, द्वितीयमन्त्रस्य तृतीयमन्त्रस्य चाकाङ्क्षास्त्येव। अत उभयाकाङ्क्षाभावादेकवाक्यत्वं न सङ्गच्छते, द्वितीयतृतीयमन्त्रयोः साकाङ्क्षत्वात् साकाङ्क्षं वाक्यमप्रमाणं भवति, अतः मन्त्रवाक्यस्यात्र प्रामाण्यनिर्वाहाय पूर्ववाक्यस्य शेषस्यानुषङ्गः क्रियते चेत् स्वाध्यायक्रमस्य भङ्गात्तस्य लौकिकवाक्यत्वमेव भवति। अतः अनयोः मन्त्रयोराकाङ्क्षापूरणार्थं लौकिको वाक्यशेषः "या ते अग्ने रजाशया तनूः अस्मान् पातु" इत्येवमादिना अध्याहर्तव्यः। किञ्च "तनूर्वर्षिष्ठादिवाक्यशेषस्य" या ते अग्ने रजाशया "इति द्वितीयमन्त्रस्य कृते देहलीदीपन्यायेन सन्निधानन्तु लभ्यते, तृतीयमन्त्रस्य तु सन्निधानमपि नास्तीति अगत्या लौकिकवाक्यमेव शरणम्, अतः एकस्य मन्त्रस्याकाङ्क्षापूरणमनुषङ्गद्वारान्यस्य चाध्याहारेणेति वैषम्यापेक्षया वरमुभयत्रापि लौकिकवाक्यशेषस्यैवाध्याहार इति पूर्वपक्षः।

६०. मार्कण्डेयपुराणम्–अध्याय १६, श्लोक सं. ५२

सिद्धान्तस्तु प्रथममन्त्रस्य शेषः। "तनूर्वर्षिष्ठेत्यादिभागः एव द्वितीयतृतीयमन्त्रयोः शेषापेक्षिणोराकाङ्क्षापूरणार्थमनुषज्यत इति युक्तम्। अतः अत्र प्रथममन्त्रस्योक्तः वाक्यशेषस्यानुषङ्गः कार्यः। अनुषज्यत इत्यनुषङ्गः, वाक्यसमाप्तिः अर्थाद्वाक्यं समाप्यते अनेनेति वाक्यपूरकः। अत्र हेतुः क्लृप्तत्वादिति क्लृप्ताक्लृप्तयोः क्लृप्तं भवति बलवदिति न्यायात्। स्वाध्यायाध्ययनक्रमे प्रथमं बुद्धौ प्रथममन्त्रस्यैव शेष उपस्थितः, द्वितीयतृतीयममन्त्रयोः शेषापेक्षायां तस्यैवोपस्थितिः प्रथमं भवति, यत्र च तादृशः वाक्यशेषो न श्रूयते तत्र त्वगत्या लौकिकवाक्यानां शरणम्। यदुक्तम्–तृतीयमन्त्रेण सह प्रथममन्त्रगतस्य शेषस्य सन्निधानाभावादगत्या तदर्थं लौकिकानां वाक्यानां शरणम् इति द्वितीयतृतीयमन्त्रयोरपेक्षितवाक्यशेषस्य विषये एकरूपतानिर्वाहार्थं लौकिकवाक्यानामेवाश्रयणमुचितमिति। तत्रोच्यते– प्रथममन्त्रस्य शेषः "तनूर्वर्षिष्ठे"–त्यादिभागः प्रथममन्त्रार्थमेवाम्नात इति नास्ति किन्तु सर्वार्थमेव। अतः तृतीयमन्त्रस्य "या ते अग्ने हराशया" इत्यस्य वाक्यशेषस्याकाङ्क्षा, प्रथममन्त्रवाक्यशेषेण सह सन्निधानं योग्यता च सन्तीति आनन्तर्याभावमात्रेण प्रथममन्त्रशेषस्यान्वयो भवितुं नार्हतीति वक्तुं न शक्यते। वाक्यजन्यज्ञाने च त्रीण्येव करणानि, तान्यत्र सन्तीति तृतीयमन्त्रस्याकाङ्क्षापि प्रथममन्त्रशेषेणैव पूर्णा भवति। उक्तञ्च भट्टाचार्यैः–

**आकाङ्क्षा सन्निधानञ्च योग्यता चेति च त्रयम्।**
**सम्बन्धकरणत्वेन क्लृप्तं नानन्तरश्रुतिः॥**[६१] इति।

किञ्च शाब्दबोधे कारणीभूतसन्निधिः बुद्धौ विपरिवृत्तिः। अतः आनन्तर्यं सम्बद्धपदव्यवाये च भवति, सम्बद्धपदव्यवायोऽपि आनन्तर्यप्रकार एव। उक्तञ्च–

**अनन्तरेण सम्बद्धः स्यात्परस्याप्यनन्तरः।**
**ततः पुनस्तदारूढः परानन्तर्यमश्नुते॥** इति।

अतः "या ते अग्ने हराशया" इत्यस्याप्यकाङ्क्षा प्रथममन्त्रस्य वाक्यशेषेणैव पूर्णा भवतीति द्वितीयतृतीयमन्त्रयोः समानरूपेणाकाङ्क्षापूरणं

६१. तन्त्रवार्त्तिकम्–२.१.१६

"तनूर्वर्षिष्ठे"–त्यादिशेषेणैव भवतीति लौकिकवाक्यशेषस्याध्याहारो नापेक्षते।

किञ्च चोदनालक्षणोऽर्थो धर्म इति धर्मे चोदनाया एव प्रामाण्यस्योक्तत्वात् वैदिकवाक्यस्याकाङ्क्षायाः पूरणक्षमो वैदिक एव शेषो न तु लौकिक इति वक्तव्यम्। यत्र तु सर्वात्मनान्विष्यमाणोऽपि योग्यो वाक्यशेषो न लभ्यते तदा लौकिकवाक्यशेषः अगत्या स्वीकार्यः। यदि तु स्ववाक्येऽपेक्षिताकाङ्क्षायाः पूरणक्षमो वाक्यशेषः तदव्यवहितपूर्वपदे न लभ्येत तदा ततः पूर्वस्य शेषः स्वीकार्यः, तत्रापि न लभ्यते चेल्लोकतः स वाक्यशेषो ग्राह्य इति हि स्थितिः। उक्तञ्च

**सन्निकृष्टो न लब्धश्चेद्विप्रकृष्टोऽपि वैदिकः।**
**स एवावैदिकस्तु स्यात्प्राप्तः सन्निहितो यदा।।** इति

अतः "या ते अग्ने रजाशया" "या ते अग्ने हराशया" इत्युभयत्रापि आकाङ्क्षापूरणार्थं" "तनूर्वर्षिष्ठे"–त्यादिशेषस्यानुषङ्गः कार्य इति सिद्धान्तः। प्रयोजनञ्च पूर्वपक्षे द्वितीयतृतीयमन्त्रयोरपेक्षितशेषस्याध्याहृतत्वाल्लौकिकत्वात्तद्भ्रेषे यजुर्भ्रेषनिमित्तप्रायश्चित्तं नापेक्षते, सिद्धान्ते तु पूर्वमन्त्रस्यैवात्रानुषङ्गः स्वीकृत इति यजुष्ट्वाद्यजुर्भ्रेषप्रायश्चित्तमेव कार्यं तस्य भ्रेष इति विवेकः।

इदानीं सप्तदशाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

**नानुषङ्गोनुषङ्गो वाच्छिद्रेणेत्यस्य शेषिणोः।**
**चित्पतिस्त्वेत्यनाकाङ्क्षवतो नात्रानुषज्यते।।३६।।**

**करणत्वं क्रियापेक्षं क्रिया चैका पुनात्विति।**
**मन्त्रत्रयेऽतस्तद्द्वारा सर्वशेषोऽनुषज्यते।।३७।।**

## जैमिनीयन्यायमालाप्रकाशिका

अच्छिद्रेणेत्यस्य="चित्पतिस्त्वा पुनातु। वाक्पतिस्त्वा पुनातु। देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः "इत्यत्र "अच्छिद्रेणे "त्यारभ्य "रश्मिभि "रित्यन्तस्य शेषस्य प्रथममन्त्रे "चित्पतिस्त्वा पुनातु

"इत्यत्र, "वाक्पतिस्त्वा पुनातु "इति द्वितीयमन्त्रे च, नानुषङ्गोऽनुषङ्गो वा=अनुषङ्गो न भवति भवति वेति सन्देहे शेषिणो: "चित्पतिस्त्वा पुनातु" वाक्पतिस्त्वा पुनातु" इति मन्त्रयो:, अनाकाङ्क्षवतो:=आकाङ्क्षारहितयो:, नात्रानुषज्यते=शेषस्य "अच्छिद्रेणेत्यादि-" भागस्य अनुषङ्गो न भवतीति पूर्वपक्षे प्राप्ते सिद्धान्त उच्यते-करणत्वं क्रियापेक्षम्="सूर्यस्य रश्मिभि:" तृतीयमन्त्रे तृतीयया करणत्वं श्रूयते, तच्च क्रियामपेक्षते, क्रिया चैका पुनात्विति=मन्त्रत्रयेऽपि पुनात्विति क्रिया चैकेव श्रूयते, अत: तद्द्वारा सर्वशेष:=अच्छिद्रेणेत्यादिभाग: "पुनातु" इति क्रियापदेन सह अन्वयपूर्वकं तद्द्वारा त्रिष्वपि मन्त्रेषु अनुषज्यत इति युक्तमिति सिद्धान्त:।

अयमाशय:-"अनुषङ्गो वाक्यसमाप्ति: सर्वेषु तुल्ययोगित्वात्" इति अनुषङ्गविवेचनपरं सूत्रमेकमेव दृश्यते। अस्य भाष्ये वार्तिके च "या ते अग्नेऽयाशया" "चित्पतिस्त्वा पुनातु" इति स्थलद्वयमुदाहृतम्। तदेवेहाचार्यैर्वर्णकद्वयरूपेण चिन्त्यते। प्रथमवर्णके यद्वाक्यमुदाहृतम्-तत्र साकाङ्क्षाणां सन्निधौ यो वाक्यशेष: पठित:, स सर्वार्थ उत यस्यैवानन्तरं पठितस्तस्यार्थ एवेति सन्देहे सर्वार्थ एवेति सिद्धान्त: स्वीकृत:। अत्र तु द्वितीयवर्णके निराकाङ्क्षाणां सन्निधौ यो वाक्यशेष: पठित: स सर्वार्थ इति तस्य सर्वत्रानुषङ्ग कार्य उत निराकाङ्क्षाणां पृथग्वाक्यत्वमेव, शिष्टो वाक्यशेष: साकाङ्क्षश्चेत् तदाकाङ्क्षापूरणमध्याहारेण येन केनचिनल्लौकिकवाक्यसहायेन कार्यमिति विचार्यते। ज्योतिष्टोमे दीक्षाप्रकरणे श्रूयते-"चित्पतिस्त्वा पुनातु" इत्यादीनि वाक्यानि, अत्र वाक्यद्वयं प्रथमं द्वितीयञ्च परिपूर्णार्थप्रकाशकम्, तृतीयं वाक्यं "देवस्त्वा सविता पुनातु" इत्यन्तं परिपूर्णार्थप्रकाशकम्, तत: परम् "अच्छिद्रेणे"- त्यारभ्य रश्मिभिरित्यन्तं साकाङ्क्षो वाक्यशेष:, अस्य वाक्यशेषस्य प्रथमवाक्ये द्वितीयवाक्ये चानुषङ्गो न कार्य उत कार्य इति सन्देह:। पूर्वपक्षस्त्वेवमुपस्थाप्यते-प्रथमवर्णके "या ते अग्नेऽयाशया" इत्यस्मिन् स्थले यद्विचारितम्, तत्र "या ते अग्ने रजाशया" "या ते अग्ने हराशया" इति मन्त्रद्वयं सकाङ्क्षम्, अत्र तु "चित्पतिस्त्व पुनातु" "वाक्पतिस्त्वा पुनातु" इति मन्त्रद्वयं निराकाङ्क्षमिति अनुषङ्गस्याध्याहारस्य वाऽपेक्षाभावात् आकाङ्क्षामुत्थाप्य वाक्यशेषस्यानुषङ्गो न युक्त:, तृतीयमन्त्रेण सह वाक्यशेषस्य

"अच्छिद्रेणे"–त्यारभ्य रश्मिभिरित्यन्तस्य एकवाक्यतया तद्वाक्यमपि परिपूर्णं निराकाङ्क्षं भवति। यदि वाक्यशेषस्य साकाङ्क्षत्वादनुषङ्ग इष्यते तदा प्रकरणे सर्वत्रानषङ्गस्तस्य प्रसज्येत। अतः यद्यपि वाक्यशेषो यस्यानन्तरं पठितः स तस्यार्थ एवेति नियमो नास्ति तथापि "चित्पतिस्त्वा पुनातु" "वाक्पतिस्त्वा पुनातु" इति शेषिणोः निराकाङ्क्षत्वादत्र वाक्यशेषस्य "अच्छिद्रेणे-"त्यादेरनुषङ्गो न कार्यः।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते–अत्र यद्यपि "चित्पतिस्त्वा पुनातु" "वाक्पतिस्त्वा पुनातु" "देवस्त्वा सविता पुनातु" "इति शेषिणः निराकाङ्क्षाः तथापि "अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः" इति वाक्यशेषः करणकारकान्तः, करणत्वं क्रियामपेक्षत इति साकाङ्क्ष एव। पुनात्वति क्रिया च त्रिष्वपि मन्त्रेष्वेकैव। अतः साकाङ्क्षस्य वाक्यशेषस्या-काङ्क्षायां पूरणं कस्य मन्त्रस्यान्वयद्वारा कार्यमिति जिज्ञासायां यस्यानन्तरं वाक्यशेषः पठितः स तस्यार्थ एवेति नियमाभावस्य पूर्ववर्णके साधितत्वात् वाक्यत्रयस्यापि निराकाङ्क्षात्वात् अनेन मन्त्रेणान्वयो भवतु नानेन मन्त्रेणेति विनिगमने प्रमाणाभावात्, वाक्यशेषस्याकाङ्क्षापूरणार्थं लौकिकवाक्यस्य शरणे गौरवाद् वैदिकस्यैव "चित्पतिस्त्वा पुनातु" "वाक्पतिस्त्वा पुनातु" "देवस्त्वा सविता पुनातु" इति वाक्यत्रयस्यैव अध्ययनक्रमे बुद्धिस्थत्वात् त्रिष्वपि वाक्येषु वाक्यशेषस्यानुषङ्गः कार्य इति सिद्धान्तः। किञ्च प्रतिप्रधानं गुणावृत्तिरिति न्यायेनापि शेषिणां शेषित्वेन प्रधानत्वात् वाक्यशेषस्य त्रिष्वपि वाक्येष्वनुषङ्गो युज्यते।

प्रयोजनञ्च– पूर्वपक्षे यथाश्रुतन्तथैव पाठः "चित्पतिस्त्वा पुनातु" इत्येव मन्त्रस्य पाठः, सिद्धान्ते तु "चित्पतिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभि-" रिति कृत्स्नप्रयोग इति भेदः। एतदधिकरण-सिद्धान्तमनुसृत्य–तैत्तिरीये रुद्रपाठे "सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषां सहस्रयोजनेव धन्वानि तन्मसि।।" "य एतावन्तश्च भूयाँसश्च दिशो रुद्रा वितस्थिरे। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि।।" एतन्मन्त्रद्वयं निराकाङ्क्षमिति स्पष्टं यद्यपि विज्ञायते तथापि मध्यवर्त्तिनाम् "अस्मिन्महत्यर्ण-वेऽन्तरिक्षे भवा अधि" इत्यारभ्य "ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः"

इत्यन्तानां मन्त्राणां साकाङ्क्षत्वात् तदाकाङ्क्षापूरणार्थं "तेषां सहस्रयोजनेऽव धन्वानि तन्मसि" इति मन्त्रस्य सर्वत्रानुषङ्गः साम्प्रदायिकैः क्रियते।

इदानीमष्टादशाधिकरणं निरूप्यते—

## जैमिनीयन्यायमाला

**गच्छतामिति शब्दस्यानुषङ्गोऽस्ति न वोपरि।**
**सं यज्ञपतिरित्यत्र योग्यत्वात् सोऽस्ति पूर्ववत्॥३८॥**

**तदेकवचनं मध्यमन्त्रेऽङ्गानीत्यनेन हि।**
**नान्वेति तद्व्यवायेन नोपर्यप्यनुषज्यते॥३९॥**

इति माधवीये जैमिनीयन्यायमालायां द्वितीयाध्यायस्य प्रथमः पादः।

## जैमिनीयन्यायमालाप्रकाशिका

गच्छतामिति शब्दस्य="सं ते प्राणो वातेन गच्छताम्। समङ्गानि यजत्रैः। सं यज्ञपतिराशिषा।" इति मन्त्रेषु प्रथमवाक्ये स्थितस्य गच्छतामिति शब्दस्य, सं यज्ञपतिरित्यत्रानुषङ्गोऽस्ति न वेति सन्देहे, उपरि=सं यज्ञपतिराशिषेति तृतीयमन्त्रस्य पूर्ववत्=पूर्वाधिकरणे यथानुषङ्गः स्वीकृतस्तथात्र योग्यत्वात्, सोऽस्ति=अनुषङ्गोऽस्तीति पूर्वपक्षे तदेकवचनम्=गच्छताम् इति, मध्यमन्त्रे "समङ्गानि यजत्रैः "इत्यत्र अङ्गानीत्यनेन=अङ्गानीति बहुवचनान्तेन, नान्वेति=अन्वयं न गच्छति, इति हेतोः तद्व्यवायेन=बहुवचनान्तस्य व्यवधानस्य सत्वात्, नानुषज्यते=सं यज्ञपतिराशिषा गच्छतामिति अनुषङ्गो न भवति, उपर्यपि=तृतीयमन्त्रस्य प्रथममन्त्रान्तेऽनुषङ्गोऽपि न भवतीति सिद्धान्तः।

अयमाशयः— पूर्वाधिकरणेऽन्यतराकाङ्क्षासत्वाद्योग्यतायाः सन्निधेश्च वशादनुषङ्गः कर्तव्य इति निर्णीतम्। अत्र प्रत्युदाहरणसङ्गत्याधिकरणमिदं प्रवर्तते। अग्नीषोमीयपशोः समञ्जनमन्त्राः श्रुताः"—"सन्ते प्राणो वातेने-" त्यादिना। अयमर्थः—हे पशो ते=तव प्राणो, वातेन=वायुना सङ्गच्छताम्। अङ्गानि=हृदयादीनि, यजत्रैः=यागैः, सम्=सङ्गच्छन्तामिति अध्याहारेण, गच्छतामित्यस्य पूर्ववाक्यस्थस्य गच्छन्तामिति व्यत्ययेनानुषङ्गेण वार्थो वक्तव्यः। एवं "यज्ञपतिः आशिषा सम्" इत्यत्रापि गच्छतामित्यस्यानुषङ्गेण

अध्याहारेण वा यज्ञपतिराशिषा सङ्गच्छतामित्यर्थो वक्तव्यः।

अत्र पूर्वपक्षस्तु प्रथममन्त्रे सङ्गच्छतामिति क्रियापदं श्रुतम्। तत्र धातोरर्थः गमनम्, समुपसर्गकधातोश्च सङ्गमनम् सम्प्राप्तिरिति। द्वितीयमन्त्रस्य च तृतीयाकारकयुक्तस्य यजत्रैरिति पदघटितस्य क्रियापदस्याकाङ्क्षास्तीति अत्र प्रथमन्त्रे श्रुतस्य सम्प्राप्त्यर्थकधातोराकाङ्क्षापूरणक्षमत्वमस्तीति गच्छतामित्यस्य गच्छन्तामिति बहुवचनान्तरूपेणानुषङ्गः कर्तव्यः बुद्ध्यनुपस्थितस्य अध्याहारे गौरवात्। तृतीयमन्त्रस्य च "आशिषा" इति आकाङ्क्षयुक्तपदान्तस्याकाङ्क्षापूरणक्षमत्वं गच्छतामिति प्रथममन्त्रश्रुते क्रियापदे स्वभावत एवास्तीति आकाङ्क्षायोग्यतासन्निधानानां सत्वात्तृतीयमन्त्रे प्रथममन्त्रस्थितस्य गच्छतामिति पदस्यानुषङ्ग एव कार्यः, लौकिकक्रिया-पदान्तरस्याध्याहारे गौरवादिति।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते। "समङ्गानि यजत्रैः," "सं यज्ञपतिराशिषा" इति मन्त्रयोराकाङ्क्षास्तीति सत्यम्। अध्ययनविधिना परिगृहीतवर्णानां प्रथमं प्रथममन्त्रस्यानन्तरं द्वितीयमन्त्रस्यैवं तृतीयमन्त्रस्येति क्रमस्य दर्शनाद् "गच्छताम्" इति क्रियापदस्य सन्निधानमप्यस्तीत्यपि युक्तम्। परन्तु योग्यतास्ति न वेति विचारणीयम्। यद्यप्युक्तविधया गम्धात्वर्थस्य योग्यता प्रतीयते परन्तु प्रकृतिप्रत्यययोः परस्परान्वितयोरेव पदान्तरेण सम्बन्ध इति अनुभवात्तयोरेकस्यासम्बन्धे सत्यपरस्याप्यसम्बन्ध इति नियमस्य स्वीकार्यतया गच्छतामित्यस्य क्रियापदस्य द्वितीयमन्त्रेण बहुवचनान्तक्रियापद-स्याकाङ्क्षावतान्वययोग्यता नास्तीति गच्छतामित्यस्य गच्छन्तामिति व्यत्ययेन योग्यतावत्त्वमुच्यते चेत्तस्य वैदिकानुपूर्विविरहत्वादूहप्रवरादीनाममन्त्रत्वन्यायेन लौकिकत्वादनुषङ्गो द्वितीयमन्त्रे नास्तीत्येव वक्तव्यं भवति। अत एव द्वितीयमन्त्रस्य व्यवधानादेव तृतीयमन्त्रेऽपि सन्निधानस्य भङ्गादनुषङ्गो न युक्तः। एवञ्च द्वितीयमन्त्रस्याकाङ्क्षापूरणं तृतीयमन्त्रस्य चाकाङ्क्षापूरणञ्च लौकिकपदाध्याहारेणेति सिद्धान्तो युज्यते।

प्रयोजनञ्च पूर्वपक्षे द्वितीयमन्त्रे तृतीयमन्त्रे चाकाङ्क्षापूरकपदस्यानु-षक्तत्वाद्यजुर्मन्त्रत्वमिति तद्भ्रेषे यजुर्भ्रेषनिमित्तं प्रायश्चित्तमनुष्ठेयम्, सिद्धान्ते

तु तस्याध्याहृतत्वाल्लौकिकत्वाद्यजुर्भ्रेषनिमित्तं प्रायश्चित्तं नानुष्ठेयमिति विवेकः। अत्र खण्डदेवभट्टाचार्याः—प्रत्ययमात्रोहे प्रकृतेरार्षत्ववत् प्रथममन्त्रस्य गच्छतामिति पदस्य गमिधातुमात्रस्य द्वितीयमन्त्रेऽनुषङ्गसम्भवेन तद्द्वारा तृतीयमन्त्रे सम्बन्धसम्भवेन प्रत्ययमात्रस्यैवानुषङ्गो निराकर्तव्यः, प्रकृत्यंशस्य तु यजुष्ट्वमेव, अत एवेदृशविषये विपरिणतानुषङ्गमाचक्षते वृद्धा इति वदन्ति। कुतूहलवृत्तिकारास्तु "गच्छता"—मित्येकवचनान्तस्य प्रथममन्त्रस्य द्वितीय-मन्त्रेऽङ्गानीत्यनेनान्वयार्थं बहुवचनान्ततया विपरिणामो न युक्तः; प्रकृतावूहा-भावस्य नवमतृतीये "अपूर्वे त्वविकारोऽप्रदेशात् प्रतीयेत" इत्यधिकरणे व्यवस्थापयिष्यमाणत्वादतः अत्र द्वितीयमन्त्रे तृतीयमन्त्रे चाध्याहारेणैवाकाङ्क्षा पूर्त्तिरिति मन्यन्ते। अत्राध्याहृतस्य लौकिकत्वादाकाङ्क्षितशब्दस्य मनसैव स्मरणम्, न प्रयोगः। अर्थाध्याहारपक्षे तु शब्दस्यापि न स्मरणमर्थमात्रस्यैव स्मरणं कार्यमिति प्राचीनमतानुसारी पन्थाः। ऊहप्रवरनामधेयानां विषये तु "असौ मानुष इति होतुर्नाम गृह्णाति" "आर्षेयं वृणीते" "त्रीन्वृणीते" इत्यादिवेदानुमतत्वात्प्रयोगो युक्त इति भेदः।।१२।।

इत्थं जैमिनीयन्यायमालायाः प्रकाशिकायाः द्वितीयप्रथमः।

## द्वितीयः पादः

### जैमिनीयन्यायमाला

ददाति, यजतीत्यादौ भावनैक्यमुतान्यथा।
आख्यातैक्यात्तदेकत्वं धातुभेदोऽप्रयोजकः॥१॥

धातुभेदेन भिन्नत्वमाख्याते श्रूयते ततः।
उत्पत्त्येकानुरक्तत्वाद्भिद्यन्ते भावना मिथः॥२॥

### जैमिनीयन्यायमालाप्रकाशिका

उपोद्घातप्रसक्तानुप्रसक्तं बहु चिन्तितम्।
प्रथमे तु द्वितीयेऽत्र लक्षणार्थो विचिन्त्यते॥

ददाति यजतीत्यादौ="हिरण्यमात्रेयाय ददाति" "सोमेन यजेत" "दाक्षिणानि जुहोति" इत्यादिवाक्येषु, भावनैक्यम् भावनानामेकत्वम्, उत अन्यथा=भावनाभेदः इति सन्देहे आख्यातैक्यात्=आख्यातप्रत्ययस्यैकत्वात्, तदेकत्वम्=भावनानामेकत्वम्, धातुभेदः=दाञ्, यज इत्येवं धातुभेदः, अप्रयोजकः=भावनाभेदे प्रयोजको नास्तीति पूर्वपक्षे प्राप्ते धातुभेदेन भिन्नत्वमाख्याते=धातुभेदेन तद्विशिष्ट आख्यातेऽपि भिन्नत्वं श्रूयते, ततः उत्पत्त्येकानुरक्तत्वाद्=आख्यातानामुत्पत्त्यैवैकेकधातुविशिष्टत्वाद्, मिथः भावना भिद्यन्ते परस्परं भावना भिद्यन्त इति सिद्धान्तः।

अयमाशयः—पूर्वस्मिन्पादे कर्मभेदौपयिकत्वेन वाक्यार्थविचारः कृतः। इदानीं साक्षादेव कर्मभेदस्य निमित्तानां चिन्ता क्रियते। अत्र शब्दान्त-राभ्याससङ्ख्यासंज्ञागुणप्रकरणान्तराणां कर्मभेदनिमित्तत्वं द्वितीयतृतीय-पादाभ्यामुपपादयिष्यते। प्रथमं शब्दभेदस्य कर्मनिमित्तत्वमस्मिन् प्रथमेऽधिकरण

उपपाद्यते। "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति प्रकृत्य "सोमेन यजेत" "दाक्षिणानि जुहोति" "हिरण्यमात्रेयाय ददाति" इत्यादीनि वाक्यानि श्रुतानि। अत एकप्रकरणस्थेषु वाक्येष्वत्र यागदानहोमादिसकलप्रकृत- धात्वर्थानुरक्ता एका भावना गम्यत उत प्रतिधात्वर्थं भावनाभेद इति सन्देहः। अस्मिन् पादे प्रकरणान्तरातिरिक्तानां कर्म भेदनिमित्तानां समेषां विचारः प्रवर्तत इति पादसङ्गतिः, कर्मभेदविचारपरत्वाद्द्वितीयाध्यायस्याध्याय- सङ्गतिश्च सङ्गच्छेते। प्रथमपादस्यान्तिमेऽधिकरणेऽनुषङ्गविचारः कृतः, स च विचारः धात्वर्थस्य भावनाकरणत्वे स्तुतशस्त्राधिकरणान्तैः सपरिकरं विचारिते तत्प्रसङ्गात् मन्त्रगताख्यातानामविधायकत्वे च विचारिते तत्प्रसङ्गान्मन्त्रलक्षणादीनां विचारे च कृते तत्रानुप्रसक्तः, इदानीमुपोद्घातप्रसक्तानुप्रसक्तविचारनिबन्धे समाप्ते "यत्प्रसङ्गेन यदागतं तत्समाप्तौ तदबुद्धिस्थं जायत" इति न्यायेन भवार्थाधिकरणोक्तधात्वर्थ- करण्त्वस्यैवोपस्थितेः तस्य चापूर्वभेदसिद्धिद्वारा भावनाभेदसिद्ध्यर्थत्वादत्र भावनाभेदोऽवसरप्राप्तः इति पूर्वाधिकरणेन सह सङ्गतिरपि युज्यते। भावनाभेदस्य च षण्णां निमित्तानां शब्दान्तराभ्यासादीनां वक्ष्यमाणानामुपस्थितौ सकलभावनाभेदानामर्थाद्भावनाभेदमात्रस्यैव निमित्तभूतस्य शब्दान्तरस्य सूचीकटाहन्यायेनादौ चिन्त्यत इत्यस्याधिकरणस्याध्यायपादाधि- करणसङ्गतयः सुतरां सङ्गच्छन्ते। अत्र पूर्वपक्ष एवमुपस्थाप्यते अत्र यजेत, ददाति, जुहोतीत्यादौ यागदानहोमादिधात्वर्थभेदेन भिन्नत्वेन प्रतीयमानानां भावनानामैक्यमेव युक्तम्; यतः प्रत्ययवाच्या भावना, तस्याञ्च धात्वर्थः करणमिति भावार्थाधिकरणे निर्णीतम्। अतः भावनायाः प्राधान्यमवगम्यते। "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत, तयोस्तु प्रत्ययः प्राधान्येन" इति स्मृत्या च प्रत्ययस्य प्राधान्यं गम्यते। धात्वर्थश्च गुणभूतः। अतः "न हि गुणानुरोधेन प्रधानावृत्तिरिति" न्यायेन गुणभूतधात्वर्थभेदानुरोधेन प्रधानभूतभावना भेदो न युक्तः। भावनाभेदे चापूर्वाणामपि भेदोऽगत्या सिद्ध्यतीति धात्वर्थभेदानुरोधेन भावनाभेदकल्पनायां बह्वपूर्वकल्पनापत्त्या गौरवञ्च भवति; यतः भावना च व्यापारः, तस्य च भाव्यमपेक्षते, भाव्यप्राप्तिपर्यन्तमेव भावना, अतः भावनाभाव्यत्वादपूर्वस्य भावनाभेदेऽपूर्वभेदोऽगत्या स्वीकार्यो भवति। भावनाभेदे अपूर्वभेदोऽपि सिद्ध्यति अतः भावनानामनेकत्वे गौरवम्। समानन्यायेन धात्वर्थानां भेदे भावनाभेदोऽपि स्यादिति वक्तुं न शक्यते; धात्वर्थस्य

भावनां प्रति करणत्वस्य स्वीकारात् कारकभेदे क्रियाभेदस्यादर्शनात्। अत एव अरुणाधिकरणे "अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति" इत्यत्र अरुणिमादिकारकभेदेऽपि क्रयभावनाया एकत्वं स्वीक्रियते। एवञ्च धात्वर्थभेदस्य भावनाभेदं प्रति प्रयोजकत्वाभावात् भावनैक्ये च तद्भाव्यस्यापूर्वस्याप्येकत्वेन लाघवादुक्तस्थले यजेत, ददाति, जुहोतीत्यादौ एकेव भावनेति युक्तमिति पूर्वपक्षः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–"यजेत "ददाति" जुहोती–"त्यादौ धातुभेदेन तदर्थानुरक्तानां प्रत्ययवाच्यानां भावनानामपि मिथः भेदो युक्तः, यतः यद्यपि "यजेत" "इत्यादौ प्रकृत्या धात्वर्थो बोध्यते प्रत्ययेन च भावना प्रधानभूता इति तु सत्यम् तथापि सदैव प्रकृतिप्रत्यययोः विशिष्टार्थबोधकत्वमेव लोके गम्यते, निष्प्रकृतिकप्रत्ययो न जातु क्वचित् व्यवहारे प्रयुज्यते न वा प्रत्ययरहिता वा प्रकृतिः प्रयुज्यते, "न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्यय" इति महाभाष्योक्तेश्चप्रकृति–प्रत्यययोरन्वितार्थबोधकत्वमतः प्रकृतिभेदेन प्रकृतिविशिष्ट प्रत्ययस्यापि भेदस्य "विशिष्टं शुद्धादतिरिच्यते" इति न्यायसिद्धत्वाद् "यजेत" "ददाति" "जुहोती"– त्यादौ शब्दभेदाद्भावनाभेदस्ततः कर्मभेद इति युक्तम्। प्रकृतिप्रत्यययोरन्वितार्थबोधकत्वमभिहितान्वयवादिनामपि सम्मतमेव। सङ्क्षेपशारीरके प्रकृतिप्रत्ययातिरिक्तस्थल एवाभिहितान्वयवादो भाट्टसम्मत इति स्पष्टमुक्तम्।

जैमिनीयन्यायमालाप्रकाशिका

प्रत्ययप्रकृतिशब्दतो बहिर्विद्यतेऽभिहितसङ्गतिश्च नः।
प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वितधियो निमित्तता।।इति[६२]

न चारुणाधिकरणे "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इत्यत्र अरुणादिभिर्युगपत्क्रयभावना विशेष्यत इति स्वीक्रियते तद्वदत्रापि "सोमेन यजेत" "दाक्षिणानि जुहोति" "हिरण्यमात्रेयाय ददाति" इत्यादिवाक्यैः एकप्रकरणगतैः "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यधिकारविधिना

६२. सङ्क्षेपशारीरिकम् 1–३९३

स्वर्गफलकभावनामात्रे विहिते तदनुवादेन सोमादिविशिष्टयागादिविधिरिति धात्वर्थभेदेन कर्मभेदो न युक्त इति वाच्यम्; वैषम्यात्। "अरुणया पिङ्गाक्ष्ये"–ति वाक्ये क्रीणातिः सकृत् पृथक्श्रूयते अरुणिमादयश्च पृथक् श्रूयन्ते, अतोऽरुणिमादिभिर्युगपत्क्रयभावना विशेष्यत इति युक्तम्, प्रकृते तु "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति फलवाक्ये धात्वर्थाविवक्षया केवलस्य प्रत्ययस्य श्रवणं नास्ति, फलवाक्येन प्राप्तभावनामनूद्य सोमादिवाक्ये सोमयागाद्यनेकविधाने वाक्यभेदापत्तिः। यश्च भावनाभेदे बह्वपूर्वकल्पनापत्तिदोष उक्तः, स च धातुभेदेन प्रत्ययभेदस्य श्रुतत्त्वान्न दोषः। यदि समुदितेभ्यो धातुभ्य एक एव प्रत्ययः श्रूयेत तदायं दोषः स्यात्। किन्तु "यजेत" "जुहुयाद्" इत्यादौ धातुभेदेन प्रत्येकमेव प्रत्ययस्य विधिः श्रूयते। अतः "यजेत" इत्यत्र प्रत्ययो यजिपरः श्रूयमाणः केवलयागकरणिकां भावनां श्रुत्या एकपदोपात्तत्वरूपया विधत्ते, एवं "जुहुयाद्" "दद्यात्" इत्यत्र होमदानादयस्त्वन्यधात्वर्थाः पृथक् पृथक् होमकरणिकां दानकरणिकां च भावनां श्रुत्या बोधयन्ति। एवञ्च श्रुतिप्रमाणाद् धातुभेदेन प्रत्ययभेदः अतः तद्बोध्यः कर्मभेद इति सिद्ध्यति। यदि च एकस्यां भावनायां धात्वन्तरस्यान्वयः वक्तव्यश्चेत् धात्वन्तराणां पदान्तरगतत्वात्तत्र श्रुतिप्रमाणं न क्रमते किन्तु वाक्यं सन्निधिः प्रकरणं वा प्रमाणमिति वाक्यादीनां प्रमाणानां श्रुत्यपेक्षया दुर्बलत्वात् तार्तीयन्यायोऽवरुध्येत। अतः प्रकृतस्थले शब्दान्तरात्कर्मभेदः। शब्दान्तरत्वञ्च विभिन्नधात्वर्थत्वमेव। एतदेवोक्तं कारिकायाम् "उत्पत्त्येकानुरक्तत्वाद्भिद्यन्ते भावना मिथः" इति। "यजेत" "जुहोति" इति पदश्रुत्यैव प्रत्ययवाच्यभावनायाः धात्वर्थविशिष्टत्वात् "विशिष्टं शुद्धादतिरिच्यते" इति न्यायेन धात्वर्थभेदाद् भावनाभेदस्ततश्च कर्मभेद इति।

प्रयोजनञ्च पूर्वपक्षे "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति फलवाक्ये विहितां धात्वर्थाविषयां केवलभावनामनूद्य सोमादिवाक्यैर्धात्वर्थाः सोमयाग-होमदानादिगुणा विधीयन्त इति स्वीकारात् सोमयागहोमदानानां समप्राधान्यम्, तेन च विकल्पः। सिद्धान्ते यागहोमदानादिवाक्येषु भावनाभेदस्याङ्गीकारात् सोमयागस्यैव प्राधान्यम्, "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यधिकारविधिना

फलवत्त्वश्रवणात् "फलवत्सन्निधावफलं तदङ्गम्" इति न्यायेन होमदानयोः "दाक्षिणानि जुहोति" "हिरण्यमात्रेयाय ददाति–त्यादिना विहितयोस्तदङ्गत्वमिति विवेकः।

सम्प्रति गुरुमतेनेदमधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

**नियोगैकत्वतः शास्त्रमभिन्नमिति चेन्न तत्।**
**धातुभेदाच्छास्त्रभेदे नियोगो भिद्यते बलात्।। ३।।**

### प्रकाशिका

गुरुमते "अथातो धर्मजिज्ञासा" इति जिज्ञासाधिकरणे वेदार्थविचारः कर्तव्यतया प्रतिज्ञातः। वेद एव शास्त्रमित्युच्यते। वेदानाञ्च द्वितीयेऽधिकरणे कार्ये एव तात्पर्यं साधितम्। अतः कृत्स्नं शास्त्रं नियोगार्थम्। नियोगः कार्यमित्यनर्थान्तरम्। नियोगश्च यजेत, जुहुयाद्, दद्यात् इत्यादौ सर्वत्र प्रत्ययवाच्यः, उक्तेषु त्रिष्वप्याख्यातेषु नियोगस्यैकत्वात् धातूनां नियोग-वाचकत्वाभावाद् धातुभेदेन नियोगभेदस्याभावात् कृत्स्नं शास्त्रमभिन्नमिति पूर्वपक्षे धातुभेदेन धातुविशिष्टप्रत्ययस्यापि भिन्नत्वात्तद्वाच्यानां नियोगानामपि भिन्नत्वमिति उक्तस्थले शास्त्रभेद एव युक्त इति सिद्धान्तः।

### प्रथमं शब्दान्तराधिकरणम्।।१।।

### अथ द्वितीयमभ्यासाधिकरणम्।।२।।

### प्रकाशिका

### जैमिनीयन्यायमाला

**समिधो यजतीत्यादावेकत्वमुत भिन्नता।**
**धातुप्रत्यययोरैक्यादेकत्वं भिन्नता कुतः।।४।।**

**अभ्यासात् कर्मभेदोऽत्र नामत्वान्न विधिर्गुणे।**
**विधित्वं श्रुतितो भाति सन्निधेरनुवादतः।।५।।**

## प्रकाशिका

पूर्वाधिकरणे एकप्रकरणगतानां "यजेत" "जुहोति" "ददाती–" ति तिङन्तभेदानां प्रत्ययैक्येन कर्मैक्यबोधकत्वमाशङ्क्य धातुभेदेन तद्विशिष्टप्रत्ययानामपि भिन्नत्वात्कर्मभेदः निर्णीतः, सम्प्रति एकप्रकरणगतानां समानरूपकतिङन्तानां विचारः प्रवर्तते। अतः शास्त्रसङ्गतिः, अध्यायसङ्गतिः, पादसङ्गतिः, पूर्वाधिकरणसङ्गतिश्चेति स्पष्टम्। "समिधो यजति" "तनूनपातं यजति" "इडो यजति" "बर्हिर्यजति" "स्वाहाकारं यजति" इति तैत्तिरीयसंहितायां[६३] शतपथब्राह्मणे[६४] च दर्शपूर्णमासप्रकरणे श्रुतानि वाक्यानि विषयवाक्यानि। अत्र संशयः– किं "समिधो यजती–" त्यादिवाक्यपञ्चकेनैकं कर्म विधीयत उत प्रत्येकं वाक्यमेकस्यैकस्य कर्मणः विधायकमिति कर्मभेद इति।

पूर्वपक्ष एवमुपस्थाप्यते–पूर्वाधिकरणे यदुक्तमेकपदश्रुत्या धातुविशिष्टप्रत्ययानां "यजति" "ददाति" इत्यादिपदेषु भिन्नत्वाद्भावनाभेदस्ततश्च कर्मभेद इति तदत्र न प्रसज्यते; "यजति" इत्येव पञ्चस्वपि वाक्येषु आख्यातैक्यस्य श्रवणात् एकपदश्रुत्याऽऽख्यातैक्यप्रयुक्तं भावनैक्यमेवावगम्यते, ततश्च कर्मैक्यमेव युक्तम्। न च "यजति" इति पौनःपुन्येन श्रवणात्मकोऽभ्यासः कर्मैकत्वे निरर्थकः स्यादिति अभ्यासात् कर्मभेद इति वाच्यम्; "अहो दर्शनीया" "अहो दर्शनीये"–त्यादावभ्यासस्यैकत्वसाधकत्वस्य दर्शनादभ्यासस्य कर्मभेदासाधकत्वात्। अतः अत्राख्यातैक्यप्रयुक्तंभावनैक्यं ततश्च कर्मैक्यम्। एवं पूर्वपक्षे प्राप्ते सिद्धान्त उच्यते– अभ्यासात्कर्मभेद एवात्र युक्तः। यद्यपि "अहो दर्शनीया" "अहो दर्शनीयेति" अविधिपरस्याभ्यासस्यैकत्वसाधकत्वं दृश्यते तथापि विधिपुनश्श्रवणरूपस्याभ्यासस्य विधेययागादिभेदकत्वमेवोचितम्; अन्यथा पुनश्श्रुतिरविशेषाद् गुणविधानतात्पर्यादिविशेषाभावान्निरर्थिका स्यात्। न चात्र पञ्च वाक्यानि श्रूयन्ते, प्रथमवाक्ये "समिधो यजती–"त्यत्र समिन्नामको यागो विधीयते, उपरितनवाक्येषु यजतिपदैरनूद्य तनूनपादादयो गुणा विकल्पेन

६३. तै.सं. १.१.२

६४. शतपथब्राह्मणम् १.१.२

विधीयन्त इति स्वीकाराद्विधिपरत्वमभ्यासस्यात: नानर्थक्यमत आख्यातैक्य-प्रयुक्तं कर्मैक्यमेवेति नाभ्यासात्कर्मभेद इति वाच्यम्; "तनूनपातं यजति" इत्यादिद्वितीयान्तानां तनूनपादादिशब्दानां तत्प्रख्यन्यायेन यागनामत्वमेव न तु गुणवितधिपरत्वमत: अभ्यासात् कर्मभेद एव युक्त:। तनूनपादादिशब्दानां गुणमात्रविधित्वे किमत्र विधीयत इति अर्थाद् गुण: को विधीयत वक्तव्यम्, यदि अत्र गुणशब्देन यागस्य देवतोद्दशेन द्रव्यत्यागात्मकस्य यद् रूपद्वयम् द्रव्यं देवतेति तदेव गृह्यते। अत: द्रव्यविधिरुच्यते "दध्ना जुहोती-"त्यादाविव तृतीयान्तत्वाभावात्तन्न युज्यते, यदि च देवताया विधानं वाक्येन भवतीत्युच्यते तदपि न सङ्गच्छते चतुर्थीतद्धितयोरश्रवणात्। अत: "समिधो यजती"-त्यत्र यथा यागनामत्वं तथैव उपरितनेषु चतुर्ष्वपि वाक्येषु तनूनपादादिशब्दानां यागनामत्वमेव युक्तम्। किञ्च "समिधो यजति" इत्यत्र यागनामत्वमितरत्र "तनूनपातं जुहोती-"त्यादौ गुणविधिरिति स्वीकारे "यजति" शब्दस्यैकत्र विधिरन्यत्रानुवाद इति वैरूप्यमपि स्यात्। "अग्निहोत्रं जुहोति" "दध्ना जुहोती"-त्यादौ दधिशब्दस्य गुणे द्रव्यविशेषे रूढतयाग्निहोत्रप्रकरणे पठितत्वाद्धोमानुवादेन गुणमात्रविधिरिति युक्तम्। तनूनपादादिशब्दानां द्रव्यविशेषे रूढेरभावान्मन्त्रवर्णाद्देवतानां प्राप्ते: सत्वात् तत्प्रख्यन्यायेन नामत्वमेव युक्तम्। किञ्च पञ्चस्वपि वाक्येषु समिदादीनां यागनामत्वमेव। अत उक्तवाक्यै: पञ्च प्रयाजा विधीयन्ते इति "यजति" "यजति" इति विधिपुनश्श्रवण-रूपाभ्यासात् कर्मभेद:। न च "समिधो यजति" इत्यादिवाक्येषु समिदादीनां तत्प्रख्यन्यायेन कर्मनामत्वे संज्ञयैव संज्ञाभेदनिमित्तात् कर्मभेद: स्यादिति संज्ञाधिकरणेनैव सिद्धे प्रकृतमधिकरणं निष्प्रयोजनमिति वाच्यम्; संज्ञाधिकरणे हि "अथैष ज्योति:" इत्यत्र यागावगमात् प्रागेव संज्ञात्वस्य निश्चितत्वात् संज्ञया कर्मभेद: साध्यते, प्रकृते तु यागभेदावगमात्पूर्वं समिदादीनां नामत्वं न निश्चितम्, अभ्यासात् कर्मभेदे सिद्धे एकैककर्मण एकैकं नामधेयमिति नाम्नां सार्थक्यमिति प्रतिपाद्यते। अत: अधिकरणद्वयमपि प्रयोजनवदिति युक्तम्। अस्याधिकरणस्य प्रयोजनञ्च-पूर्वपक्षे "समिधो यजति" इत्यादि पञ्च वाक्येषु कर्मैक्यस्य स्वीकारात् समिदादीनां देवताविधिपरत्वाङ्गीकारात् विकल्पात्तेषां सकृदेवानुष्ठानम्, सिद्धान्ते तु समिदादीनां नामधेयत्वाङ्गीकारात् समिदादिनामकपञ्चयागानां क्रमेणानुष्ठानमिति विवेक:।

कुतुहलवृत्तिकारास्तु बाह्वृच्ये कौषीतकब्राह्मणे हौत्रैकविधिपरे "अथ पुरस्तात् सामिधेनीनां जपति इति प्रस्तुत्य सामिधेन्यनुवाचनादिस्रुगादापनान्तमनुक्रम्य "प्रयाजान्यजति। ते वै पञ्च भवन्ति" इत्यादिश्रवणात् समिदादिवाक्यानि याज्याविधिपराण्येवेति वेदार्थज्ञानकुशला मीमांसकशिरोमणयो विदाङ्कुर्वन्तु। अधिकरणस्योदाहरणन्तु "वाजप्रसवीयं जुहोति" "राष्ट्रभृतो जुहोति" "वातनामानि जुहोति" इत्याद्युदाहार्यमिति वदन्ति। आचार्यैस्तु भाष्यवार्तिकादौ वर्णितत्वादिदमेवोदाहरणं प्रयाजविधिपरं विषयसन्देहपूर्वपक्षोत्तरपक्षैः विवेचितमिति न दोषः।।

इदानीं तृतीयाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

एवं विद्वान् पौर्णमासीममावास्यामितीरितम्।
कर्मान्यदुत पूर्वोक्तसमुदायानुवादकम्।।६।।

कर्मान्तरं स्यादभ्यासाद् ध्रौवं द्रव्यं हि देवता।
वार्त्रघ्नीत्यादितो लभ्यानुवादस्तु न युज्यते।।७।।

वार्त्रघ्नीत्याज्यभागाङ्गव्यवस्थोक्तेर्न देवता।
पौर्णेत्यनूद्यते पौर्णमासीयुक्तं त्रिकन्तथा।।८।।

अमेत्यपि समूहस्य द्वित्वसिद्धिः प्रयोजनम्।
सहस्थितिः पौर्णमास्यामित्युक्तिभ्यां त्रिके त्रिके।।९।।

विद्वद्वाक्यविधौ विध्यावृत्तिराग्नेयकादिना।
विहितस्य फलित्वेन प्राधान्यमितरे गुणाः।।१०।।

## जैमिनीयन्यायमालाप्रकाशिका

"य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजते"[६५] इति दर्शपूर्णमासप्रकरणे श्रूयते, अत्र पूर्वाधिकरणे "समिधो यजति" "तनूनपातं यजति" इत्यादौ अभ्यासात् कर्मभेद उक्तः, अत

६५. तै.सं. २.६.३.३

उक्तवाक्ययोरपि "यजते" "यजते" इति विधिपुनश्श्रवणरूपाभ्यासात् कर्मभेदो भवतु इत्याक्षेपेऽपवादसङ्गत्या इदमधिकरणं प्रवर्तते। अत्र प्रकरणे "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति"[६६] "तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्"[६७] "ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्"[६८] "ऐन्द्रं दध्यमावास्यायाम्" "ऐन्द्रं पयोऽमावास्यायाम्"[८] इति आग्नेयादयः षड्यागा विहिताः। अत्र वाक्येषु कालसंयुक्तद्रव्यदेवताविशिष्टयागविधायकत्वमस्तीति प्रथमचतुर्थे सप्तमे निर्णीतम्। अत्र अमावास्यायाम्– आग्नेयोऽष्टाकपालः, ऐन्द्रं दधि, ऐन्दं पयः इति त्रयो यागाः, पौर्णमास्याम्– आग्नेयोऽष्टाकपालः, अग्नीषोमीय एकादशकपालः, उपांशुयाजः इति त्रयो यागा विहिताः। एतेभ्यः प्रकृतेभ्यः षड्भ्य आग्नेयादियागेभ्य "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजते" इति विद्वद्वाक्यविहितस्य कर्मणोऽन्यत्वमस्ति न वेति संशयः। विद्वानिति विद्वत्-शब्दघटितत्वाद्वाक्यद्वयं विद्वद्वाक्यमित्युच्यते। विद्वद्वाक्यस्य पौर्वापर्यविवेचनेनायमर्थः दृष्टिगोचरो भवति= पूर्वं प्रजापतिः अग्निहोत्रदर्शपूर्णमासान् हविर्यज्ञान् अग्निष्टोमोक्थ्यातिरात्रसंस्थाकान् सोमयज्ञानसृजत्। सृष्ट्वा च तान् परस्परमतोलयत्। तत्र तुलनायामग्निहोत्रमग्निष्टोमसममासीत्, पूर्णमासी चोक्थ्यसमा, अमावास्या चातिरात्रसमेति निर्णीतवान्। यो हि विद्वान् एवं पौर्णमास्युक्थ्ययोः साम्यं जानन् पौर्णमासीं यजते सः अनेनैव पौर्णमासयागेन उक्थ्यानुष्ठानफलमवाप्स्यति, एवममावास्यातिरात्रयोः साम्यं जानन् यो हि अमावास्यां यजते सः अतिरात्रसमानफलभाग्भवतीति।

अत्र पूर्वपक्ष एवमुपस्थाप्यते– "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजते" इति श्रुतौ यजतिना आग्नेयादिषड्यागेभ्यः प्रकृतेभ्यः अतिरिक्तं कर्मान्तरं विधीयत इति स्वीकार्यम्। कर्मभेदे निमित्तं भवति "यजते" "यजते" इत्यभ्यासः प्रयाजभेदवत्। "सर्वस्मै वा एतद्यज्ञाय

---

६६. तै.सं. ११

६७. तै.सं. २.५.३३

६८. तै.सं. २.५.४१

गृह्यते यद्ध्रुवायामाज्यम्"[६९] इति साधारणतया कर्ममात्रं प्रति द्रव्यत्वेन श्रुतं ध्रौवमाज्यं द्रव्यम्। देवता च मन्त्रवर्णाल्लभ्यते। अतः तत्प्रख्यन्यायेन पौर्णमास्यमावास्याशब्दयोः कर्मनामत्वमभ्यासात्कर्मभेदे सिद्धे कल्प्यते। देवताप्राप्तिर्मन्त्रवर्णादित्थम्– "वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम्"[७०] इति क्रमशः वार्त्रघ्नीवृधन्वतीमन्त्रयोः पौर्णमास्यमावास्याङ्गत्वेन विधानाद् एतन्मन्त्रवर्णाभ्यामग्नीषोमदेवतायाः प्राप्तिर्भवति। वार्त्रघ्नी इति लिङ्गाद् अर्थात् सामर्थ्यात्

**अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया।**
**समिद्धश्शुक्र आहुतः॥[७१]**

**त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा।**
**त्वं भद्रो असि क्रतुः॥[७२]**

इति मन्त्रद्वयं गृह्यते।

वृधन्वती इति च लिङ्गाद्

**अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं स्वाम्।**
**कविर्विप्रेण वावृधे॥[७३]**

**सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः।**
**सुमृळीको न आविश॥[७४]** इति

मन्त्रद्वयं गृह्यते। उक्तमन्त्रयोः सामर्थ्यात् पौर्णमासदेवते अग्नीषोमौ, अमावास्यादेवते चाग्नीषोमौ इति कर्मणः रूपस्य द्रव्यस्य देवतायाश्च प्राप्तेः सत्वात् अत्र कर्मान्तरमेव विधीयत इति युक्तम्। आग्नेयादीनां

---

६९. तै. ब्राह्मणम् ३.३.५
७०. तै.सं. २.५.२.५
७१. ऋ.सं. ६.१६.३४
७२. ऋ.सं. १.९१.५
७३. ऋ.सं. ८.४४.१२
७४. ऋ.सं. ६.९१.११

प्रकृतानां यागानां विद्वद्वाक्याभ्यामनुवादो भवतीति स्वीकारे वादमात्रमनर्थकं स्यात्। "दध्ना जुहोती–" त्यादाविव होमानुवादेन गुणमात्रस्य विधानवदत्र यागानुवादेन विधेयस्य कस्यचिददर्शनात्। अतः विद्वद्वाक्यानामनुवादकत्वमात्रं न युक्तम्। किञ्च "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत" इति श्रूयते; विद्वद्वाक्यानामनुवादकत्वे आग्नेयादियागानां कालसंयुक्ततयैव विधानात् अत्र "पौर्णमास्यां पौर्णमास्या" इत्यादिना कालविधानं व्यर्थमिति वाक्यद्वयमेतन्निरर्थकं स्यात्। विद्वद्वाक्यानां कर्मान्तरविधायकत्वे तयोः कर्मणोः कालविधायकत्वेन वाक्यद्वयं प्रयोजनवद् भवति। एवञ्च आग्नेयादिप्रकृतयागेभ्योऽतिरिक्तं यागद्वयं "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजते इति विद्वद्वाक्याभ्यां विधीयत इति युक्तम्।"

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते–

उक्तविद्वद्वाक्याभ्यां प्रकृतेभ्य आग्नेयादियागेभ्योऽतिरिक्तं यागद्वयं विधीयते इति स्वीकारे तयोः यागयोः किं रूपमर्थात् किं द्रव्यम्? का च देवतेति विचारणीयम्। द्रव्यन्तु "सर्वस्मै वा" इति ध्रौवस्याज्यस्य श्रवणाज्ज्ञायते। देवतायास्तु प्राप्तिः कथमिति चिन्तनीयम्; "वार्त्रघ्नी पूर्णमासेऽनूच्येते, वृधन्वती अमावास्यायाम्" इदं वाक्यं लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वेन वार्त्रघ्नी-वृधन्वतीमन्त्राणां प्राप्तानां कालद्वारेण कर्मद्वारेण वा व्यवस्थापरमेव न तु विद्वद्वाक्यविहितकर्माङ्गताबोधनपरम्। ऋग्वेदादिविहितपदार्थेषु हौत्राध्वर्यवादि-समाख्या वेदे याज्ञिकैश्च प्रयुज्यते, साऽप्यङ्गत्वे प्रमाणमिति तृतीय-तृतीये वक्ष्यते। तत्र हौत्रे मन्त्रकाण्डे सामिधेनीरावाहननिगदानां प्रयाजमन्त्राणां च पाठानन्तरं प्रयाजयागानन्तरभाविनोराज्यभागयोः क्रमे वार्त्रघ्नीवृधन्वतीमन्त्राः पठिताः। अतः पाठक्रमानुसारेण वार्त्रघ्नीवृधन्वतीमन्त्राणामाज्यभागाङ्गत्वं ज्ञायते। आज्यभागौ च अग्निदेवत्यः सोमदेवत्यश्चेति विहितौ, अतः वार्त्रघ्नीवृधन्वतीमन्त्राणामग्निदेवताकानां सोमदेवताकानां लिङ्गादपि आज्यभागाङ्गत्वं निश्चीयते। अतः लिङ्गक्रमाभ्यामेवाज्यभागाङ्गत्वेन निश्चितानामुक्तमन्त्राणां कालभेदेन कर्मभेदेन वा व्यवस्थार्थं "वार्त्रघ्नी पूर्णमासेऽनूच्येते" "वृधन्वती अमावास्यायामि–" ति वाक्यं सङ्गच्छते।

विद्वद्वाक्यविहितनूतनकर्माङ्गत्वबोधकत्वकल्पने लिङ्गक्रमव्यतिक्रमाद् गौरवम्। किञ्च "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वान् अमावास्यां यजते" इति विद्वद्वाक्ययोः लडन्तयजतेः श्रवणाद् "य एवम्" "य एवम्" इति यच्छब्दोपबन्धाच्च विधायकत्वमेव नास्तीति विधिपरपुनश्श्रवणात्मकाभ्यासविशेषस्याभावात् पूर्वाधिकरणन्यायस्याप्रसक्तेः कर्मभेद एव न सिद्ध्यति। कर्मभेदसिद्धौ कर्मद्वयस्य रूपसम्पादकत्वेन "वार्त्रघ्नी पूर्णमासे" इति वाक्यस्य सार्थक्यम्, अस्य वाक्यस्य उक्तकर्मणोः विद्वद्वाक्यावगतयोः रूपसम्पादकत्वे निश्चिते कर्मभेदसिद्धिरित्यन्योन्याश्रयता च स्यात्। तथा च विद्वद्वाक्याभ्यां विधित्सितस्य कर्मान्तरस्य देवताप्रापकशास्त्राभावाद्रूपराहित्यादुक्तवाक्याभ्यां प्रकृतेभ्य आग्नेयादियागेभ्योऽतिरिक्तं कर्मद्वयं विधीयत इति वक्तुं न शक्यते, अतः अत्र नाभ्यासात्कर्मभेदः। एतदेवोक्तम्– "वार्त्रघ्नीत्याज्यभागाङ्गव्यवस्थोक्तेर्न देवता"[७५] इति। अत्राचार्यैः–"एवं विद्वान्" इत्यारभ्य" "अनुवादस्तु न युज्यते" इत्यन्तं श्लोकाभ्यां प्रकृतानामाग्नेयादियागानां विद्वद्वाक्याभ्यामनुवादो न युज्यते किन्तु प्रकृतेभ्य आग्नेयादियागेभ्योऽतिरिक्तस्य कर्मद्वयस्य विधायकत्वमेव विद्वद्वाक्ययोः युज्यत इति पूर्वपक्षः उक्तः। "वार्त्रघ्नीत्याज्यभागाङ्गव्यवस्थोक्तेर्न देवता" इत्यनेन "वार्त्रघ्नी पूर्णमासेऽनूच्येते" इति वाक्यस्याज्यभागयोः कर्मभेदेन कालभेदेन वा व्यवस्थापकत्वमेवातः पूर्वपक्षानुसारेण विद्वद्वाक्ययोः कर्मान्तरस्य विधायकत्वपक्षे वाक्येनानेन देवताप्रापकत्वं न युज्यते। तेन विद्वद्वाक्यविधित्सितस्य कर्मणः रूपराहित्याद्विद्वद्वाक्याभ्यां कर्मान्तरं विधीयत इति तु रिक्तं वचः इति पूर्वपक्षो निराकृतः। विद्वद्वाक्ययोः किं प्रयोजनमिति तु "पौर्णे त्यनूद्यते पौर्णमासीयुक्तं त्रिकन्तथा" इत्यारभ्य "त्रिके त्रिके" इत्यन्तं श्लोकावयवैरुच्यते। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यधिकारविधौ "दर्शपूर्णमासाभ्याम्" इति द्विवचनं श्रूयते। प्रकरणे आग्नेयादयः सन्ति षड्यागाः, तेषु त्रिकद्वयस्य समुदायस्य सम्पादनार्थं "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजते" इति विद्वद्वाक्यं प्रकृतेष्वाग्नेयादिषु षट्सु त्रिकरूपौ द्वौ समुदायावनुवदति। "यदाग्नेयोऽष्टाकपाल" इत्यादिवाक्येषु

७५. जै.न्यायमाला २.३.८

कालसंयुक्ता एव षड्यागाः विहिताः। विद्वद्वाक्ये कालवाचकपौर्णमास्यमावास्याशब्दाभ्यां तत्कालविहितयोर्यागत्रिकयोरुपस्थितिर्भवति। तेन पौर्णमासीशब्देन यागत्रयम्, अमावास्याशब्देन यागत्रयम् इति विद्वद्वाक्याभ्यां त्रिकद्वयस्योपस्थितौ "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यधिकारविधिना त्रिकद्वयात्मकदर्शपूर्णमासयागस्य फलसम्बन्धो बोध्यत इति विद्वद्वाक्याभ्यां प्रकृताग्नेयादियागानामनुवादस्य प्रयोजनवत्वात् विद्वद्वाक्ययोरनुवादकत्वेनैव प्रामाण्यमिति युक्तम्।

"पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत" इति वाक्याभ्यां हि आग्नेयोपांशुयाजाग्नीषोमीयाणां पौर्णमासीकालविहितानाम्, आग्नेयैन्द्रद्वययागानाममावास्याकालविहितानाञ्च क्रमशः पौर्णमास्याममावास्यायाञ्च सहप्रयोगो विधीयते। "पौर्णमास्यां पौर्णमास्या" "अमावास्यायाममावास्यये" ति वाक्ययोरतः समुदितयागत्रयप्रयोगविधिपरत्वेन सार्थक्यम्, अन्यथा एतद्वाक्यद्वयस्याभावे आग्नेयादीनामुत्पत्तिवाक्येषु प्रत्येकं कालयोगात्प्रत्येकमेव पूर्वोत्तराङ्गसहितैकप्रधानप्रयोगाः स्युः। तथाच विद्वद्वाक्यस्य कर्मान्तरविधायकत्वाभावे "पौर्णमास्याम्" "अमावास्यायाम्" इति वाक्यद्वयस्यापि न वैय्यर्थ्यम्। एतदेवोक्तम्– "सहस्थितिः पौर्णमास्यामित्युक्तिभ्यां त्रिके त्रिके" इति। ननु प्रकृतानामाग्नेयादियागानामनुवादकत्वं विद्वद्वाक्ययोः सिद्धान्ते स्वीकृतम्, तत्र विद्वद्वाक्ययोरेव विधायकत्वमस्तु आग्नेयादिवाक्यानां "यदाग्नेय" इत्यादीनामेव यागानुवादेन गुणमात्रविधायकत्वमस्तु इति किमर्थं न स्वीक्रियते, विनिगमने प्रमाणाभावादिति चेदुच्यते– आग्नेयादीनां यागानां बोधकानां "यदाग्नेय" इत्यादिवाक्यानां यागानुवादेन गुणमात्रविधायकत्वे एकेन वाक्येन द्रव्यस्य, देवातायाः कालस्य चेति अनेकगुणानां विधानासम्भवाद् प्रतिगुणं वाक्यावृत्तौ वाक्यभेदः प्रसज्यते। "यदाग्नेय" इत्यादीनान्तु यागविधायकत्वे त्वनेकगुणविशिष्टयागविधानसम्भवान्न वाक्यभेदप्रसक्तिः।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः॥

इत्युक्तेः। विद्वद्वाक्ये च त्रिकद्वयसमुदायसिद्ध्यर्थं प्रकृतानामाग्नेयादि-षड्यागानामनुवादके इति युक्तम्। एतदेवोच्यते–"विद्वद्वाक्यविधौ विध्यावृत्तिराग्नेयकादिना" इति।

विद्वद्वाक्यानामनुवादकत्वसमर्थनस्य प्रयोजनमुच्यते– "विहितस्य फलित्वेन प्राधान्यमितरे गुणाः" इति। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति दर्शपूर्णमासप्रकरणे–"यदाग्नेयोऽष्टाकपालोऽमावास्यायाम्" इति कालसंयुक्ताः केचन विधयः एवं "समिधो यजति" "तनूनपातं यजति" "आघारमाघारयति" इति च केचन कालयोगरहिताः विधयश्च श्रुताः। आग्नेयादिषड्यागानां कालसंयुक्ततया विहितानां विद्वद्वाक्याभ्यां त्रिकद्वयसमुदायरूपेणानुवादो बोध्यते, "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यधिकारविधिना तेषामेव फलसम्बन्धो बोध्यते। समिदादीनान्तु "समिधो यजति" इत्यादिवाक्यविहितानां यागानां फलसम्बन्धो न बोध्यते। एवञ्च "फलवत्सन्निधावफलं तदङ्गम्" इति न्यायेन आग्नेयादिषड्यागानां प्राधान्यम्, समिदादियागानाञ्चाङ्गत्वमिति अङ्गप्रधानविवेकः सिद्ध्यति। तेन च विकृतिषु प्रयाजादीनामतिदेशश्च फलितो भवति।

पूर्वपक्षे तु विद्वद्वाक्ययोः कर्मान्तरविधायकत्वात् सर्वेषामाग्नेयादीनां प्रयाजादीनाञ्च फलसम्बन्धस्य अधिकारविधिना बोधितत्वात् सर्वेषां समप्रधानत्वात् गुणप्रधानभावो न सिद्ध्यति, तेन च विकृतिषु प्रयाजादीनामपि अतिदेशो न सिद्ध्यति।

इदानीं चतुर्थमधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**उपांशुयाजमित्येषोऽनुवादोऽत्राथवा विधिः।**
**विष्णवादिवाक्ये विस्पष्टविधेरस्यानुवादता॥११॥**

**जामित्वोक्तेरन्तराल उपांशुगुणके विधौ।**
**सत्यर्थवादो विष्णवादिस्तद्रूपं ध्रौवमन्त्रतः॥१२॥**

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे "य एवं विद्वान् पौर्णमासीं यजते" इत्येवं विद्वद्वाक्यस्य यजत इति लङन्तस्याख्यातस्य यागशरीरघटकीभूतयोः द्रव्यदेवतयोरश्रवणात् कर्मविधायकत्वं नास्ति, आग्नेयादीनामनुवादकत्वमेवेति स्वीक्रियते इति निर्णीतम्। सम्प्रति अपवादसङ्गत्या "उपांशुयाजमन्तरा यजति" इति लङन्ताख्यातघटितवाक्यं विविच्यते।

दर्शपूर्णमासप्रकरणे श्रूयते–"जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशु याजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्योऽजामित्वाय" इति।[७६] अत्र संशयः–"उपांशुयाजमन्तरा यजति" इदं वाक्यमनुवादकमुत विधायकमिति।

पूर्वपक्ष एवमुपस्थाप्यते–अत्र "विष्णुरुपांशु यष्टव्यः", "प्रजापतिरुपांशु यष्टव्यः" "अग्नीषोमावुपांशु यष्टव्य" इति वाक्यत्रये स्पष्टं विधिः श्रूयते, विष्ण्वादिदेवताश्च श्रूयन्ते, "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्" इति च ध्रौवमाज्यं साधारणं द्रव्यमपि स्थितमेव। अतः एभिर्वाक्यैः यागत्रयं विधीयते। "उपांशुयाजमन्तरा यजति" इति वाक्यञ्च प्राप्तयागत्रयस्यानुवादकम्। अनुवादस्य प्रयोजनञ्च त्रयाणामप्येषां विष्ण्वादिदेवताकानां यागानामन्तराल-कालविधिः। अन्तरालकालश्च आग्नेयाग्नीषोमीययोरन्तरालकालः। तेन च "तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्" इति वाक्येन कालसम्बन्धबोधो भवति। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजत" इत्यधिकार-विधिना च फलसम्बन्धः सिद्ध्यति। अन्यथा "तावब्रूताम्" इति वाक्येन अग्नीषोमीययागस्यैव कालसम्बन्धावगमात्तस्यैव फलसम्बन्धः सिद्ध्येत्। एवञ्च "विष्णुरुपांशु यष्टव्यः" इति त्रिभिर्वाक्यैरेव यागाः विधीयन्ते, तेषामनुवादकं विषयवाक्यमिदम् "उपांशुयाजमन्तरा यजती"– ति युक्तम्। एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते–

"जामि वा एतद्यज्ञस्य क्रियते" इत्यारभ्य "अग्नीषोमावुपांशु यष्टव्योऽजामित्वाय" इत्यन्तमुपक्रमोपसंहारयोरेकविषयत्वेनैकवाक्यत्वं प्रतीयते।

७६. तै.सं. २.६.६

अस्य वाक्यसन्दर्भस्यायमर्थः—यद् अन्वञ्चौ अर्थादव्यवहितौ पुरोडाशसाध्यौ आग्नेयाग्नीषोमीययागौ क्रियेते तद् जामि अर्थादालस्यजनकम् एकरूपत्वात्। अतः अन्तरा अर्थात्तयोरन्तरालकाले उपांशुयांजं यजति इति। अत्रोपक्रमे जामितादोषकीर्तनपुरस्सरं किञ्चित् कर्म विधीयत इति निश्चिते तदनुसारेणान्तरालवाक्यस्यैवोपांशुगुणकयागविधायकत्वं युक्तम्। विष्ण्वादिवाक्यानाञ्च तत्प्रशंसार्थमर्थवादत्वंमेव। एवञ्च जामित्वोपक्रमादजामित्वोपसंहाराच्च अवगतमेकवाक्यत्वमनुगृहीतं भवति। पुनः पुनरजामित्वसङ्कीर्तनन्तु प्रशंसातिशयार्थमेव। विष्ण्वादिवाक्यैः यागत्रयं विधीयत इत्यङ्गीकारे एकवाक्यताया भङ्गः स्यात्। न ह्येकस्मिन्वाक्ये विधेयबाहुल्यं सम्भवति। एवञ्च उपक्रमाधिकरणन्यायेन एकवाक्यतास्थले उपक्रमोपसंहारयोः उपक्रमस्य बलीयस्त्वात् जामितादोषसङ्कीर्तनानुगुण्येन "उपांशुयाजमन्तरा यजति" इति वाक्येनाग्नेयाग्नीषोमीययोरन्तरालकाल उपांशुगुणविशिष्टयागो विधीयत इति युक्तम्। यजतीत्यस्य "औदुम्बरो यूपो भवती" त्यादिवत् पञ्चमलकारपरत्वेन विधित्वमुपपद्यते। "सर्वस्मै वा" वाक्येन विहितं साधारणं ध्रौवमाज्यं द्रव्यमस्य यागस्य, नानाशाखासु उपांशुयाजक्रमे पठितैर्वैष्णवप्राजापत्याग्नीषोमीयमन्त्रैर्विकल्पेन देवतात्रयस्य देवतात्वेन प्राप्तिरिति यागस्य रूपमुपपद्यते।

प्रयोजनञ्च पूर्वपक्षे "विष्णुरुपांशु यष्टव्य" इत्येवं विधित्रयस्य स्वीकाराद् वैष्णवादियागास्त्रयोऽपि समुच्चयेनानुष्ठेयाः, सिद्धान्ते तु विकल्पेन विष्ण्वादिदेवताक एक एव यागोऽनुष्ठेय इति विवेकः। इदानीं पञ्चममधिकरणं निरूप्यते—

### जैमिनीयन्यायमाला

अग्निहोत्राघारवाक्यमनुवादोऽथवा विधिः।
अरूपत्वात्तु दध्यूर्ध्ववाक्येनोक्तमनूद्यते॥१३॥

गुण्यसिद्धौ न दध्यादिर्गुणो दुष्टा विशिष्टता।
रूपं दध्यादिमन्त्राभ्यामतोऽसौ गुणिनो विधिः॥१४॥

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे हि "विष्णुरुपांशु यष्टव्य" इत्यादिषु विष्ण्वादिवाक्येषु मन्त्रवर्णेभ्यः विष्ण्वादिदेवतानां प्राप्तेः विधायकत्वासम्भवात्, उपक्रमोपसंहाराभ्यामेकवाक्यतया विहितस्य उपांशुयाजयागस्य स्तावकत्वेन प्रामाण्यं स्वीकृतम्, "दध्ना जुहोति" "पयसा जुहोति" इत्यादि वाक्येषु तु दध्यादिद्रव्याणां प्रमाणान्तरेण प्राप्तेरभावात् दध्यादिविशिष्टकर्मविधेः सम्भवाद् "अग्निहोत्रं जुहोति" इति अग्निहोत्रवाक्यमनुवादकमेवेति प्रत्युदाहरणसङ्गत्या पूर्वपक्षे प्राप्ते तन्निर्णयायाधिकरणमिदं प्रवर्तते।

अत्र विषयवाक्यद्वयं चिन्त्यते– अग्निहोत्रप्रकरणस्थमेकं "अग्निहोत्रं जुहोतीति"[७७] वाक्यम्। दर्शपूर्णमासप्रकरणस्थञ्च "आघारमाघारयति"[७८] वाक्यम्। "अग्निहोत्रं जुहोति" इति श्रूयते, एवमस्मिन्नेव प्रकरणे "दध्ना जुहोति" "पयसा जुहोति" इति च श्रूयते, अत्र दध्ना जुहोतीत्यादीनि वाक्यानि विधायकानि, "अग्निहोत्रं जुहोति" इति वाक्यन्तु दध्यादिवाक्यप्राप्तकर्मसमूहस्यानुवादकमुत "अग्निहोत्रं जुहोती"–ति वाक्यं विधायकमिति संशयः।

एवं दर्शपूर्णमासप्रकरणे "आघारमाघारयति" इति श्रूयते, "ऊर्ध्वमाघारयति" "ऋजु आघारयति" इति च श्रूयते। अत्रापि ऊर्ध्वादिवाक्यानि विधायकानि आघारवाक्यञ्चानुवादकमुत आघारवाक्यं विधायकमिति संशयः।

पूर्वपक्ष एवमुत्थाप्यते– अग्निहोत्रवाक्ये आघारवाक्ये च द्रव्यं देवता वा किमपि न श्रूयते, अतः अनयोः विधायकत्वे विहितस्य कर्मणः रूपं न सिद्ध्येत्, रूपार्थमर्थाद् द्रव्यार्थं देवतार्थञ्च वाक्यान्तरमाश्रयणीयं भवति। दध्यादिवाक्यानां "दध्ना जुहोति" इत्यादीनां विधायकत्वे दध्यादिद्रव्यं लभ्यते एव, अतः विहितकर्मणां रूपं सिद्ध्यतीति लाघवाद् दध्यादिवाक्यं विधायकमग्निहोत्रवाक्यञ्चानुवादकम्। अनुवादस्य दध्यादिवाक्यावगतकर्मणां

७७. तै.सं. १.५.९.१

७८. तै.ब्रा. ३.३.७

समुदायसिद्धिः प्रयोजनम्। तेन च "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यग्निहोत्रवाक्ये सर्वेषामेवाग्निहोत्रसंज्ञकत्वेन फलसम्बन्धसिद्धिः। समुदायानुवादबलेनैकप्रयोगपरिग्रहावगतेस्सकृदनुष्ठानेनाग्न्यादिहोमाङ्गभूतदेवतायाः प्रसङ्गेन दध्यावदिहोमोपकारकत्वोपपत्तेश्च दध्यादिवाक्येषु देवताया अश्रवणेऽपि न दोषः। एवमाघारवाक्यमप्यनुवादकमूर्ध्वादिवाक्यानि विधायकानि इति पूर्वपक्षे प्राप्ते समाधिरभिधीयते–

दध्यादिवाक्यानामूर्ध्वादिवाक्यानाञ्च विधायकत्वम् अग्निहोत्रवाक्यस्याघारवाक्यस्य चानुवादकत्वमिति स्वीक्रियते चेत् दध्यादिवाक्यैरूर्ध्वादिवाक्यैश्च किं विधीयत इति विचारणीयम्। यदि दध्यादिगुणमात्रं विधीयते चेत्तन्न युक्तम्; गुणिनः कर्मणः असिद्धौ गुणस्य कुत्र विधानमिति निरूपयितुमशक्यत्वात्। गुणविशिष्टकर्माणि विधीयन्ते इति स्वीकारे बहूनां विशिष्टविधीनां स्वीकारप्रसङ्गाद् गौरवम्। अग्निहोत्रवाक्यस्य तु विधायकत्वपक्षे दध्यादिवाक्यानामग्निहोत्रवाक्यप्राप्तहोमानुवादेन गुणमात्रविधायकत्वेन सार्थक्यमिति न क्वापि विशिष्टविधिकल्पनागौरवम्। अग्निहोत्रवाक्यविहितकर्मणः दध्यादिवाक्यैः द्रव्यप्राप्तिः, मन्त्रवर्णाद्देवताप्राप्तिश्चेति कर्मणः रूपञ्च सिद्ध्यति। एवञ्च दध्यादिवाक्येषु बहूनां विशिष्टविधीनां कल्पनापेक्षया एकस्मिन् वाक्ये "अग्निहोत्रं जुहोतीत्यत्र कर्मविशेषस्य विधायकत्वस्वीकारे लाघवम्। तेन च तस्य रूपसिद्ध्यर्थं वाक्यान्तरस्याश्रयणेऽपि न क्षतिः। वाक्यान्तरेण द्रव्यदेवतयोः प्राप्तिमाश्रित्य प्रथमे चतुर्थे तत्प्रख्यन्यायेनाग्निहोत्रशब्दस्य कर्मनामत्वमुक्तम्।" सोमेन यजेत "इत्यत्र तु वाक्यान्तरेण कर्मणोऽप्राप्तेरगत्या गौरवमप्यङ्गीकृत्य विशिष्टविधानमभ्युपगतमित्यन्यदेतत्। एवञ्च "अग्निहोत्रं जुहोति" "आघारमाघारयति" इति वाक्ये कर्मोत्पत्तिवाक्ये, दध्यादिवाक्यान्यूर्ध्वादिवाक्यानि च गुणमात्रविधायकानीति सिद्धम्।

प्रयोजनञ्च पूर्वपक्षे दध्यादिवाक्यानामुत्पत्तिविधित्वेन स्वीकारात् तेषां सर्वेषां कर्मणां समुच्चयेनानुष्ठानम्, सिद्धान्ते तु अग्निहोत्रवाक्यस्यैव कर्मोत्पत्तिवाक्यत्वस्वीकारादेकस्मिन्नेव कर्मणि दध्यादीनां विकल्पितत्वान्न समुच्चयः इति भेदः।

आघारवाक्येऽपि पूर्वपक्षेऽनुवादत्वस्वीकारादूर्ध्वादिवाक्यानामेवोर्ध्वत्वादिगुणविधायकत्वाच्च यस्य भ्रंशः तद्गुणकस्य कर्मणः पुनरनुष्ठानम्, सिद्धान्ते तु ऊर्ध्वादिवाक्यानां गुणमात्रविधायकत्वात् कर्मविधायकत्वाभावात् कर्मभेदस्याप्रसक्तेः आघारकर्मणः गुणभूतत्वात् गुणानुरोधेन प्रधानावृत्त्ययोगाद् गुणलोपनिमित्तं प्रायश्चित्तमात्रमनुष्ठेयम् इति विवेकः। अत्राघाराख्यं कर्म इत्युक्तौ यागोत्तरक्षारणरूपी होमो गृह्यते। तैत्तिरीयशाखानुसारेण नैर्ऋतीं दिशमारभ्य ऐशानीं दिशमवधिं कृत्वा सन्तत्या घृतं यत् क्षार्यते तदेवाघारपदेनोच्यते। वाजसनेयिशाखानुसारेण प्रयाजार्थं जुह्वां गृहीतमाज्यं पश्चिमतो यावत् प्राचीं दिशम् ऋजुमविच्छिन्नं वारद्वयमग्नौ यत् क्षारणन्तदेवाघारपदेनोच्यते। "चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्ये"–त्यनेन द्रव्यस्य "इन्द्र ऊर्ध्वोऽध्वरो दिवि स्पृश मह्रुतो यज्ञो यज्ञपतेरिन्द्रावान् स्वाहेत्याघारमाघारयती" त्यनेन विनियुक्तमान्त्रवर्णिकदेवतायाश्च प्राप्तिरिति आघारमाघारयतीति वाक्यस्य आघारकर्मविधायकत्वं युक्तम्।

इदानीं षष्ठाधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

**यजत्यालभतीत्येतावनुवादौ विधी उत।**
**गृह्णात्यवद्यतीत्याभ्यां विहितेऽर्थेऽनुवादिनौ॥१५॥**

**नानुवादोऽपुरोवादे यज्यालभ्योरतो विधिः।**
**ग्रहणे सोमसंस्कारोऽवदाने पशुसंस्क्रिया॥१६॥**

### जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे "अग्निहोत्रं जुहोती–" त्यत्रोत्पत्तिविधित्वम्, "दध्ना जुहोती–" त्यादीनां दध्यादीनां द्रव्यविशेषे रूढतया गुणमात्रं विधीयत इति स्वीकृतम्, "सोमेन यजेत" इत्यस्य तु "ऐन्द्रावयवं गृह्णाति" इत्यादि ग्रहणवाक्यैरुत्पन्नानां यागानामनुवादकत्वे बाधकाभावात् "सोम" शब्दस्य च लताविशेषे रूढतया विशिष्टविधौ गौरवाच्चानुवादकत्वमेव युक्तमिति प्रत्युदाहरणसङ्गत्या पूर्वपक्ष उत्थाप्यत इति पूर्वाधिकरणेन सह प्रत्युदाहरणसङ्गतिः। "सोमेन यजेत" एवम् "अग्नीषोमीयं पशुमालभेत"

इति सोमयागविधायकम्, पशुयागविधायकञ्च वाक्यद्वयमस्मिन्नधिकरणे चिन्त्यते।

अत्र संशयः– "सोमेन यजेत" इदं वाक्यं "ऐन्द्रवायवं गृह्णाति" "मैत्रावरुणं गृह्णाति" इत्यादिवाक्यैर्द्रव्यदेवतासम्बन्धानुमितयागानामनुवादकमुत यागविधायकम्, एवम् "अग्नीषोमीयं पशुमालभेत" इति श्रुतं वाक्यम् हृदयस्याग्रेऽवद्यत्यथ जिह्वायाः "इत्यादिवाक्ये विहितानां द्रव्यविशिष्ट-यागानामनुवादकमुत विधायकमिति।"

अत्र पूर्वपक्ष एवमुपस्थाप्यते–"एन्द्रावयवं गृह्णाति" "मैत्रावरुणं गृह्णाति" इत्यादिवाक्येषु प्रकृतिप्रत्ययाभ्यां द्रव्यदेवतयोः प्राप्तिरस्तीति यागमन्तरेण तयोः सम्बन्धानुपपत्त्या गृह्णातिपदं यागविधायकमित्येव स्वीकार्यम्। तत्र इन्द्रवाय्वादिप्रातिपदिकैर्देवतानां प्राप्तिः, तद्धितेन "अण्व्या धारया गृह्णाति" इति प्रकृतस्य धारासमर्थस्य द्रवद्रव्यस्य प्राप्तिः। ग्रहणमात्रस्य विधाने देवतान्वयानुपपत्तेः यागविधानमुक्तवाक्येषु अस्तीति सिद्धे "सोमेन यजेत" इत्यत्र पुनः यागविधिर्न सम्भवतीति यागसमुदायानामनुवादकत्वमाश्रयणीयम्। अनुवादस्य प्रयोजनञ्च सोमद्रव्यकयागमात्रानुवादात् अस्तुतशस्त्राणामपि फलसम्बन्धः, अन्यथा समुदायानुवादाभावे "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यधिकारविधौ ज्योतीरूपस्तोमसम्बन्धात् ज्योतिष्टोमत्वोपपत्तेः सस्तुतशस्त्राणामेव यागानां फलसम्बन्धापत्तिः। "सोमेन यजेत" इत्यस्य यागसमुदायानुवादकत्वे तु "सोममभिषुणोति" इत्यादिसंस्कारविध्यन्यथानुपपत्त्यैव सोमद्रव्यस्य प्राप्तेः सोमपदं सोमद्रव्यकयागमात्रस्य सोमसम्बन्धान्नामधेयम्, ज्योतिष्टोमपदञ्च गौणमिति, पञ्चविधयज्ञेषु "अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः" इति सोमशब्दस्य परिगणितत्वाज्ज्योतिष्टोमनाम्नः सत्वेऽपि नामान्तरस्य स्वीकारे बाधकाभावाच्च सोमद्रव्यकयागमात्रस्य फलसम्बन्धात् सस्तुतशस्त्राणामिवास्तुत-शस्त्राणामपि फलसम्बन्धः सिद्ध्यति। अथवा "सोमने यजेत" इत्यत्र ग्रहणवाक्यविहितान् यागान् उद्दिश्य "अण्व्या धारया गृह्णाति" इति प्राप्तस्य धारासमर्थद्रवद्रव्यस्य प्रकृतित्वेन सोमलताख्यो गुणो विधीयते। सर्वथापि यजिसमुदायानुवाद एव "सोमेन यजेत" इति वाक्येन बोध्यते। एवं

"हृदयस्याग्रेऽवद्यति"[७९]इत्याद्यवदानवाक्येषु द्रव्यविशिष्टा यागा विधीयन्ते, तान् यागाननूद्य "अग्नीषोमीयं पशुमालभेत"[८०] इत्यनेनाग्नीषोमरूपा देवता विधीयते, तथाचाग्नीषोमीयवाक्यमवदानविधिविहितानां यागानामनुवादकमेवेति पूर्वपक्षः। अनेनेदमपास्तम्– सोमवाक्ये द्रव्यस्य प्राप्तेः द्रव्यविशिष्टकर्मविधानं भवतु ग्रहणवाक्यानि च ग्रहणसंस्कारविधायकानि भवन्तु एवम् अग्नीषोमीय-वाक्यं द्रव्यदेवताविशिष्टयागविधायकमस्तु हृदयादिवाक्यानि च संस्कारविधायकानि भवन्तु विनिगमने प्रमाणाभावादिति। उत्पत्तिशिष्टोत्पन्नि-शिष्टयोरुत्पत्तिशिष्टस्य प्राबल्यादुत्पत्तिशिष्टगुणावरोधाद् ग्रहणवाक्यैः हृदयादिवाक्यैश्च संस्कारविधानस्यासम्भवात्।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–

सर्वत्र पुरोवादे सति हि अनुवादो भवति, यथा पूर्वाधिकरणे "अग्निहोत्रं जुहोती" ति प्रकृत्य "दध्ना जुहोती"–त्यादि श्रुतमतः होमस्य जुहोतिना पूर्ववाक्येन प्राप्तत्वात् "दध्ना जुहोती"– त्यादौ होमस्यानुवादत्वं स्वीकृतम्। अत्र तु "सोमेन यजते" इति प्रकृत्य "ऐन्द्रवायवं गृह्णाति" इत्यादि श्रूयते एवं "यो दीक्षितो यदग्नीसोमीयं पशुमालभते" इति प्रकृत्य "हृदयस्याग्रेऽवद्यति" इत्यादि श्रूयते, अतः "सोमेन" इति वाक्येन यागो विधीयते, "ऐन्द्रवायवम्" इत्यादिवाक्यैश्च ग्रहणं बोध्यते, ग्रहणमन्यद् यागोऽन्यः एवमग्नीषोमीयवाक्येनालम्भः प्रतीयते, हृदयादिवाक्यैश्चावदानं बोध्यते, आलम्भोऽन्यः अवदानमन्यत्। तथाच सोमवाक्यस्याग्नीषोमीयवाक्यस्य च यागस्यालम्भस्य च बोधकत्वात् तयोश्च ग्रहणवाक्यैरवदानवाक्यैश्च प्राप्तिर्नास्तीति पुरोवादाभावान्नानुवादकत्वमिति यागालम्भयोः विधायकत्वमेवा-श्रयणीयम्। एवञ्च सोमाग्नीषोमीयवाक्ययोः विधायकत्वे सिद्धे सोमवाक्येन यागस्याप्राप्तत्वाद् "दध्ना जुहोती"तिवद् गुणमात्रविधानं न सम्भवतीति मत्वर्थलक्षणामगत्याश्रित्य "सोमवता यागेन भावयेद्" इति गुणविशिष्टो यागो विधीयते, एवमग्नीषोमीयवाक्येन द्रव्यदेवताविशिष्टयागो विधीयते ग्रहणवाक्यैर्देवताविशिष्टः सोमसंस्कारः अवदानवाक्यैश्च पशुसंस्कारश्च

७९. तै.सं. ६.३.१०

८०. तै.सं. ६.१.११.६

विधीयते। किञ्च ऐन्द्रवायवादिवाक्यानां विशिष्टकर्मविधायकत्वे बहूनां विशिष्टविधीनां स्वीकारप्रसङ्गः। सोमवाक्यस्य विशिष्टविधित्वे एकस्यैव विशिष्टविधेः स्वीकाराल्लाघवञ्च। एवं हृदयादिवाक्यानामपि बहुत्वाद् बहुविशिष्टविधिकल्पनापेक्षयाग्नीषोमीवाक्यस्यैव विशिष्टविधित्वेऽपि लाघवम्। एवञ्चोत्पत्तिशिष्टगुणावरोधोऽपि न भवति; यतः "सोमेन यजेत" इत्यनेन सोमस्य साधनत्वमवगम्यते, तच्च साक्षान्न भवति किन्तु प्रणाड्यैव, "अभिसुतस्य सोमस्य धारां करोति" "अण्व्या धारया गृह्णाति" इत्येवं सोमस्याभिषवादिसंस्काराः विहिताः। तत्र दशधाराग्रहाणां सत्वात् तेषां तत्तद्देवतायै पृथक्पृथग्ग्रहणं कर्तव्यं भवति। तानि ऐन्द्रवायवादिवाक्यैर्विधीयन्तै। एवम् अग्नीषोमीयवाक्येन पशुः यागसाधनत्वेन विधीयते, तच्च साधनत्वं हृदयादिप्रकृतित्वेनेति, तदर्थमपेक्षितावदानसंस्कारः हृदयादिवाक्यैर्विधीयत इति नोत्पत्तिशिष्टगुणविरोधः। एवञ्च सोमाग्नीषोमीयवाक्याभ्यामेव कर्मविधानमिति अनयोः वाक्ययोर्गुणमात्रविधायकत्वमस्त्विति पूर्वपक्षोऽपि समाहितः।

प्रयोजनञ्च पूर्वपक्षे "ऐन्द्रवायवं गृह्णाती-" त्यादिग्रहणवाक्यानां द्रव्यदेवताविशिष्टकर्मविधायकत्वस्वीकारात् सोमवाक्यस्यानुवादकत्वात् स्वार्थतया विनियुक्तदेवताकत्वाभावलक्षणाव्यक्तत्वाभावेन "अव्यक्तासु तु सोमस्य" इति न्यायस्याप्रवृत्तेः "उद्भिदा यजेत पशुकामः" "विश्वजिता यजेत" इत्यादिष्वेकाहेषु द्वादशाहे च अस्य सौमिकस्य अङ्गानामतिदेशो न भवत्यपि तु उपांशुयाजीयाङ्गानामेवातिदेशः। सिद्धान्ते "सोमेन यजेत" इत्यस्यैव कर्मविधायकत्वात्, अत्र च वाक्ये देवतायाः अश्रवणात्, तद्धितचतुर्थी-मन्त्रवर्णैः यागार्थतया देवताया विनियुक्तत्वाभावाद् ऐन्द्रवायवादिवाक्यैर्ग्रहणे या देवता विहिता तस्या एव पश्चादार्थिको यागसम्बन्धो ज्ञायत इति स्वार्थतया विनियुक्तदेवताविरहलक्षणाव्यक्तत्वस्य सत्वात् "अव्यक्तासु तु सोमस्य"[८१] इति न्यायस्य प्रवृत्तेः उद्भिदादियागेषु एकाहेषु द्वादशाहे चास्य सोमयागस्याङ्गानामतिदेशः सिद्ध्यति। एवं हृदयादिवाक्यैरेव यागविधेः स्वीकारात् पूर्वपक्षे यागभेदाद् विकृतिष्वेकस्यैव यागस्येतिकर्तव्यताप्राप्तेः हृदयादिष्वेकेन यागः, सिद्धांन्ते त्वग्नीषोमीयवाक्य एव विशिष्टयागविधेः स्वीकाराद्विकृतिषु

---

८१. मी.द ८.१.९

हृदयादिभिः सर्वैरेव याग इति भेदः।

इदानीं सप्तममधिकरणं निरूप्यते—

## जैमिनीयन्यायमाला

आहुतीस्तिस्र इत्यत्र कर्मैक्यमुत भिन्नता।
एकत्वं सकृदाख्यातात् सङ्ख्यावृत्त्या प्रयाजवत्॥१७॥

आख्यातमात्रं नो मानं सङ्ख्यया बहुकर्मता।
आवृत्त्यैकादशत्वन्तु प्रयाजे गत्यभावतः॥१८॥

पशून्सप्तदश प्राजापत्यानित्यत्र भाष्यकृत्।
विचारमाह पूर्वत्र क्रियात्रित्वस्फुटत्वतः॥१९॥

बहुत्वोपेतपशुभिर्देवयोगादभिन्नता।
रूपस्य तेन कर्मैक्यं सङ्ख्या नात्र क्रियागता॥२०॥

देवतासङ्गतस्यैव तद्धितार्थस्य पश्चिमः।
बहुत्वसङ्गमो रूपसङ्ख्यया तत्क्रियाभिदा॥२१॥

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वं शब्दान्तराभ्यासाभ्यां कर्मभेदः साधितः। तदनु अभ्यासापवादतदपवादचर्चाः प्रवृत्ताः। इदानीं सङ्ख्याया अपि कर्मभेदनिमित्तत्वं चिन्त्यत इति शास्त्राध्यायपादसङ्गतयः। पूर्वाधिकरणे "सोमेन यजेत" इत्यस्यैव यागविधायकत्वं ग्रहणवाक्यानां संस्कारमात्रबोधकत्वमिति निर्णीतमतः अभ्यासाभावात् "तिस्र आहुतीर्जुहोति" इत्यत्रापि सोमवाक्ये यागैकत्ववत् कर्मैकत्वं स्यादिति पूर्वपक्षोत्थानात् प्रत्युदाहरणसङ्गतिः।

आदौ वृत्तिकारमतेन भाष्य उक्तं विषयवाक्यमाचार्यैर्विचार्यते—"वैश्वदेवीं साङ्ग्रहणीं निर्वपेद् ग्रामकामः"[८२] इतिवाक्यविहितसाङ्ग्रहणीष्टिसन्निधौ श्रूयते "तिस्र आहुतीर्जुहोति" इति। अत्र संशयः "जुहोति" इत्यनेन पञ्चमलकाराश्रयणेन विधीयते कर्मैक्यमुत कर्मभेद इति।

८२. तै.सं. २.३.९

पूर्वपक्ष एवमुपस्थाप्यते–"तिस्र आहुतीर्जुहोती" ति श्रुते वाक्ये जुहोतीत्येकैव होमभावना विधीयते, शब्दान्तराभावात् "समिधो यजति" "इडो यजति" इतिवदभ्यासाभावाच्चैकमेव कर्म विधीयते। "एकादश प्रयाजान् यजति"[८३] "विराट्सम्पन्नमग्निहोत्रं जुहोती" त्यादौ यथा सङ्ख्याया: भावनाभेदकत्वं धात्वर्थभेदकत्वं नाश्रीयते किन्तु प्राप्तानामेव कर्मणामावृत्त्या सङ्ख्याधिक्यं सम्पाद्यते। तत्र प्रयाजविषये प्रकृतौ प्रयाजानां पञ्चसङ्ख्याकत्वेन ज्ञातत्वात् तदविरोधाय पशुयागे श्रुतं प्रयाजैकादशत्वमभ्यासेन सम्पाद्यमिति निर्णीतम्, तद्वदत्रापि "जुहोतीति" प्रथमावगतहोमभावनाया ऐक्यात्तदविरोधाय "तिस्र:" इति पदान्तरावगता त्रित्वसङ्ख्या अभ्यासेनैव सम्पाद्या। "समिधो यजति" "इडो यजति" इत्यभ्यासस्थले आख्यातस्य पुन:श्रुत्या कर्मभेदे सत्यपि सङ्ख्यास्थले तदभावान्न कर्मभेद:, सकृच्छ्रुतस्याख्यातस्य अनेकत्र व्यापारायोगात्। एवञ्च सङ्ख्याया: कर्मभेदनिमित्तत्वाभावात् "सोमेन यजेत" "दाक्षिणानि जुहोति" इतिवत् शब्दान्तराभावात् "समिधो यजति" "इडो यजति" इतिवदभ्यासस्याप्यश्रवणात् कर्मैक्यमेव "तिस्र आहुतीर्जुहोति" इत्यत्र स्वीकार्यम्। एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते– तिस्र आहुतीर्जुहोति इत्यत्र "जुहोती–" त्याख्यातेन एकैव भावना विधीयत इत्युक्तम्, तन्न युज्यते। यत: "तिस्र आहुतीर्जुहोति" इदं पदत्रयघटितं वाक्यम्। तत्र वाक्ये नैकेन पदेन वाक्यार्थबोधो भवति, आख्यातपदमपि पदान्तरनिरपेक्षं वाक्यार्थं न जनयति। पदैरभिहितपदार्थैर्वाक्यार्थबोधो भवतीति नियमात्। अत: अत्र "तिस्र आहुतीर्जुहोति" वाक्ये त्रित्वसङ्ख्यया विशेषितेनाख्यातेन वाक्यार्थबोधो भवतीति वक्तव्यम्। तेन त्रित्वसङ्ख्यया विशिष्टत्वादाख्यातस्य प्रथममेव वाक्यात् कर्मबहुत्वं गम्यते। एवञ्चात्र सङ्ख्या कर्मसामानाधिकरण्यं प्राप्य कर्मभेदिका। पशुयागे "एकादशप्रयाजान् यजति" इति यच्छ्रुतम्, तत्र प्रकृतौ दर्शपूर्णमासयागे पञ्च सङ्ख्याका: प्रयाजा: श्रुता:, तेषां विकृतौ पञ्चसङ्ख्याकानां प्रयाजानामतिदेशेन प्राप्तिर्भवति, उत्पन्नकर्मानुवादेन विधीयमाना सङ्ख्या न कर्मभेदनक्षमेति पञ्चसङ्ख्यावरुद्धत्वाद्विकृतौ पशौ श्रुतैकादशत्वसङ्ख्या आवृत्त्या सम्पाद्यते, प्रकृते तु "तिस्र आहुतीर्जुहोति"

८३. तै.सं. २.३.९

वाक्ये त्रित्वविशिष्टमेव कर्म विधीयत इति कर्मभेदः स्वीकार्यः। अनेन शब्दान्तराभावादभ्यासाभावाच्च आख्यातस्य सकृच्छ्रुतेः कर्मैक्यमित्यपास्तम्; यत्र ह्युत्पत्तिवाक्ये कर्मैक्यविरोधि पदान्तरं नास्ति तत्रैव आख्यातसकृच्छ्रुतेः कर्मैक्यप्रयोजकता, अत्र तु तिस्र इति उत्पत्तिवाक्ये कर्मैक्यविरोधि पदान्तरं श्रूयते, अतः सकृच्छ्रुतस्याख्यातस्य कर्मैक्यप्रयोजकता नास्ति, भेदनियामकस्य "तिस्र" इति सङ्ख्याविशेषस्य सत्वात् सकृच्छ्रुतमेवाख्यातं भिन्नान्यपि कर्माणि युगपदेव विधत्ते।

अस्मिन् वृत्तिकारोक्ते विषयवाक्ये "तिस्र आहुती–" रिति कर्मण्येव सङ्ख्याश्रवणात् कर्मभेदः स्फुट इति पूर्वपक्षस्य सम्भावना मन्देति द्रव्यगतया सङ्ख्यया यत्र कर्मभेदो नातिस्फुटः तदुदाहरणं भाष्यकारैः विचारितम्। तदिदानीं निरूप्यते–वाजपेययागे श्रूयते–"सप्तदश प्राजापत्यान् पशूनालभते"[८४] इति। अत्र मुख्यः संशयः सङ्ख्यया कर्मभेदो न भवत्युत भवतीति। तदर्थमिदं चिन्त्यते–प्राजापत्यानित्यत्र तद्धितार्थः पशुः प्रथमं बहुत्वेनान्वितः पश्चात् प्रजापतिदेवतया सम्बध्यत उत प्रथमं प्रजापतिनान्वितः पशुः पश्चाद्बहुत्वेन सम्बध्यत इति। आद्ये सप्तदशपशुद्रव्यक एको यागो विधीयते इति सङ्ख्यया कर्मभेदो न सिद्ध्यति। द्वितीये तु एकैकपशुद्रव्यकाः सप्तदशयागा विधीयन्त इति सङ्ख्यया कर्मभेदः सिद्ध्यति। अत्र पूर्वपक्ष एवमुपस्थाप्यते–

"प्राजापत्यान् पशूनालभते" इति प्रकृतवाक्ये प्राजापत्यानित्यत्र प्रातिपदिकेन देवताभिधीयते तद्धितेन च द्रव्यमित्यत्र नास्ति विप्रतिपत्तिः। प्राजापत्यशब्दश्च "तद्धिताः"[८५] इत्यधिकारे "सास्य देवता"[८६] इत्यर्थे "दित्यदित्यादित्यपत्युत्तरपदाण्यः"[८७] इति सूत्रेण ण्यप्रत्यये कृते निष्पन्नः। अत्र प्रजापतिर्देवतास्येति विग्रहे 'अस्य' 'अस्य' इति सप्तदशकृत्व उच्चार्य "सरूपाणामेकशेष एकविभक्तौ"[८८] सूत्रेण कृतेनैकशेषेण "एषाम्" इति

८४. तै.ब्रा. १.३.४
८५. पा.सू. ४.१.७९
८६. पा.सू. ४.२.२४
८७. पा.सू. ४.१.८५
८८. पा.सू. १.२.६४

सर्वनाम्ना प्रजापतिर्देवतैषामिति विग्रहेण प्रजापतिशब्दात्सप्तदशसु तद्धितेषु कृतेषु तेषां केवलानामेकशेषे सति "यः शिष्यते स लुप्तार्थाभिधायी" इति न्यायेन शिष्टस्यैकस्य तद्धितस्य सप्तदशसु वृत्त्या प्रथमं बहुत्वेनान्वितस्य पश्चात् प्रकृतिभूतप्रजापतिशब्देनान्वयः स्वीकार्यः। तेन च द्रव्यभेदस्यैव प्राप्तत्वाद् सप्तदशभिः द्रव्यैः व्यासज्यैकेन प्रजापतिना सम्बद्धैरेक एव यागो विधीयत इति युक्तम्। यथा गर्गशब्दादेकस्माद्बहूनां यञामुत्पत्तेस्तद्धित-मात्रैकशेषेण गर्गा इति सिद्ध्यतीति वैय्याकरणैः स्वीकृतमेव। एतच्च "सरूपाणाम्" "तद्राजस्य"[८९] इति सूत्रस्य भाष्ये टीकायाञ्च स्पष्टम्। एवञ्चात्र सङ्ख्यायाः द्रव्यभेदप्रयोजकत्वात् सप्तदशपशुभिः प्रजापतिदेवताको यागो विधीयते हृदयादिद्रव्यैरेकस्य पशुयागस्य सम्पादनवदिति पूर्वाधिकरण-वदत्रापि न कर्मभेद इति, तेन चैकमेव कर्म तज्जन्यमेकमेवापूर्वं कल्प्यमिति लाघवञ्चेति पूर्वपक्षः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–

अत्र प्रकृतवाक्ये सप्तदशेति सङ्ख्यानिमित्तः कर्मभेदः स्वीकार्यः। "सप्तदश प्राजापत्यान् पशूनालभत इति श्रुतौ" साक्षाद्यागो न प्रतीयते "आलभते" इत्येवोक्तत्वात्। प्राजापत्यानिति द्रव्यदेवतासम्बन्धबोधक-तद्धितान्तपदसाहचर्यात् आलभतिना यागो विधीयत इति वक्तव्यम्। प्राजापत्यान् इत्ययं शब्दः तद्धितान्तप्राजापत्यशब्दस्य द्वितीयाबहुवचनान्तः। अत्र प्रजापतिनान्वितः पशुः पश्चाद् बहुत्वेनान्वेति न तु बहुत्वेनान्वितः पशुः पश्चाद् प्रजापतिनान्वेति; प्राजापत्ये शब्दे निष्पन्ने पश्चात्तद्धितान्तस्य द्वितीयाबहुवचने शस् प्रत्यये कृते सिद्धं रूपं प्राजापत्यानिति। द्रव्यदेवता-सम्बन्धस्य यागकल्पकत्वात्तद्भेदे यागभेद आवश्यकः। क्रियाणां फलापवर्गित्वाच्च द्रव्यदेवतासम्बन्धरूपफलभेदे यागक्रियाभेदोऽप्यवश्यकः। अतः अत्र प्रजापतिर्देवताऽस्येति प्राजापत्यः, प्राजापत्यश्च प्राजापत्यश्च प्राजापत्यश्चेति प्राजापत्या इति व्युत्पत्तिः। सप्तदश सङ्ख्या च बहुत्वनियामिका, एकैकपशुद्रव्यकसप्तदश यागा वाक्येनानेन विधीयन्ते।

---

८९. पा.सू. २.४.६२

एवञ्च चोदकस्याप्यनुग्रहो भवति। प्रकृतौ "अग्नीषोमीयं पशुमालभेत" इति वाक्ये अग्नीषोमीयमित्येकत्वस्य विवक्षितत्वेन पशोरेकत्वादेक-पशुनिष्पन्नैकादशावदानगणस्य द्रव्यत्वात् प्रकृतवाक्येन सप्तदशपशूनामुपदेशस्य श्रुतत्वात् प्रतिपश्वेकादशावादानगणस्यातिदशेन सम्भवादुपदेशेनातिदेशस्य बाधस्यानपेक्षितत्वाद्यागबहुत्वे चोदकस्याप्यनुग्रहो भवति। यागैक्यै त्वत्र सप्तदशसङ्ख्या विरुद्ध्यते; यागस्यैकत्वाच्चोदकोऽप्येकः स्यात्ततश्च प्रकृतौ हृदयादीनामेकादशावयवानामेकपशुनिष्पन्नानामङ्गत्वात् प्रकृते वाजपेये पशुयागेऽप्येकपशुनिष्पन्नानामेकादशावयवानामेव चोदकेन प्राप्त्या एकस्यैव पशोर्यागसाधनत्वं स्यान्न तु सर्वेषामिति चोदकस्य बाधः प्रसज्यते। तदुक्तं मिश्रपादैः–

> यदि कर्म भवेदेकमेकः स्याच्चोदकस्ततः।
> तेन चैकगणप्राप्तेः पशुसङ्ख्या विरुध्यते॥ इति[१०]

तदेवं प्रकृते सङ्ख्यया कर्मभेदः, सप्तदश पशुयागा विधेयाः। "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि" इति स्वीकारात् प्रमाणप्राप्ताः सप्तदश यागाः तज्जन्यान्यपूर्वाणि चेति गौरवमत्र न दोषाय कल्पते।

प्रयोजनञ्च– "सप्तदश प्राजापत्यान् आलभत" इत्यत्र पूर्वपक्षे सप्तदशपशुद्रव्यकैकयागत्वात् "प्रजापतय एव ते पशवो न मम" इति सकृत् त्यागानुष्ठानम्। सिद्धान्ते तु एकैकपशुद्रव्यकसप्तयागा विधीयन्त इति स्वीकारात् "प्रजापतय इदम्" "प्रजापतय इदमि-" ति सप्तदशकृत्वः त्यागानुष्ठानमिति विवेकः।

"तिस्र आहुतीर्जुहोती-" त्यत्र पूर्वपक्षे कर्मैक्यस्वीकारात् एतदङ्गभूतो मन्त्रः वेदिप्रोक्षणमन्त्रवत् सकृदेव प्रयोज्यः, सिद्धान्ते कर्मभेदस्वीकारान्मन्त्रः प्रति कर्म आवर्तनीय इति विवेकः।

---

१०. शास्त्रदीपिका २.२.७

इदानीमष्टमाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

**अथैष ज्योतिरित्यत्र गुणो वा कर्म वा पृथक्।**
**गुणः सहस्रदानात्मा ज्योतिष्टोमे ह्यनूदिते॥२२॥**

**अथेति प्रकृते छिन्न एतच्छब्दोऽग्रगं वदेत्।**
**सङ्ख्ययेवान्यकर्मत्वमिह नूतनसंज्ञया॥२३॥**

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे द्वित्र्यादिसङ्ख्याया आश्रयभेदकत्वनियमात् सप्तदश सङ्ख्यया यागभेदो निर्णीतः, अत्र तु एकस्यैव भगवतः सूर्यादेः भास्करः, मित्रः, आदिदेवः, रविः, मार्तण्ड इत्यादि बहुभिर्नामभिर्व्यपदेशो दृश्यते, अतः नाम्नामाश्रयभेदकत्वनियमाभावात् कथं संज्ञया कर्मभेद इति पूर्वपक्षोत्थानात्प्रत्युदाहरणरूपा सङ्गतिः। कर्मभेदविचारपरत्वादेकप्रकरणगतविषयविवेचनपरत्वाच्चाध्यायसङ्गतिः पादसङ्गतिश्च स्पष्टे।

कस्याञ्चित् शाखायां ज्योतिष्टोमं प्रकृत्य श्रूयते "अथैष ज्योतिः"[९१] "अथैष विश्वज्योतिः"[९२] "अथैष सर्वज्योतिः"[९३] "एतेन सहस्रदक्षिणेन यजेत", एतेन ऋद्धिकामो यजेते–" ति।

अत्र संशयः– प्रकृतं ज्योतिष्टोममनूद्य सहस्रदक्षिणाख्यो गुणोऽत्र विधीयत उत ज्योतिरादिनामकानि कर्मान्तराणि विधीयन्ते इति।

पूर्वपक्ष एवमुपस्थाप्यते– प्रकृते "अथैष ज्योतिः"– इत्यादिषु एतच्छब्देन प्रकृतस्य ज्योतिष्टोमस्य परामर्शात् तदनूद्य किञ्चिद्विधीयत इति ज्ञाते "एतेन सहस्रदक्षिणेन यजेत" इत्यत्र सहस्रदक्षिणाख्यो गुणो विधीयत इति स्पष्टम्भवति। एकस्यैव ज्योतिष्टोमस्य ज्योतिः, विश्वज्योतिः, सर्वज्योतिरिति नामानि भवितुमर्हन्ति। यथा एकस्यैव दर्शपूर्णमासकर्मणः

---

९१. तण्ड्यब्राह्मणम् १६.८.१

९२. तण्ड्यब्राह्मणम् १६.९.१

९३. तण्ड्यब्राह्मणम् १६.१०.१

दाक्षायण-साकम्प्रस्थायीयादिनामभेदाः श्रूयन्ते। एकस्यैव भगवतः सूर्यस्य रविः, मार्तण्डः इत्यादिनामभेदाः दृश्यन्ते इति बहूनां नाम्नामेकत्र स्थितौ बाधाभावात् सङ्ख्यावन्नाम्नामाश्रयभेदकत्वाभावादत्र संज्ञया कर्मभेदस्वीकारो न युक्तः। कर्मभेदकल्पनायां तज्जन्यानेकापूर्वकल्पनागौरवञ्च स्यादतः प्रकृतं ज्योतिष्टोममनूद्य सहस्रदक्षिणस्यगुणमात्रमनेन वाक्येन विधीयते।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते–

"अथैष ज्योतिः" इत्येवं श्रुतेषु संज्ञया कर्मभेद एवाश्रयणीयः। यद्यपि प्रमाणान्तरेणैक्ये सिद्धे बहूनामपि नाम्नां कर्मभेदसाधकत्वं न युज्यते तथापि यत्र प्रमाणान्तरेणैक्यं न सिद्ध्यति तत्र नाम्नां कर्मभेदसाधकत्वमेव स्वीकार्यमन्यथा एकेनैव नाम्ना व्यवहार उपपद्यते चेदनेकनाम्नां वैय्यर्थ्यापत्तिः। अत्र च वाक्ये "अथैष ज्योतिः" इत्येवमधिकारार्थेऽथशब्दः प्रयुक्तः, एतच्छब्दस्य च सन्निहितपरामर्शकत्वमेव न तु पूर्व-प्रकृतस्यैव प्रामर्शकत्वमिति नियमः, अत्र आगामिसन्निहितानां ज्योतिः, विश्वज्योतिः सर्वज्योतिः इति शब्दानां परामर्शकत्वात् तेषाञ्च नूतनसंज्ञारूपत्वात् प्रकृतज्योतिष्टामाद्भिन्नानां कर्मणां विधिरतः संज्ञया कर्मभेद एवात्रयुज्यते। नच दर्शपूर्णमासौ, साकम्प्रस्थायीयः, दाक्षायणयज्ञः इत्यादिसंज्ञाया अपि कर्मभेदकत्वं स्यादिति वाच्यम्; उत्पत्तिशिष्टैव संज्ञा कर्मभेदिकेति स्वीकारात्। साकम्प्रस्थायीय इत्यादि संज्ञा तु उत्पन्नशिष्टगुणयोगनिबन्धनेति तासां न कमभेदकत्वम्। अत एकस्यैव श्रीसूर्यनारायणस्य भगवतः गुणभेदनिबन्धनाः सहस्रसंज्ञा उपपद्यन्त एवं श्रीहनूमदादिभगवतामपि इति न दोषः। कर्मभेदपक्षेऽनेकापूर्वकल्पनापि प्रामाणिकत्वान्निर्दोषा। "अथैष ज्योति" रित्यादावथशब्दो न पूर्वयागाधिकारविच्छेदकः किन्तु यागान्तरोत्पत्यधिकारार्थः, अतः प्रकरणान्तरात्कर्मभेदोऽत्र न शङ्क्यः, न वा संज्ञायाः शब्दान्तर-त्वात्तन्न्यायेनैव कर्मभेदः शङ्क्यः; धात्वन्तररूपमेव हि शब्दान्तरं कर्म भेदकमिति शब्दान्तराधिकरणे निर्णीतत्वादत्र तु संज्ञा धात्वर्थभेदमात्रे व्याप्रियते तद्भेदाच्च भावनाभेदः इत्यधिकरणयोरसङ्कीर्णार्थत्वात्।

प्रयोजनञ्च पूर्वपक्षे प्रकृतस्यैवाग्निष्टोमयागस्य गुणत्वेन सहस्रदक्षिणा प्रकृतवाक्येन विधीयत इति स्वीकारात् सहस्रदक्षिणायाः प्रकृतिभूताग्निष्टोम-

सोमयागाङ्गत्वादाद्यप्रयोगेऽपि तदनुष्ठानम्, सिद्धान्ते तु ज्योतिरादियागानाम् "अथैष ज्योति-" रित्यादिवाक्यविहितानां प्रकृतिभूताग्निष्टोमसोमयागाद्भिन्नत्वेन अग्निष्टोमसोमयागे आद्यप्रयोगे न तदनुष्ठानम् किन्तु विकृतिभूतज्योतिरादि-यागेष्वेव सहस्रदक्षिणाविधानमिति विवेकः। इदानीं नवमाधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

गुणः कर्मान्तरं वा स्याद्वाजिभ्यो वाजिनं त्विति।
गुणो देवाननूद्योक्तसमुच्चयविकल्पतः॥२४॥

आमिक्षोत्पत्तिशिष्टत्वात्प्रबला तत्र वाजिनम्।
गुणोऽप्रविश्य कर्मान्यत्कल्पयेद्वाज़िदेवकम्॥२५॥

### जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे संज्ञया कर्मभेदो निर्णीतः, तत्रैकेनैव नाम्ना व्यवहारे सिद्धे नामान्तरं व्यर्थम्, नाम्नाञ्च स्वाश्रयभेदकत्वाभावात् संज्ञया कर्मभेदश्च न सम्भवतीत्याक्षेपयोः समाधानपुरस्सरं संज्ञया कर्मभेदः साधितः। एवं गुणानामपि कर्मभेदकत्वं न सम्भवतीत्याक्षेपसाम्यात् सङ्ख्यायाः कर्मभेदकत्वे निर्णीते गुणस्य संज्ञायाश्च निरूपणीयत्वे प्राप्ते सूचीकटाहन्यायेन संज्ञायाः कर्मभेदकत्वमुपपाद्येदानीं गुणानां कर्मभेदकत्वं विचार्यत इति पूर्वाधिकरणेन सह सङ्गतिः। एकप्रकरणगतकर्मभेदविचारपरत्वात्पादाध्याययोः सङ्गतिः स्पष्टं ज्ञायते।

अत्र चातुर्मास्यप्रकरणे वैश्वदेवपर्वणि "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रूयते। अत्र "वैश्वदेव्यामिक्षा" इत्यनेन विश्वेदेवदेवताकामिक्षाद्रव्यकयागं विधाय "वाजिभ्यो वाजिनम्" इति श्रुतमत्र "वाजिभ्यो वाजिनम्" इत्यत्र किं वाजिभ्य इति चतुर्थ्यन्तेन पदेन विश्वेदेवदेवता अनूद्य वाजिनरूपगुणो विधीयत उत वाजिदेवताक-वाजिनद्रव्यककर्मान्तरं विधीयत इति संशयः।

पूर्वपक्ष एवमुपस्थाप्यते– तप्तदुग्धे दधिप्रक्षेपेण निष्पन्नं घनीभूतं द्रव्यमामिक्षेत्युच्यते। तदनुनिष्पन्नं तक्रवद् द्रवीभूतं द्रव्यं वाजिनमित्युच्यते।

अतः अमिक्षा वाजिनम् इत्यनयोः गुणत्वं द्रव्यविशेषत्वं प्रसिद्धम्। अतः वाजिभ्यो वाजिनमित्यत्र वाजिनद्रव्यं विधीयत इति स्पष्टमेव। "वाजिभ्य" इति पदं वाजोऽन्नमामिक्षारूपमेषामस्तीति इनिप्रत्ययान्तवाजिशब्दस्य चतुर्थ्यन्तरूपमिति सन्निहितविश्वेदेवमात्रस्यानुवादः अनेन भवतीति प्राप्तदेवतामनूद्य गुणमात्रमत्र "दध्ना जुहोती"– तिवद्विधीयत इति नास्ति कर्मान्तरविधिः। गुणश्च विधीयमान आमिक्षाद्रव्येण सह समुच्चयरूपेण विकल्परूपेण वा स्यात् सर्वथापि नात्र गुणस्य कर्मभेदकत्वम्। कर्मभेद-कल्पनायामपूर्वमपि कल्पनीयमिति गौरवं स्यादिति पूर्वपक्षे प्राप्ते समाधिरभिधीयते– अत्र गुणस्य कर्मभेदकत्वमेव युक्तम्। उत्पत्तिशिष्टगुणावरुद्धे उत्पन्नशिष्टगुणस्य प्रवेशासम्भवात् "सा वैश्वदेव्यामिक्षा" इति वाक्येन द्रव्यदेवताविशिष्टयागस्य विहितत्वान्निराकाङ्क्षत्वात् वाक्यान्तरेण "वाजिभ्यो वाजिनमि"–त्यनेन सम्बद्धवाजिनगुणस्यात्र प्रवेशासम्भवाद् वाजिनगुणः पूर्वस्मिन् विश्वदेवदेवताकामिक्षाद्रव्यकयागेऽसम्भवन्निवेशः कर्म भिनत्तीति सिद्धम्। किञ्च "सा वैश्वदेव्यामिक्षा" इत्यत्र "वैश्वदेवी" तद्धितश्रुतिश्चामिक्षात्वेनैव द्रव्यं विधत्ते, आमिक्षापंदञ्च तदुपस्थापकत्वेनैव पर्यवस्यति। उक्तञ्च भट्टाचार्यैः–

> आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
> आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम्।।[९४]

इति। अतः आमिक्षावाजिनगुणयोस्तुल्यबलाभावेन विकल्पोऽपि न सङ्गच्छते।

प्रयोजनञ्च पूर्वपक्षे वाजिनामिक्षयोरेकस्मिन् विश्वदेवदेवताके यागे समुच्चयेन विकल्पेन वा विधानमिति वाजिदेवताकं वाजिनद्रव्यकं पृथग् यागान्तरं नास्ति सिद्धान्ते तु विश्वदेवदेवताकामिक्षाद्रव्यकयागाद्यागान्तरं वाजिदेवताकवाजिनद्रव्यकमिति विवेकः।

---

९४. तन्त्रवार्तिकम् २.२.९

इदानीं दशममधिकरणं निरूप्यते–

जैमिनीयन्यायमाला

दधिहोमेऽन्यकर्मत्वं गुणो वान्यत्तु पूर्ववत्।
निर्गुणत्वादग्निहोत्रे युक्तो दध्यादिको गुणः॥२६॥

जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे यत्रोत्पत्तिवाक्ये गुणः श्रूयते तत्रोत्पन्नशिष्टगुण-प्रवेशासम्भवाद् गुणनिमित्तकर्मभेदो निर्णीतः, अत्र तु यत्रोत्पत्तिवाक्ये गुणो नैव श्रूयते तत्रापि गुणनिमित्तकर्मभेदो भवत्विति आक्षेपे प्राप्ते तन्निराकरणार्थं प्रत्युदाहरणसङ्गत्येदमधिकरणं प्रवर्तते।

"अग्निहोत्रं जुहोति" इति प्रकृत्य "दध्ना जुहोति" "पयसा जुहोती-" त्यादीनि वाक्यानि श्रुतानि। तत्र पूर्वत्र पञ्चम आघाराग्निहोत्राधिकरणे तत्प्रख्यन्यायेनाग्निहोत्रशब्दस्य कर्मनामत्वात् "अग्निहोत्रं जुहोती-" ति वाक्यं कर्मविधायकमुत्पत्तिविधिरूपमिति निर्णीतम्। अत्र तु "दध्ना जुहोति" "पयसा जुहोती-" त्यादिवाक्यैः प्रकृतकर्मणः अन्यानि कर्माणि विधीयन्त उत उक्तवाक्यैः प्रकृतकर्मण्येव दध्यादिगुणा विधीयन्त इति संशयः।

पूर्वपक्ष एवमुपस्थाप्यते- पूर्वाधिकरणन्यायेनात्र अग्निहोत्रकर्मणि एकत्र दध्यादिबहुगुणानां निवेशासम्भवाद् गुणानां विकल्पस्वीकारे च विकल्पस्याष्टदोषदुष्टत्वाद् दध्यादिवाक्यैः कर्मान्तराण्येव विधीयन्त इत्येव युक्तम्। प्रामाणिकत्वाच्च बहूनां कर्मणां तज्जन्यापूर्वाणां कल्पनायां न दोषः। एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते–

अत्र "अग्निहोत्रं जुहोती" ति वाक्येन प्राप्ते कर्मण्यग्निहोत्रे दध्यादिवाक्यैः गुणमात्रं विधीयत इत्येव युक्तम्। "वैश्वदेव्यामिक्षा" इत्यत्र तु उत्पत्तिशिष्टगुणावरोधात् "वाजिनम्" इति गुणान्तरस्य प्रवेशासम्भवाद् गुणनिमित्तकर्मभेदः स्वीकृतः। प्रकृते तु "अग्निहोत्रं जुहोतीति वाक्ये केवलस्य कर्मण एव विधानान्निर्गुणत्वात् गुणस्याकाङ्क्षायाः सत्वात् सन्निहितवाक्यैः" "दध्ना जुहोती-" त्यादिभिः अपेक्षासत्तियोग्यतायुक्तैर्गुणमात्रं

विधीयते। अतः आकाङ्क्षापूरकत्वादत्र गुणानां कर्मभेदकत्वं नास्तीति गुणनिमित्तः कर्मभेदो न युज्यते। न च "दध्ना जुहोती"- ति वाक्येन गुणे विहिते तद्गुणावरोधात् "पयसा जुहोती"- ति वाक्यस्य गुणमात्रविधायकत्वासम्भवात् कर्मभेदकत्वमिति वाच्यम्; खलेकपोतन्यायेन सर्वेषामेव युगपत्प्रवृत्तेः सर्वेषामुत्पन्नशिष्टतया समबलत्वादेकैकेन द्रव्येणाग्निहोत्रस्य साध्यत्वाद् दध्यादिगुणानां व्रीहियववद्विकल्पः प्रामाणिकत्वादाश्रीयत इति गुणानामत्र कर्मभेदकत्वं न सिद्ध्यति।

प्रयोजनञ्च पूर्वपक्षे दध्यादिवाक्यैः कर्मान्तराणि विधीयन्त इत्यङ्गीकाराद् दध्यादिहोमानां समुच्चयः, सिद्धान्ते तु अग्निहोत्रकर्मण एकत्वाद् तत्र दध्यादिगुणानां विकल्पेनानुष्ठानम्। इदानीमेकादशाधिकरणं निरूप्यते—

## जैमिनीयन्यायमाला

यद्दध्नेन्द्रियकामस्य जुहुयादिति तत्पृथक्।
गुणो वा भिद्यते कर्म धात्वर्थस्य फलित्वतः॥२७॥

मत्वर्थगौरवादिभ्यो नान्यत् कर्म फलाय तु।
गुणे विधेये धात्वर्थो विहितत्वादनूद्यते॥२८॥

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे "सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र गुणाद् आमिक्षाद्रव्यकविश्वदेवदेवताकयागादन्यः वाजिनद्रव्यकवाजिदेवताको याग इति निर्णीतः। तस्य प्रत्युदाहरणरूपेण अग्निहोत्रकर्मोत्पत्तिसन्निधावाम्नातानि "दध्ना जुहोती"- त्यादिवाक्यानि गुणमात्रविधायकानि न तु कर्मान्तर-विधायकानीति च निर्णीतम्। सम्प्रति गुणात् कर्मभेदस्यापवादरूपेण पुनः "दध्नेन्द्रियकामाधिकरणं प्रवर्तते।"

अग्निहोत्रमेव प्रकृत्य "दध्नेन्द्रियकामस्य जुहुयाद्"[९५] इति श्रूयते। अत्र "दध्नेन्द्रियकामस्य जुहुयादि-" त्यत्र किं गुणात् कर्मभेदः उत गुणो

---

९५. तै.ब्रा. २.१.५.६

नात्र कर्मभेदक इति संशयः। अतः पृथक् कर्म विषयवाक्येन बोध्यत उत गुणो विधीयते इत्यत्र विचार्यते।

अत्र पूर्वपक्ष एवमुपस्थाप्यते– प्रथमे पादे भावार्थाधिकरणे फलभावनायां धात्वर्थस्य करणत्वमुक्तम्। अतः केवलदध्नः गुणस्य फलाय विधानं न युज्यते; होमेन फलं भावयेदिति धात्वर्थस्य करणत्वेन विधानाद्। तदर्थं वाक्यभेदमाश्रित्य "दध्ना होमं भावयेद्" "होमेन फलं भावयेदिति" वक्तव्यम्। तदा वाक्यभेददोषः प्रसज्यते। वाक्यभेदवारणार्थं कर्मान्तरमेव विधीयते, दधिविशिष्टो होमः फलाय विधीयत इति स्वीकारे लाघवम्। तेन च "दध्ना जुहोती-" ति पूर्वं दधिगुणस्य विधायकं वाक्यमपि सङ्गच्छते, अन्यथा दधिगुणस्य विहितत्वात् पुनर्विधानमत्रैकस्मिन् कर्मणि व्यर्थं स्यात्। एवञ्चात्र अग्निहोत्रसन्निधौ "दध्ना जुहोती-" ति दधिगुणस्य पूर्वं विहितत्वात् पुनः दधिगुणस्य तत्र विधानस्यासम्भवाद् गुणावरुद्धे कर्मणि दधिगुणोऽसम्भवन्निवेशः कर्म भिनत्तीति युक्तम्।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते–"अग्निहोत्रं जुहोति" "दध्ना जुहोति" "दध्नेन्द्रियकामस्य जुहुयाद्" इति त्रीणि वाक्यानि प्रकरणेऽत्र श्रुतानि। तत्र "अग्निहोत्रं जुहोति" वाक्यमग्निहोत्रहोमविधायकमिति निर्णीतमेव पूर्वत्र। अत्र "दध्नेन्द्रिय-" वाक्येन कर्मान्तरं विधीयते चेद् गुणपदस्य होमपदेन सहान्वयार्थं दधिमता होमेनेन्द्रियं भावयेदिति मत्वर्थलक्षणाप्रसङ्गाद्गौरवं प्रसज्यते। प्रकृतस्याग्निहोत्रस्य हानादप्रकृतस्य कर्मान्तरस्य कल्पनाच्च प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गश्च प्रसज्यते। यदुक्तं प्रकृतवाक्ये कर्मान्तरं न विधीयते। चेद् गुणस्य फलस्य सम्बन्धार्थं वाक्यभेदः दध्ना होमम्, होमेन्द्रियमिति प्रसज्यत इति, तत्रोच्यते– "दध्नेन्द्रियकामस्य जुहुयाद्" इत्यनेन दधिरूपगुणस्येन्द्रियरूपफलसम्बन्धः एव वाक्येन विधीयते; होमस्य प्राप्तत्वात्, दध्नश्च होमोद्देशेन प्राप्तत्वाद्धोमोद्देशेन पुनः दध्नो विधानासम्भवात्। अतः दधिरूपो गुणः कथं फलं साधयतीति जिज्ञासायां सिद्धरूपस्य गुणस्य क्रियामन्तरेण क्वापि फलसम्पादकत्वादर्शनाद् दधिरूपो गुणः काञ्चन क्रियामाश्रित्यैव फलं साधयतीति यस्याः कस्याश्चित् क्रियायाः प्राप्त्यपेक्षया अपेक्षासत्तियोग्यत्वैः तत्क्रियात्वेन अग्निहोत्रहोम एवोपतिष्ठते। एवमुपस्थितो

होमः दध्नः फलसम्पादको भवत्यर्थादत्र जुहोतेराश्रयत्वेनान्वयः, प्रकृतहोमाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेदिति। एवञ्चैकवाक्यत्वान्न वाक्यभेदकल्पना-गौरवम्, मत्वर्थलक्षणाया अपि नापेक्षेति लाघवम्। तथाचात्र गुणान्न कर्मभेदः। यदुक्तं "दध्ना जुहोती-" त्यनेनैव दध्नः विहितत्वान्न पुनः दध्नो विधानं सम्भवतीति, तत्रोच्यते "दध्ना जुहोती" ति वाक्यं क्रत्वर्थतया दधि विधत्ते, दध्नेन्द्रयवाक्यञ्च पुरुषार्थतया दधि विधत्त इति "एकस्य तूभयत्वे संयोपृथक्त्वमि"[१६] ति चतुर्थाध्याये तृतीयपादे निरूपयिष्यमाणत्वान्न दोषः।

एवञ्च "दध्नेन्द्रियकामस्य जुहुयादि-" त्यत्र दधिरूपो गुणः कर्म न भिनत्ति, गुणमात्रमनेन फलाय विधीयत इति सिद्धम्।

प्रयोजनञ्च पूर्वपक्षे नैयमिकाग्निहोत्रव्यतिरिक्तमनियतकालं दधिसाधनकं होमान्तरं सकृदेवेन्द्रियरूपफलकामनया दर्वीहोमत्वादपूर्वं कर्तव्यम्। सिद्धान्ते सायम्प्रातरग्निहोत्रहोमे इन्द्रियरूपफलकामनयापि दधिप्रयोगः इति विवेकः।

इदानीं द्वादशाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

उक्त्वाग्निष्टुतमेतस्य वारवन्तीयसाम हि।
रेवतीष्वृक्षु कृत्वेति श्रुतं पशुफलाप्तये॥२९॥

रेवत्यादिर्गुणः कर्म पृथग्वा पूर्ववद्गुणः।
रेवतीवारवन्तीयसम्बन्धाख्यः पशुप्रदः॥३०॥

साम्नोऽत्र फलकर्मभ्यां सम्बन्धे वाक्यभिन्नता।
तेनोक्तगुणसंयुक्तमन्यत्कर्मोच्यते फले॥३१॥

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे "दध्नेन्द्रियकामस्य जुहुयाद्" इत्यत्र गुणफलसम्बन्धो विधीयत इति निर्णीतमस्मिन्नप्यधिकरणे "एतस्यैव रेवतीषु" इति विषयवाक्ये

१६. मी.द. ४.३.३

पूर्ववद्गुणफलसम्बन्धोऽस्त्विति पूर्वपक्षोत्थानात्प्रत्युदाहरणसङ्गतिः। एकप्रकरण-गतकर्मभेदविचारपरत्वात् पादाध्यायसङ्गती।

तण्ड्यब्राह्मणे "त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वृक्षेक-विंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत"[९७] इति वाक्येनाग्नि-ष्टुन्नामकयागो विहितः। तत्सन्निधौ "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत" इति वाक्यं श्रूयते। अयमग्निष्टुन्नामकः यागोऽग्निष्टोमसोमयागस्य विकृतिरूपः। अग्निष्टोमात्यग्निष्टोमोक्थ्याति-रात्रषोडशीवाजपेयाप्तोर्यामाख्यसप्तसोमसंस्थानां मध्येऽग्निष्टोमसंस्था-रूपत्वादग्निष्टोम इत्युच्यते। पृष्ठस्तोत्रे त्रिवृत्स्तोमयुक्ततया त्रिवृदित्युच्यते। प्रकृतियागोऽग्निष्टोमसोमयाग इत्युक्तमेव। तत्र प्रकृतौ तृतीयसवने आर्भवपवमानस्योपरि यज्ञायज्ञीयं साम गीयते। तेन च साम्ना अग्निष्टोम-सोमयागस्य समाप्यमानत्वादग्निष्टोमसाम इत्यप्युच्यते। यज्ञायज्ञीयमग्निष्टोमसाम प्रकृतौ "यज्ञायज्ञा वो अग्नये" इत्यग्निदेवताकेषु ऋङ्मन्त्रेषु गीयते। सर्वत्र ऋङ्मन्त्रेष्वेव हि सामगीतिः प्रवर्तते। प्रकृतिवद् विकृतिः कर्तव्येति अतिदेशेनात्र अग्निष्टुन्नामकविकृतियागे तत् प्राप्नोति। अत्राग्निष्टुन्नामकसोमयागे तद्बाधेन "त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वृक्षु" इति वाक्येन तद् यज्ञायज्ञीयं साम वायव्यास्वृक्षु वायुदेवताकेषु ऋङ्मन्त्रेषु गातव्यमिति विधीयते। तच्च प्रकृताविवात्राप्यग्निष्टुद्यागेऽपि एकविंशस्तोमयुक्तम्। एवञ्चानेन वाक्येन वायुदेवताकर्गधिकरणकैक- विंशस्तोमकाग्निष्टोमसामसाध्यकाग्निष्टुद्यागेन ब्रह्मवर्चसं भावयेदिति बोध्यते। एतद्वाक्यमुक्त्वा एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत" इति पठितम्। "रेवतीर्नः सधमाद"[९८] इत्याद्या ऋचः रेवत्य इत्युच्यन्ते। "अश्वं न त्वा वारवन्तम्" इति ऋङ्मन्त्रे गेयं साम वारवन्तीयं साम इत्युच्यते। "अग्निष्टोम साम कृत्वा" इत्यनेन अग्निष्टोम साम्नो यत्र गानं तत्र कृत्वा, पशुकामो ह्येतेन यजेत अर्थात् पशुफलकामनावान् यजेत इति अस्य वाक्यस्यार्थः। अत्राचार्यैः "उक्त्वाग्निष्टुतमेतस्ये" ति प्रथमश्लोकेन विषयवाक्यम् "एतस्यैव

९७. ताण्ड्यब्राह्मणम् १७.६.११

९८. सा.संहिता उत्तरार्चिकम् ३.४.१.१४

रेवतीषु" इदमर्थत उक्तम्।

अत्र संशयः– किमत्र "त्रिवृदग्निष्टुदग्निष्टोमः" इति पूर्ववाक्येन विहितेऽग्निष्टुन्नामकसोमयागे वायव्यास्वृक्षु यज्ञायज्ञीयं साम यद् विहितन्तत्स्थाने पशुफलाय रेवतीषु ऋक्षु वारवन्तीयं साम विधीयते उत पशुफलाय गुणविशिष्टं कर्मान्तरं विधीयते इति।

अत्र पूर्वपक्ष एवमुपस्थाप्यते– अत्र एतस्यैवेति पूर्वपरामर्शकैतच्छब्द-श्रवणात् पूर्वाधिकरणन्यायेन फलाय गुणमात्रं विधीयते न तु कर्मान्तरं विधीयते इति। एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते– अत्र तु गुणविशिष्टं कर्मान्तरमेव विधीयते। साम्नः एकस्य कर्मसम्बन्धः फलसम्बन्धश्च विधीयेते चेद्वाक्यभेदप्रसङ्गः। पूर्वाधिकरणे हि दध्नः फलसम्बन्धमात्रं वाक्येन विधीयते, कर्मसम्बन्धस्तु दध्नः यागसाधनतस्य प्रसिद्धत्वात् चतुर्थद्वितीयनवमे "नियमार्थां वा श्रुति"-रित्यत्र द्रव्यदिविधिषु प्रमाणां पाक्षिकी प्राप्तिरस्तीति निर्णीतत्वात्त-न्यायेन कर्मसम्बन्धस्य लोकत एव सिद्धत्वात् न वाक्यभेदः, इह तु रेवत्यधिकरणकवारवन्तीयसाम्नः कर्मसम्बन्धोऽपि वाक्यगम्यः फलसम्बन्धोऽ-पीति वाक्यभेदपरिहारार्थं गुणविशिष्टं कर्मान्तरमेव विधीयत इति युक्तम्।

प्रयोजनञ्च पूर्वपक्षे कर्मैकत्वाद् रेवत्यधिकरणकवारवन्तीयसामयुक्ते कर्मणि क्रतुफलं ब्रह्मवर्चसं गुणफलं पशुश्च लभ्येते, सिद्धान्ते पूर्वकर्मणः भिन्नत्वात् पशुफलमेकमेवेति विवेकः

इदानीं त्रयोदशाधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

वृष्ट्यन्नस्वर्गकामानां सौभरं स्तोत्रमीरितम्।
निधनान्यपि हीषूर्गू इति वृष्ट्यादिकामिनाम्॥३२॥

फलान्तरं किं वृष्ट्यादि हीषादीनामुतोदिते।
सौभरे फलसम्भिन्ने निधनं विनिगम्यते॥३३॥

फलान्तरं चतुर्थ्योक्तं वृष्टिकामाय हीषिति।
सौभरस्य फलं वृष्टिर्हीषित्युक्त्वा विवर्धते॥३४॥

नोक्तवृष्ट्यन्नकामानामन्यत्वं प्रत्यभिज्ञया।
नियमेऽपि चतुर्थ्येषा तादर्थ्यादुपपद्यते॥३५॥

इति श्रीमाधवाचार्यविरचितायां जैमिनीयन्यायमालायां

द्वितीयाध्यायस्य द्वितीयः पादः॥

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे "एतस्यैव रेवतीषु" वाक्ये वाक्यभेदभयात् प्रकृतादग्निष्टुद्यागाद्यागान्तरमिति गुणात् कर्मभेदो निर्णीतः। अत्रापि "हीषिति वृष्टिकामाय निधनं कुर्यात्" इति वाक्ये गुणात् कर्मान्तरं स्यादिति आक्षेपे अपवादसङ्गत्येदमधिकरणं प्रवर्तते। एकप्रकरणगतकर्मभेदविचारपरत्वात् पादाध्यायसङ्गती स्पष्टे।

ताण्ड्यब्राह्मणे सोमसंस्थानां मध्ये षोडशीसंस्थाया अवान्तरप्रकरणे "सौभरमुक्थानां ब्रह्मसाम भवतीति"[९९] श्रुतम्। तथा ब्रह्मसामस्तोत्रं प्रकृत्य "यो वृष्टिकामो योऽन्नाद्यकामो यस्स्वर्गकामस्स सौभरेण स्तुवीत" इति श्रूयते। अत्र सौभरं नाम सामविशेषः। अतः वृष्ट्यन्नस्वर्गाख्यफलार्थं षोडशीसंस्थाकसोमयागे सौभराख्यसाम विधीयते इति वाक्यार्थः सम्पद्यते। अत्र ब्रह्मसाम नाम स्तोत्रविशेषः, स्तोत्रं नाम प्रगीतमन्त्रसाध्यं गुणिनिष्ठगुणभिधानम्, तच्च सामगानसाध्यम्। अत्र ब्रह्मसामाभिधस्तोत्रार्थं सौभरं नाम साम विधीयते। एतच्च ज्योतिष्टोमे सवनीयदिने विहितम्। अस्मिन् वाक्ये नास्ति कापि विप्रतिपत्तिः। परन्तु एतत्सन्निधौ वाक्यं श्रूयते– "हीषिति वृष्टिकामाय निधनं कुयात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय" इति एतदस्याधिकरणस्य विषयवाक्यम्। अत्र निधनं नाम साम्नः अवयवः, साम्नः सप्तावयवाः–हिंकारः, प्रस्तावः, उद्गीथः, ओङ्कारः, प्रतिहारः, उपद्रवः, निधनञ्चेति श्रुताः। हीषिति, ऊर्गिति, ऊ इति च निधन भेदाः। अत्र संशयः– किमनेन वाक्येन हीषादिनिधनभेदाः पूर्ववाक्येन विहितेभ्यः सौभरसामसाध्यस्तोत्रफलेभ्योऽतिरिक्तफलान्तरार्थत्वेन विधीयन्त उत पूर्ववाक्येन वृष्ट्यादिफलार्थं प्राप्तं सौभरमनूद्य वृष्ट्यादिफलभेदेन

---

९९. ता.ब्रा. ८.८

हीषादिनिधनानि नियम्यन्ते।

पूर्वपक्ष एवमुपस्थाप्यते–अत्र "हीषिति वृष्टिकामाय" "ऊर्गिति अन्नाद्यकामाये-" त्येवं चतुर्थीश्रवणात्तादर्थ्ये च चतुर्थीविधानात् हीषादिनिधनभेदाः वृष्टयादिफलान्तरार्थत्वेन विधीयन्त इति युक्तम्। अतः हीषिति निधनेन सौभरस्य वृष्टिद्वयं फलमर्थान्महती वृष्टिः फलम्। एवमूर्गिति ऊ इति च निधनेन फले बाहुल्यं भवतीति पूर्वपक्षे प्राप्ते

समाधिरभिधीयते– पूर्वाधिकरणे च एकस्यैव रेवत्यृगाधारक-वारवन्तीयसाम्नः कर्मसम्बन्धस्य फलसम्बन्धस्य च कल्पनायां वाक्यभेदः स्यादिति गुणात् कर्मभेदो निर्णीतः, अत्र तु सौभरविधौ पूर्ववाक्ये यो वृष्टयादिकामः स एव हीषिति निधनविधायकवाक्येऽपि प्रत्यभिज्ञायते। अतः प्रत्यभिज्ञया पूर्ववाक्ये श्रुतान्येव फलानि "हीषिति वृष्टिकामाय" इति वाक्येऽप्यनूद्यन्ते। "वृष्टिकामाय" "अन्नाद्यकामाय" इत्यादौ चतुर्थी च वृष्ट्यादिफलभेदेन हीषादिनिधनभेदानां नियमार्थं युज्यते। अतः अत्र गुणान्न कर्मभेदः।

प्रयोजनञ्च पूर्वपक्षे वृष्ट्यर्थं सर्वसौभरानुष्ठानेऽपि वृष्ट्यन्तरार्थं हीषिति निधनयुक्तस्यैवानुष्ठानम्, अन्नाद्यकामार्थमूर्गिति निधनयुक्त-स्यैवानुष्ठानम्, स्वर्गार्थम् ऊ इति निधनस्यैवानुष्ठानम्, सिद्धान्ते तु फलभेदेन सौभरानुष्ठान एव निधनानां भेदेनानुष्ठानमिति विवेकः।

इति जैमिनीयन्यायमालायाः प्रकाशिकायाः

द्वितीये द्वितीयः पादः

# अथ तृतीयः पादः

इदानीं तृतीयः पादः प्रारभ्यते, आदौ प्रथमाधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

रथन्तरं साम सोमे भवेत्तद्वद् बृहज्जगत्।
ऐन्द्रवायवशुक्राग्रयणाग्राश्च ग्रहाः श्रुताः॥१॥

रथन्तरादिसंयुक्तमन्यत् कर्माथवा गुणः।
गायत्रादियुतात् पूर्वादन्यद्व्यावृत्तितो गुणैः॥२॥

सोमशब्दप्रकरणे ज्योतिष्टोमसमर्पके।
ग्रहाग्रत्वं गुणस्तत्र व्यावृत्तिस्तु परस्परम्॥३॥

### जैमिनीयन्यायमालाप्रकाशिका

पूर्वपादे शब्दान्तराभ्याससङ्ख्यासंज्ञागुणनिमित्तानां कर्मभेदानां विचारः कृतः। इदानीं प्रकरणान्तरात् कर्मभेदो वक्तव्यः, एकस्मिन्नपि प्रकरणे कर्मभेदस्यापवादश्च विचार्य इति तृतीयपादः प्रवर्तते। पूर्वपादे कृतिसाध्यत्वेन निश्चितविधेयताकगुणप्रयोज्यभेदविचारः "वाजिभ्यो वाजिनम्" इत्यादिवाक्य-विवेचनद्वारा कृतः। अत्र पादे कृतिसाध्यत्वेनानिश्चितविधेयताकगुणप्रयुक्त-भेदाभेदौ चिन्त्येत इति पादयोर्भेदः। प्रथमं कर्मभेदापवादनिरूपणपरं रथन्तराधिकरणं निरूप्यते। ज्योतिष्टोमप्रकरणे श्रूयते "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्। यदि बृहत्सामा शुक्राग्रान् यदि जगत्सामाऽऽग्रयणाग्रान्" इति। अस्य वाक्यस्यायमर्थः– ज्योतिष्टोमयागः यदि रथन्तरसामयुक्तः स्यात् तदा तत्र ग्रहाणां ग्रहणावसरे ऐन्द्रवायवग्रहस्य प्राथम्यं भवेत्, एवं यदि ज्योतिष्टोमः बृहत्सामोपेतः स्यात् तदा शुक्रग्रहणस्य प्राथम्यम्, यदि च जगत्सामोपेतः स्यात्तदा आग्रयणग्रहस्य प्राथम्यं भवेदिति। अत्र ग्रहशब्देन "ऐन्द्रवायवं गृह्णाति" इत्यादिवाक्यैः तत्तद्देवतार्थं दारुपात्रेषु

सोमरसस्य ग्रहणात् तदेव तत्तद्देवताकग्रहः इति बोध्यते। ज्योतिष्टोमे प्रातस्सवने ऐन्द्रवायवः, मैत्रावरुणः, आश्विनः, शुक्रः, मन्थी, आग्रयणः, उक्थ्यः, ध्रुव इत्यादिग्रहाणां ग्रहणं विहितम्। रथन्तरसाम, बृहत्साम, जगत् साम इत्यादीनि भिन्नभिन्नेषु ऋङ्मन्त्रेषूत्पन्नानि सामानि च विहितानि। ज्योतिष्टोमे माध्यन्दिनसवने रथन्तरबृहत्साम्नोर्विकल्पेन विधानं श्रूयते– "रथन्तरं वा पृष्ठं भवति बृहद्वा" इति।

अतः अत्र संशयः किमिदं प्रकृतं विषयवाक्यं "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान्" इति ज्योतिष्टोमात्कर्मान्तरं रथन्तरं सामेति बृहत्सामेति जगत्सामेति च विधत्ते उत ज्योतिष्टोम एव नैमित्तिकग्रहाग्रतारूपगुणं विधत्ते इति।

पूर्वपक्ष एवमुपस्थाप्यते– अत्र विषयवाक्ये "यदि रथन्तरसामा सोमः" इत्यत्र "सर्वं वाक्यं सावधारणम्" इति न्यायेन यदि केवलं रथन्तरसामा ज्योतिष्टोमः स्यात्तदा ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयादित्यर्थः लभ्यते, एतच्च प्रकृतज्योतिष्टोमयागे न सम्भवति। प्रकृतज्योतिष्टोमे गायत्रादिसामान्तराणां श्रवणात्। अतः अत्र प्रकृतज्योतिष्टोमातिरिक्तानि कर्मान्तराणि विधीयन्त इति पूर्वपक्षे प्राप्ते–

सिद्धान्तोऽभिधीयते–अनेन वाक्येन प्रकृतज्योतिष्टोम एव नैमित्तिकग्रहाग्रतारूपगुणमात्रं विधीयत इत्येव युक्तम्। यद्यपि ज्योतिष्टोमे गायत्रादिसामान्तराणि श्रूयन्ते तथापि पृष्ठस्तोत्रे रथन्तरादिसामानि विकल्पितानि। अतस्तेषान्तत्र विकल्पेन प्राप्तिरस्ति। तत्र एन्द्रवायवादिग्रहाग्रत्वगुणान्निमित्तीकृत्य परस्परव्यावृत्तिपूर्वकं रथन्तरादिसामानि नियम्यन्ते। अत्र विषयवाक्ये "रथन्तरसामा सोमः" इत्यत्र सोमपदश्रवणात् यदिशब्दस्वारस्याच्च प्रकृतसोमयागसम्बद्धमेव किञ्चिद् विधीयत इति ज्ञाते कर्मान्तरविधानपरत्वेन वर्णनमयुक्तम्। अतः पृष्ठस्तोत्रे बृहद्रथन्तरयोः साम्नोः वैकल्पिकत्वेन बृहत्पक्षे रथन्तरस्य, रथन्तरपक्षे बृहत्साम्नश्चायोगोऽस्तीति तद्व्यावृत्त्यर्थं वाक्यमिदं प्रवृत्तम्। एवञ्चात्र गुणमात्रविधिरिति चतुरस्रम्।

प्रयोजनञ्च पूर्वपक्षे प्रकृतवाक्यस्य कर्मान्तरविधायकत्वाङ्गीकाराज्ज्योतिष्टोमाङ्गभूतं सोमयागान्तरं रथन्तरमात्रसामकं बृहन्मात्रसामकमनुष्ठेयम्, एवं जगत्सामोपेतं यागान्तरञ्चानुष्ठेयम्। सिद्धान्ते तु प्रकृतज्योतिष्टोमे रथन्तरादिनिमित्ते ग्रहाग्रताविशेषगुणमात्रविधिरिति स्वीकारात्तदर्थं सोमयागान्तरं नानुष्ठेयं भवति। "यदि जगत्सामाऽऽग्रयणाग्रान्" एतद्वाक्ये जगत्साम्नः श्रवणं प्रकृतज्योतिष्टोमयागे जगत्साम्नः अविधानाद् यत्र विकृतौ[१००] वाक्यान्तरेण जगत्साम्नः प्राप्तिरस्ति तत्र जगत्साम्नः सम्भवादाग्रयणाग्रतागुणानुष्ठानमिति विवेकः।

इदानीं द्वितीयमधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

राजसूयं प्रकृत्येष्टिरवेष्ट्याख्या श्रुतात्र तु।
विप्रक्षत्रियविड्भेदाद्धविषां व्यत्ययः क्रमेः॥४॥

विप्रादेरनुवादः स्यात्प्रापणं वानुवादगीः।
व्यत्ययाय त्रयाणाञ्च राजत्वात्प्राप्तिरस्ति हि॥५॥

न राज्ययोगाद्राजत्वं क्षत्रियत्वन्तु तत्त्वतः।
अप्राप्तप्रापणं तस्मान्न रथन्तरतुल्यता॥६॥

### जैमिनीयन्यायमालाप्रकाशिका

राजसूयप्रकरणे "ईश्वरो वा एष दिशोनून्मदितोर्यद्दिशोऽनुव्यवस्थापयन्ति दिशामवेष्टयो भवन्ति दिक्ष्वेव प्रतितिष्ठत्यनुन्मादाये–"[१०१]त्येवं दिग्व्यवस्थापननिमित्तोन्मादपरिहारार्थतया "आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा" इति अवेष्टिनामकानि पञ्च कर्माणि समाम्नातानि। अत्र पिशङ्गी पष्ठौही नाम पिङ्गलवर्णा बालगर्भिणी, वशा नाम वन्ध्या, शितिपृष्ठो नाम यस्य पशोरुपरि

१००. अयं विचारः दशमाध्याये पञ्चमपादे पञ्चदशाधिकरणे विवेचयिष्यते।

१०१. तै.सं. १.२.१९

भागे श्वेतवर्णोऽस्ति तादृशपशुः। तस्यामवेष्टौ क्वचित् शाखायाम् "यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत्, यदि राजन्य ऐन्द्रम्, यदि वैश्यो वैश्वदेवम्"[१०२] इति। इदं वाक्यमस्याधिकरणस्य विषयवाक्यम्। अस्यायमर्थः– ब्राह्मणो यदि यजेत तदा पञ्चानामप्येतेषां हविषां वेद्यामासादने पञ्चमस्थाने पठितस्य बार्हस्पत्यस्य चरुद्रव्यस्य तृतीयस्थाने मध्य आसादनं कृत्वा क्रमेणाग्नेयादिकं हुत्वा मध्ये निहितं हविरभिघारयेत्, अभिघारणपूर्वकमन्ते तस्य होमः कर्तव्यः इति। एवं वैश्यकर्तृकप्रयोगे वैश्वदेवस्य चरुद्रव्यस्य मध्ये निधानम्, राजन्यकर्तृके प्रयोगे ऐन्द्रहविषो मध्ये निधानमन्येषां हविषां होमानन्तरमन्तेऽभिघारणपूर्वकं होमः कार्य इति ज्ञायते।

अत्र संशयः– किमनेन वाक्येन पञ्चमस्थाने श्रूयमाणस्य मध्ये स्थापनमित्येवं हविषां क्रमव्यत्ययमात्रं ब्राह्मणादिनिमित्तत्वेन विधीयतेऽर्थाद् गुणमात्रं विधीयते उत ब्राह्मणादिकर्तृकं कर्मान्तरं विधीयत इति।

अत्र कृतिसाध्यत्वेनानिश्चितविधेयताकगुणप्रयोज्यकर्मभेदविचार-परत्वात्पादाध्यायसङ्गती स्पष्टे। पूर्वाधिकरणेन सहापवादिकी सङ्गतिः।

अत्र पूर्वपक्षः एवमुपस्थाप्यते– पूर्वाधिकरणन्यायेन "यदि ब्राह्मणो यजेत" इत्यत्र यदिशब्दस्वारस्यात् प्रकृत एवं कर्मणि ब्राह्मणादिकर्तृक-त्वनिमित्तेन हविषां स्थानव्यत्ययरूपगुणमात्रं विधीयत इति युक्तम्। एतदेव श्लोक उक्तमाचार्यैः–"अनुवादगीः व्यत्ययाय" इति। अत्रावेष्टिकर्मसु "आग्नेयमष्टाकपालम्" प्रथमे, "ऐन्द्रमेकादशकपालम्" द्वितीये, "वैश्वदेवं चरुं" तृतीये, "मैत्रावरुणीमामिक्षाम्" चतुर्थे, बार्हस्पत्यं चरुं पञ्चमे स्थाने स्थापनीयमिति पाठक्रमेण प्राप्ते "यदि ब्राह्मणो यजेत" इति वाक्येन किञ्चिद्व्यत्यासमात्रमर्थात् ब्राह्मणकर्तृकप्रयोगे बार्हस्पत्यस्य तृतीये स्थाने स्थापनम्, राजन्यकर्तृकप्रयोगे ऐन्द्रस्य हविषः तृतीये स्थाने स्थापनम्, वैश्यकर्तृकप्रयोगे तृतीयस्थाने प्राप्तस्यैव वैश्वदेवहविषः तृतीयस्थाने स्थापनीयमिति तु नित्यानुवादः। अत्र नात्र कर्मान्तरविधिरिति पूर्वपक्षे प्राप्ते

१०२. मै.सं. ४.४.९

सिद्धान्तोऽभिधीयते–"यदि ब्राह्मणो यजेत" इति वाक्येन प्रकृतावेष्टिकर्मणः अतिरिक्तान्येव कर्माणि विधीयन्त इति युक्तम्। "राजा राजसूयेन स्वाराज्यकामो यजेत" इति हि राजसूययागः राजकर्तृकः श्रुतः। अत्र राजशब्दः क्षत्रियजातौ रूढः, न तु राज्ययोगनिमित्तः; अन्योन्याश्रयतापत्तेः। राज्यशब्दः राजशब्दनिमित्तः, राजशब्दश्च राज्यशब्दनिमित्तः इति राज्यशब्दज्ञानार्थं राजशब्दज्ञानमपेक्षते तज्ज्ञानार्थं राज्यशब्दज्ञानमपेक्षते। व्याकरणस्मृत्यनुसारेण राज्ञः कर्म इत्यर्थे राजशब्दाद् "गुणवचनब्राह्मणादिभ्यः कर्मणि च"[१०३] इति सूत्रेण ष्यङ्प्रत्यये निष्पन्नः। अतः राजशब्दो राज्ययोगनिमित्तो नास्त्यपि तु क्षत्रियजातिनिमित्त एव। श्रुतिरपि "राजानमभिषेचयेद्" इति राज्ञः सतो जनपदपरिपालनरूपराज्ययोगफलकाभिषेचनविधानात् क्षत्रियमात्रपरत्वं राजशब्दस्य बोधयति। एवञ्च क्षत्रियकर्तृकराजसूयान्तर्गतावेष्टिकर्मसु ब्राह्मणवैश्यकर्तृकत्वस्याप्राप्तत्वात् रथन्तराधिकरणोक्तन्यायस्यानवतारात् राजसूयाद् बहिः ब्राह्मणवैश्यकर्तृकं यथोक्तगुणविशिष्टं कर्मान्तरमपूर्वं विधीयत इत्येव स्वीकार्यम्। यदि शब्दस्तु निपातत्वाद् यदि ब्राह्मणकर्तृकं भवति कर्म तदैतद्गुणविशिष्टं भवेद्, वैश्यकर्तृकं भवति चेत् तदैतद् गुणविशिष्टं भवेदित्येवं तात्पर्यग्राहकः। प्रयोजनञ्च पूर्वपक्षे राजसूयस्यावेष्टिप्रयोग एव राजशब्दस्य प्रजापालकत्वार्थबोधकस्य ब्राह्मणादिसाधारणत्वात् त्रयाणामपि वर्णानां ब्राह्मणादि निमित्तेन हविषां स्थानव्यत्ययेन अनुष्ठानम्, सिद्धान्ते तु राजसूयाद् बहिरवेष्टिप्रयोगान्तरं ब्राह्मणादिकर्तृकं समस्तगुणविशिष्टम् "एतयाऽन्नाद्यकामं याजयेद्" इति विधेरन्नादिफलायानुष्ठेयमिति विवेकः।

इदानीं तृतीयमधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**वसन्त विप्र आदध्यात्तत्रैवोपनयीत तम्।**
**अनुवादः प्रापणं वाऽनुवादः कालसिद्धये॥७॥**

**अन्तरेणाग्निविद्याभ्यां कर्मानुष्ठित्यसम्भवात्।**
**क्लृप्ते आधानोपनीती प्राप्ता विप्रादयस्ततः॥८॥**

---

१०३. पा.सू. ५.१.१२४

**लौकिकाग्नेः पुस्तकाच्च तत्सिद्धेर्नास्ति कल्पनम्।
कालविप्रादिसंयुक्तमतोऽप्राप्तं विधीयते॥९॥**

## जैमिनीयन्यायमालाप्रकाशिका

"वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः, वर्षासु रथकारः" इति अनारभ्याधीतं वाक्यं तैत्तिरीयब्राह्मणे[१०४] श्रूयते। एवं "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्" इति श्रूयते। एतद्वाक्यद्वयमस्मिन्नधिकरणे विचार्यते। अत्र संशयः– किं प्रथमवाक्ये आधाने कर्मणि ब्राह्मणादिनिमित्ते वसन्तादिकालविधिरुत ब्राह्मणादिवसन्तादिविशिष्टमाधानं विधीयत इति। एवं द्वितीयवाक्ये किमुपनयनकर्मणि ब्राह्मणादिनिमित्ते वसन्तादिकालविधिरुत ब्राह्मणादिवसन्तादिविशिष्टमुपनयनं विधीयते इति।

पूर्वाधिकरणे राजसूयस्य क्षत्रियमात्रकर्तृकत्वात् ब्राह्मणवैश्ययोस्तदप्राप्तेः "यदि ब्राह्मणो यजेत" इत्यादिवाक्येषु गुणप्रयुक्तः कर्मभेदो निर्णीतः, अत्राधानस्य उपनयनस्य चाक्षेपादेव सर्वेषामपि प्राप्तिरस्तीति ब्राह्मणादिनिमित्तेन कालविशेषमात्रं विधीयत इति पूर्वपक्षोत्थानात् सङ्गतिः। कृतिसाध्यत्वेनानिश्चितविधेयताकगुणप्रयोज्यभेदनिरूपणपरत्वात्पादाध्यायसङ्गतिः।

पूर्वपक्ष एवमुपस्थाप्यते–"अग्निहोत्रं जुहोति" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यैरग्निहोत्रदर्शपूर्णमासादिकर्माणि विहितानि। तदर्थं कर्मणामग्निसाध्यत्वादग्निरपेक्षते एवं कर्मानुष्ठेयार्थप्रकाशिका विद्याप्यपेक्षते इति अग्नेः विद्यायाश्च क्रमशः आधानेनोपनयनेन च साध्यत्वाद् आधानमुपनयनञ्च तदन्यथानुपपत्त्या आक्षेपादेव लभ्येते। अतः आधानस्योपनयनस्य च प्राप्तत्वात्तत्र वसन्तादिकालविशेषं विधातुं ब्राह्मणादयोऽनूद्यन्त इति। एतदेवात्र "क्लृप्ते आधानोपनीती प्राप्ता विप्रादयस्ततः" इत्यनेनाचार्यैरुक्तम्।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–अत्र वाक्याभ्यां "वसन्ते ब्राह्मणोऽग्नीनादधीत" "वसन्ते ब्राह्मणमुपनयीत" वसन्तादिकालविशिष्टे

१०४. तै.ब्रा. १.१.२

ब्राह्मणादिकर्तृके आधानोपनयने विधीयेत इत्येव युक्तम्; अप्राप्तत्वाद्। अग्निहोत्रादिकर्माणि कर्मानुष्ठानार्थमग्निं विद्याञ्चापेक्षन्त इति तु युक्तम्, परन्तु तदर्थमाधानमुपनयनञ्चापेक्षन्त इति तु नास्ति; यतः लौकिकाग्नावपि कर्मानुष्ठानसम्भवात्, पुस्तकपठनेनापि तदपेक्षितविद्यार्जनस्य सम्भवाद्, अतः आधानस्योपनयनस्य चाप्राप्तेः वसन्तादिकालविशिष्टं ब्राह्मणादिकर्तृक-माधानमुपनयनञ्च विधीयेते।

प्रयोजनञ्च पूर्वपक्षे आधानोपनयनयोराक्षेपसिद्धत्वात् ब्राह्मणादिश्रवणस्य निमित्तार्थत्वाच्छूद्रस्याप्याधानमुपनयनञ्च युज्येते, सिद्धान्ते तु ब्राह्मणादि-वाक्यानामेव विधायकत्वात्त्रयाणामेव ब्राह्मणक्षत्रियवैश्यानामाधानस्योपनयनस्य च श्रवणादत्र शूद्रस्य नाधानं न वोपनयनमिति विवेकः।

इदानीं चतुर्थाधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

यद्दाक्षायणयज्ञेन स्वर्गकामो यजेत तत्।
कर्मान्तरं गुणो वोक्तदर्शादौ फलसिद्धये॥१०॥

गुणस्यास्याप्रसिद्धत्वात्कर्मभेदोऽत्र संज्ञया।
गुणो व्युत्पत्तिशेषाभ्यामावृत्त्याख्या न नाम तत्॥११॥

### जैमिनीयन्यायमालाप्रकाशिका

दर्शपूर्णमासयोः प्रकरणे श्रूयते "दाक्षायणयज्ञेन स्वर्गकामो यजेत"[१०५] इति। अत्र संशयः किं प्रकृतकर्मणः कर्मान्तरं विधीयते उत गुणमात्रं विधीयतेऽर्थात् दर्शपूर्णमासयागे एव फलसिद्धये गुणविधिरिति।

पूर्वाधिकरणे आधानस्योपनयनस्य चाप्राप्तत्वाद् वसन्तादि-कालविशिष्टब्राह्मणादिककर्तृकाधयानादिविधिः स्वीकृतः, अत्र दाक्षायणादि-गुणस्याप्रसिद्धत्वादपूर्वसंज्ञया कर्मभेदः स्यादिति पूर्वपक्षोत्थानात्सङ्गतिः। अनिश्चितविधेयताकस्य भावनाभेदस्य विचारपरत्वात्पादाध्यायसङ्गती स्पष्टे।

---

१०५. तै.सं. २.५.५.४

अत्र पूर्वपक्ष एवमुपस्थाप्यते– दाक्षायणशब्दस्य गुणविशेषे प्रसिद्ध्यभावादुद्भिदाधिकरणन्यायेन यागसामानाधिकरण्यान्नामत्वे निश्चितेऽपूर्वनामत्वात् संज्ञया कर्मभेद एव युक्तः इति।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते– दाक्षायणशब्दः व्युत्पत्त्यैव गुणविशेषवाचक इति ज्ञायते। दक्षस्येमे दाक्षाः कुशला ऋत्विजः, तत्कर्तृकमयनमावृत्तिः इति व्युत्पत्त्या दाक्षायणशब्दो निष्पन्नः दर्शपूर्णमासप्रयोगाणामावृत्तिर्दाक्षायणशब्दार्थः। आवृत्तिप्रकारस्तु तत्रैव वाक्यशेषाज्ज्ञायते–"द्वे पौर्णमास्यौ यजेत, द्वे अमावास्ये"[१०६] इति। अतः दाक्षायणशब्दस्यावृत्तिरूपगुणविशेषे प्रसिद्धत्वादुद्भिदाधिकरणन्यायस्याप्रवृत्तेः दाक्षायणशब्दस्य नामत्वाभावात् प्रकृत एव दर्शपूर्णमासकर्मणि स्वर्गफलसिद्ध्यर्थमावृत्त्याख्यगुणमात्रविधिरित्येव युक्तम्।

प्रयोजनञ्च पूर्वपक्षे "सौर्यं चरुं निर्वपेद्" इति विहितसौर्ययागवद् दर्शपूर्णमासाद् बहिः दाक्षायणयज्ञस्य प्रयोगः कार्यः, सिद्धान्ते तु दर्शपूर्णमासप्रयोगाद् बहिर्दाक्षायणयज्ञस्य नानुष्ठानमिति विवेकः।

इदानीं पञ्चममधिकरणं निरूप्यते–

जैमिनीयन्यायमाला

वायव्यः श्वेत आलभ्यो भूत्यै सौर्यं चरुं तथा।
निर्वपेद् ब्रह्मतेजोर्थमीषामुष्टिनिरुप्तयोः॥१२॥

गुणौ श्वेतं चरुं किं वा यावत् कथितकर्मणी।
फलार्थे, अथवा यागौ विशिष्टौ विहिताविह॥१३॥

श्वैत्यं वायुस्पृगीषायामाग्नेये च रविप्रभे।
चरुर्गुणश्चरुः स्थाली निर्वापस्तु तदाश्रितः॥१४॥

फलहानेर्न तत्किन्तु यावच्चोदितकर्म तत्।
द्रव्यादिरूपसम्पत्तेरवार्या यागतार्थिकी॥१५॥

---

१०६. माध्यन्दिनशतपथ ब्राह्मणम् २.४.१.६

## जैमिनीयन्यायमालाप्रकाशिका

"वायव्यं श्वेतमालभेत भूतिकामः"[१०७] "सौर्यञ्चरुं निर्वपेद् ब्रह्मवर्चसकामः"[१०८] इति वाक्यद्वयमनारभ्य श्रुतम्। एवं दर्शपूर्णमासप्रकरणे "ईषामालभते" "चतुरो मुष्टीन् निर्वपति" इति च श्रुतम्। एतदेवाचार्यैः प्रथमश्लोके उक्तम्। अत्र संशयः– "ईषामालभेत" इत्यत्र शकटगतलाङ्गल-दण्डवद्दीर्घकाष्ठविशेषस्य स्पर्शो विहितो दर्शपूर्णमासकर्मणि, तत्र "वायव्यं श्वेतमिति" वाक्ये श्वेतत्वगुणो विधीयते उत गुणफलविशिष्टं कर्मान्तरं विधीयतेऽथवा वायुदेवताकश्वेतपशुद्रव्यकयागो विधीयत इति। एवं "चतुरो मुष्टीन्निर्वपतीत्यत्र चतुर्णां मुष्टीनां निर्वापो विधीयते दर्शपूर्णमासकर्मणि, तत्र "सौर्यञ्चरुं निर्वपेद् ब्रह्मवर्चसकाम इति वाक्येन चरुः अर्थात् स्थाली गुणत्वेन विधीयते उत गुणफलविशिष्टं कर्मान्तरं विधीयतेऽथवा सूर्यदेवताकचरुद्रव्यकयागो विधीयते इति त्रेधा संशयः।

पूर्वपक्ष एवमुपस्थाप्यते– अनारभ्याधीतस्य प्रकृतिगामित्वाद् "वायव्यम्" "सौर्यम्" इति वाक्यद्वयविहितस्य दर्शपूर्णमाससम्बन्धेऽवगते आलभतेः स्पर्शार्थकत्वात् निर्वपतेश्चैकराशितः पृथक्करणार्थत्वात् दर्शपूर्णमासयागे आलम्भस्यार्थात् स्पर्शस्य निर्वापस्य च प्राप्तत्वात्फलस्यापि सर्वेभ्यो कामेभ्यो दर्शपूर्णमासयाग उक्त इति प्राप्तत्वादत्र गुणमात्रं विधीयतेऽर्थादीषां श्वेतगुणयुक्तां वायुस्पर्शवतीञ्च विधाय स्पृशेदिति "वायव्यम्" इति वाक्येन, मुष्टिनिर्वापं चरुणा स्थाल्यायुक्तं सौर्यतेजोयुक्तञ्च कृत्वा पृथुक्कुर्यादिति "सौर्यम्" इति वाक्येन गम्यत इति प्रथमः कल्पः।

द्वितीयस्तु गुणमात्रविधाने वाक्यभेदः स्यात् फलपदञ्चानर्थक-मनुवादमात्रं वा स्यादिति "वायव्य" मिति वाक्येन गुणफलविशिष्टमा-लम्भान्तरम्, "सौर्य-" मिति वाक्येन गुणफलविशिष्टं निर्वापान्तरं विधीयेत इति।

एवं द्वेधा पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते "वायव्यम्" "सौर्यम्" इति वाक्यद्वयेऽपि तद्धितेन देवतायाः प्राप्तिः, "श्वेतम्" "चरुम्" इति च

---

१०७. तै.सं. २.१.१.१
१०८. तै.सं. २.३.२.३

द्रव्यप्राप्तिरस्तीति द्रव्यदेवतयोः सम्बन्धस्य यागमन्तरानुपपन्नत्वात् "भूतिकामः" "ब्रह्मवर्चसकाम इति फलस्यापि श्रवणात् आलभतेः निर्वपतेश्च यागबोधकत्वमेव युक्तमिति "श्वेतद्रव्यकवायुदेवताकयागेन भूतिमर्जयेत्।" सूर्यदेवताकचरुद्रव्यकयागेन ब्रह्मवर्चसं भावयेदिति वाक्यार्थः सम्पद्यते।

प्रयोजनञ्च पूर्वपक्षे दर्शपूर्णमासप्रयोग एव गुणविशेषमात्रानुष्ठानं वाक्येन बोध्यते, सिद्धान्ते तु दर्शपूर्णमासप्रयोगाद् बहिः विकृतियागौ विधीयेते।

इदानीं षष्ठाधिकरणं निरूप्यते—

## जैमिनीयन्यायमाला

**वत्सालम्भो यजिः स्पर्शो वा वायव्यादिवद्यजिः।**
**स्पर्शः स्याद्देवराहित्यात्संस्कारः प्रायपाठतः॥१६॥**

## जैमिनीयन्यायमालाप्रकाशिका

"पयसाग्निहोत्रं जुहोति" इति विहितेऽग्निहोत्रे पयसो दोहनविषये "वत्समालभेत[१०९]" "वत्समुपसृजति"[११०] इत्यादि श्रूयते। अत्र संशयः "वत्समालभेत" इत्यत्र यागविधिरुत स्पर्शमात्रविधिरिति।

पूर्वपक्षस्तु पूर्वाधिकरणे वायव्यवाक्ये अलभतेः यागपरत्वमुक्तमतः तन्न्यायेनात्रापि यागान्तरं विधीयत इति।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते— वायव्यवाक्ये द्रव्यदेवतयोः प्राप्तिरस्तीति यागपरत्वमुक्तमत्र तु "वत्समालभेत" इत्यत्र देवतायाः प्राप्तेरभावाद् यागपरत्वं न युक्तम्, अग्निहोत्राङ्गभूतसंस्काराणां वत्समुपसृजति अर्थाद् वत्सं मातृसमीपं प्रापयति, "प्राचीमावृत्य गां दोग्धि" "दुह्यमानां गामनुमन्त्रयते" इत्यादिवाक्यैर्बोधो भवतीति तन्मध्ये पठितमिदं वाक्यं संस्कारमात्रं बोधयतीति निश्चितेऽत्रालम्भः स्पर्श एवेत्येव युक्तम्।

---

१०९. मै.सं. १.५.१
११०. मै.सं. १.५.१०

इदानीं सप्तमाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

**चरुर्भवति नैवार उपधत्ते चरुन्त्विति।**
**यागः स्यादुपधानं वा यागः शेषोक्तदैवतः॥१७॥**

**यागत्वानिश्चये शेषो नापेक्ष्योऽतो यजिः कुतः।**
**किन्तूपधानमात्रत्वं यावदुक्तं चरौ स्थितम्॥१८॥**

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे "वत्समालभेत"[१११] इति वाक्ये देवतायाः प्राप्तेरभावादालम्भः स्पर्शमात्रमिति निर्णीतमत्र तस्यापवादश्चिन्त्यते। अग्निचयने "इष्टकाभिरग्निं चिनुते" इति चयनं विधाय प्रकरणे "नैवारश्चरुर्भवति, बृहस्पतेर्वा एतदन्नं यन्नीवाराः" इत्याम्नाय "चरुमुपदधाती-" ति श्रूयते। उपधानमत्र यागः उत उपधानमात्रमिति संशये पूर्वपक्ष एवमुपस्थाप्यते–पूर्वाधिकरणे देवतायाः प्राप्तेरभावाद् "वत्समालभेत" इति स्पर्शमात्रस्यैव विधिर्युक्तः, इह तु "बृहस्पतेर्वा एतदन्नम्" इति देवतासम्बन्धस्य सत्वात् द्रव्यस्य च नीवारचरुरूपस्य च प्राप्तेः यागमन्तरा द्रव्यदेवतयोः सम्बन्धस्यानुपपत्तेः नीवारचरुद्रव्यकयागो विधीयते। अतः गुणनिमित्तः कर्मभेदः इति पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–"चरुमुपदधाती-" त्येव विधिः, विधिवाक्ये "वायव्यं श्वेतमालभेत" इतिवद्देवता तद्धितेन न प्राप्यते। वाक्यशेषाद्देवताप्राप्तिरिति चेत् स्यादन्योन्याश्रयः, विधिवाक्ये देवताया अश्रवणाद् यागविधित्वमेव न निश्चितम्, यागविधित्वे निश्चिते वाक्यशेषाद् देवताप्राप्तिर्निश्चीयते, वाक्यशेषाद्देवतायाः प्राप्तौ सत्यां "चरुमपदधाति" वाक्ये यागत्वनिश्चय इति। अतः नात्र यागविधिरपि तूपधानमात्रं विधीयते। यथा स्थण्डिलनिष्पत्त्यर्थतया "इष्टकाभिरग्निं चिनुते" इत्यनेन इष्टकानामुपधानं विधीयते तथा "चरुमुपदधाति" विधिना इष्टकानामुपरि चरोरुपधानं विधीयते–"उपधानसंस्कृतेन चरुणा स्थण्डिलं निष्पादयेदिति वाक्यार्थः सम्पद्यते।"

१११. मै.सं. १.५.९

इदानीमष्टमाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

पर्यग्निकृतः पात्नीवत उत्सृज्यत इत्यसौ।
यागो गुणो वा यागः स्यादन्वयाव्यवधानतः॥१९॥

प्रत्यभिज्ञातमालभ्यमनूद्योत्सर्गशब्दतः।
गुणं पर्यग्निकृत्याख्यं वक्त्युत्तरनिवृत्तये॥२०॥

न दुष्टा परिसङ्ख्यात्र चोदकात्प्राग्विधौ सति।
पर्यग्निकरणान्ताङ्गरीतिः क्लृप्तोपकारतः॥२१॥

## जैमिनीयन्यायमालाप्रकाशिका

तैत्तिरीयसंहितायां "त्वाष्ट्रं पात्नीवतमालभेत"[११२] इति द्रव्यदेवताविशिष्टो यागो विहितः, तत्प्रकरणे "पर्यग्निकृतं पात्नीवतमुत्सृजन्ती" ति श्रूयते। एतदस्याधिकरणस्य विषयवाक्यम्। अत्र संशयः वाक्येनानेन यागान्तरं विधीयते उत प्रकृतयागे गुणमात्रविधिरिति।

पूर्वपक्ष एवमुपस्थाप्यते– पूर्वाधिकरणे "चरुमुपदधाति" इत्यत्र देवतायाः प्राप्तेरभावान्न यागविधिरिति निर्णीतम्। "पर्यग्निकृतं पात्नीवतमुत्सृजन्ति" इत्यत्र तु "वायव्यं श्वेतमालभेत" इति वाक्यवत् पात्नीवतमिति तद्धितेन देवतायाः प्राप्तेः सत्वात्, पर्यग्निकृतं पात्नीवतमित्यनयोरव्यवहितयोरन्वयेन पर्यग्निकरणान्तमङ्गकलापैः संस्कृतस्य पशुद्रव्यकपात्नीवद्देवताको यागो वाक्येनानेन विधीयते इति युक्तम्। अत्र पर्यग्निकृतशब्दस्य व्यवहितेनोत्सृजन्तिपदेनान्वयः स्यादिति गौरवम्। एवञ्चात्र द्रव्यदेवताविशिष्टयागविधिरिति पूर्वपक्षः। एतदेवोक्तमाचार्यैः– "यागः स्यादन्वयाव्यवधानतः" इति। एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–"त्वाष्ट्रं पात्नीवतमालभेत" इति वाक्येन पत्नीवद्गुणकत्वष्ट्रदेवताकपशुद्रव्यकयागो विहितः। "पर्यग्निकृतं पात्नीवतमुत्सृजन्ती" ति वाक्ये पात्नीवच्छब्देन तस्यैव पशुद्रव्यस्य प्रत्यभिज्ञार्थात् परामर्शो भवतीति पर्यग्निकृतमुत्सृजन्तीति

११२. तै.सं. ६.६.६

अन्वयात् पात्नीवतमित्यनेन उत्सृजतिना च प्रकृत्यंशेन पात्नीवतयागमनूद्य प्रत्ययांशेन पर्यग्निकरणाख्यो गुणो विधीयते। पर्यग्निकरणं नाम ज्वलदङ्गारैर्भ्रामणम्। अत एवैतद्यद्यप्यतिदेशेनैव लभ्यते, तथापि उत्तराङ्गानामननुवृत्तिरत्र पर्यग्निकरणाख्यगुणविधानस्य फलम्। न चात्र विधेः इतरपरिसङ्ख्यापरत्वे स्वार्थत्यागः, अन्यार्थस्वीकारः, प्राप्तबाधश्चेति दोषत्रयं प्राप्नोतीति वाच्यम्; अतिदेशतः पदार्थानां प्राप्तेः पूर्वमेव पर्यग्निकरणान्ताङ्गकलापविधिस्वीकारादितराङ्गानां व्यावृत्तेरार्थिकत्वात्। प्रकृतौ यत्क्लृप्तोपकारकं पर्यग्निकरणं तदेवात्र विधीयते इति पर्यग्निकरणात् प्राचीनाङ्गानामनेन निवृत्तिर्न भवति किन्तु पर्यग्निकरणोत्तराङ्गानामेव व्यावृत्तिरनेन सिद्ध्यतीति युक्तम्। तस्मादनेन वाक्येन पर्यग्निकरणाख्यो गुण एव विधीयते न कर्मभेदः।

इदानीं नवमाधिकरणं निरूप्यते–

### जैमिनीयन्यायमाला

**यददाभ्यं गृहीत्वेति गृह्णात्यंशुमिति द्वयम्।**
**तद्यागो वा गुणो यागः स्याददाभ्यांशुनामतः॥२२॥**

**ग्रहयोरेव नाम स्यादानन्तर्याद्विधिस्तयोः।**
**गुणोऽतस्तस्य वाक्येन ज्योतिष्टोमाभिगामिता॥२३॥**

### जैमिनीयन्यायमालाप्रकाशिका

"एष ह वै हविषा हविर्यजति योऽदाभ्यं गृहीत्वा सोमाय जुहोति परा वा एतस्यायुः प्राण एति योंशुं गृह्णाति"[११३] इति तैत्तिरीयसंहितायां श्रूयते। अत्र "योऽदाभ्यं गृहीत्वा सोमाय यजते"[११४] "योंशुं गृह्णाति" इति वाक्यद्वयमनारभ्याधीतं विचार्यते। अत्र संशयः किमत्र कर्मान्तरविधिरुत गुणमात्रविधिरिति। पूर्वपक्ष एवमुपस्थाप्यते– अत्र वाक्ययोः "अदाभ्यम्" "अंशुम्" इति अपूर्वनामश्रवणात् संज्ञाधिकरणन्यायेन कर्मान्तरविधिरिति।

सिद्धान्तस्तु– "योऽदाभ्यं गृहीत्वा" "योंशुं गृह्णाति" इति वाक्याभ्यां

---

११३. तै.सं. ३.३४

११४. जैमिनीयन्यायमालाविस्तरेऽयं पाठो दृश्यते।

ग्रहणमेव विधीयते; प्रथमवाक्ये गृहीत्वेति पाठात्, द्वितीयवाक्ये च गृह्णातीत्येव श्रवणात्। अदाभ्यं गृहीत्वेति अदाभ्यस्य ग्रहणेनैवान्वय आनन्तर्यात्प्रतीयते। ग्रहणञ्च ज्योतिष्टोमगतस्य सोमरसस्य संस्काररूपो गुण:,

अत: ज्योतिष्टोमे गुणविधिरिति युक्तम्। यद्यपि वाक्यद्वयमप्यनारभ्याधीतमत: प्रकरणाज्ज्योतिष्टोमाङ्गत्वं नास्ति तथापि ज्योतिष्टोमसम्बद्धग्रहणद्वारा वाक्याज्ज्योतिष्टोमाङ्गत्वं निश्चीयते।

प्रयोजनञ्च पूर्वपक्षे यागान्तरविधानाङ्गीकारात्तयोश्च यागयो: प्राकरणिकैस्तत्समानजातीयशाखान्तरवाक्याज्ज्योतिष्टोमाङ्गत्वमिति यागाङ्गत्वात् यथाशक्तिन्यायविषयत्वम्। सिद्धान्ते तु ग्रहणस्यैव विधेयत्वावगमाद् ग्रहणमेवोक्तसंज्ञकं विधीयत इति प्रधानत्वाद्यथाशक्तिन्यायविषयत्वं नास्तीति विवेक:।

इदानीं दशमाधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**अग्निं चिनुत इत्यत्र यागो वा संस्कृतिर्यजि:।**
**लिङ्गेन यागनामत्वाद्यजिना चानुवादत:॥२४॥**

**रूढ्या द्रव्यस्य नामैतद्वह्नेराधानवच्चिति:।**
**संस्कार:, संस्कृते वह्नावग्निष्टोमो विधीयते॥२५॥**

**जैमिनीयन्यायमालाप्रकाशिका**

अत्राग्निचयनविधायकं वाक्यं विचार्यते– प्रकरणविशेषमनारभ्यैव श्रूयते– "य एवं विद्वानग्निं चिनुते"[११५], एवं तत्सन्निधौ "अथातोऽग्निमग्निष्टोमेनानुयजति, तमुक्थ्येन, तं षोडशिना, तमतिरात्रेणे" त्यादि श्रूयते। अत्र "अग्निं चितनुते" इत्यत्र अग्निनामको यागो विधीयते उत संस्कारमात्रमिति संशय:।

पूर्वपक्षस्त्वेवमुपस्थाप्यते– "अग्ने: स्तोत्रम्" "अग्ने: शस्त्रम्"[११६]

---

११५. तै.सं. ५.६.३

११६. ता.ब्रा. ६.३.५

इत्यादिलिङ्गैः "अग्निमग्निष्टोमेनानुयजति", इत्यत्र अग्निं यजतीति यजिसामानाधिकरण्याच्च" "उपांशु यजति" इतिवद्यागनामत्वे निश्चितेऽग्नि- नामको याग एवात्र विधीयत इति युक्तम्। "चिनुते" इत्याख्यातन्तु "इष्टकाभिरग्निं चिनुते" इति वाक्यप्राप्तस्य चयनस्य सोमयागविकृतित्वेन प्राप्तस्यानुवादः, तस्मादत्र याग विधिः।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते-लोके अग्निशब्दः वह्निद्रव्ये रूढः, लोकवेदाधिकरणन्यायेन वेदेऽपि वह्नेर्वाचक इति निश्चिते लिङ्गादिकल्प्याद्यागवाचित्वाद् रूढिः क्लृप्ततया बलीयसीति श्रुत्या लिङ्गस्य बाधः। अतः अग्निशब्दो नात्र यागपरः।

किन्तु "अग्निमादधीत" इति विहिताधानवच्चयनमत्राग्निसंस्कारः, संस्कृते च वह्नौ "अग्निमग्निष्टोमेन यजते" इत्यादिवाक्यैरग्निष्टोमादियागा विधीयन्ते। एवञ्चात्र वाक्येनाग्निचयनाख्यं संस्कारकर्म विधीयते न तु कर्मान्तरम्।

इदानीमेकादशाधिकरणं निरूप्यते-

### जैमिनीयन्यायमाला

**मासं जुहोत्यग्निहोत्रं गुणोऽन्यत्कर्म वा गुणः।**
**अनूद्य प्राप्तकर्मात्र मासोऽप्राप्तो विधीयते॥२६॥**

**उपसद्भिश्चरित्वेति नित्ये तासामसम्भवात्।**
**अनेकस्याविधेश्चान्यत् कर्म प्रकरणान्तरात्॥२७॥**

### जैमिनीयन्यायमालाप्रकाशिका

अत्र प्रकरणान्तरात्कर्मभेदो निरूप्यते। संवत्सरसाध्यः सत्रविशेषः कुण्डपायिनामयनमिति श्रुतः। तत्र "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां यजेत" इत्यादि श्रूयते। तत्र संशयः-किमत्र प्राप्तं नित्याग्निहोत्रमनूद्य मासलक्षणो गुणो विधीयते उत कर्मान्तरमिति।

पूर्वपक्ष एवमुपस्थाप्यते- अग्निहोत्रपदेन जुहोतिना चाग्निहोत्रं कर्म

"अग्निहोत्रं जुहोती"त्यत्र विहितं दूरस्थमपि प्राप्तत्वाद्विधानं पुनर्नापेक्षते, मासरूपो गुणस्तु न प्राप्तः, अतः तावन्मात्रमेव "दध्ना जुहोती-" त्यत्र दधिगुणवद्विधीयते। एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते– अत्र वाक्ये "उपसद्भिश्चरित्वा मासमग्निहोत्रम्" इति श्रुतम्, नित्याग्निहोत्रे तु उपसदामपि प्राप्तिर्नास्ति मासलक्षणगुणस्यापि प्राप्तिर्नास्ति। उपसदो नामाज्यद्रव्यका इष्टिविशेषाः, ज्योतिष्टोमे विहिताः, अत्राग्निहोत्रानुवादेनोभयोर्विधाने वाक्यभेदः स्यात्। यद्यपि ज्योतिष्टोमविकृतित्वात् सत्रे कुण्डपायिनामयनाख्ये उपसदाम्प्राप्तिः स्यात् किन्तु अग्निहोत्रस्य ज्योतिष्टोमविकृतित्वाभावादतिदेशेन प्रकरणेन वोपसदाम्प्राप्तिर्नास्तीति, उपसदस्तदानन्तर्यं मासश्चेति त्रयमत्र विधेयं स्यादिति वाक्यभेदो दुर्वारः। मासरूपस्य गुणस्यानुपादेयत्वाच्च मासरूपगुणमात्रमनेन विधीयत इति वक्तुं न शक्यते। उक्तञ्च–

"देशः कालो निमित्तञ्च फलं संस्कार्यमेव च।
इति मीमांसकाः प्राहुरनुपादेयपञ्चकम्।। इति"[११७]

तस्मान्नित्याग्निहोत्रकर्मणः प्रकरणादन्यत् कुण्डपायिनामयनं प्रकरणान्तरादत्र कर्मान्तरमेवेति सिद्धम्। प्रयोजनञ्च पूर्वपक्षे नित्याग्निहोत्रे यावज्जीवादिकालैर्मासस्य विकल्पः, कुण्डपायिनामयनेऽग्निहोत्राननुष्ठानञ्च, सिद्धान्ते तु कुण्डपायिनामयने एवैतत्कर्मविधानम्, नित्याग्निहोत्रे तु नास्ति कालविकल्प इति विवेकः।

इदानीं द्वादशाधिकरणं निरूप्यते–

जैमिनीयन्यायमाला

अष्टाकपालमाग्नेयं रुक्कामः प्राकृते फलम्।
कर्मान्यद्वा फलं भानात्पूर्वन्यायाप्रवेशनात्।।२८।।

मा भूद्भिन्नं प्रकरणं कर्मान्तरमसन्निधेः।
अनारभ्याधीतमेतद्रूपं त्वन्यूनमीक्षते।।२९।।

---

११७. अध्वरमीमांसाकुतूहलवृत्तिः–२.३.११

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वाधिकरणे प्रकरणान्तरात् कर्मभेद उक्तः। प्रकरणान्तरञ्च सन्निध्यभावसहकृतोपस्थित्यभावः। कालस्यानुपादेयत्वात् विधातुं न शक्यत इति मासाग्निहोत्रस्य कर्मान्तरत्वं पूर्वाधिकरणे निर्णीतम्। अस्मिन्नधिकरणे तस्यैव प्रपञ्चो भवति।

तैत्तिरीयसंहितायाम् "आग्नेयमष्टाकपालं निर्वपेद्रुक्काम:"[११८] इत्यनारभ्याधीतं वाक्यं श्रूयते। अत्र संशयः- दर्शपूर्णमासयागे "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति" इति आग्नेययागो विहितः, तस्यैव फलमनेन वाक्येन विधीयत उत कर्मान्तरमिति। पूर्वपक्ष एवमुपस्थाप्यते-"आग्नेयमष्टाकपालम्" इति दर्शपूर्णमासीयाग्नेययागस्य द्रव्यदेवतयोरैक्यात्तमनूद्य फलमात्रं विधीयते, इदं वाक्यमनारभ्याधीतमिति प्रकरणमेव नास्त्यस्य वाक्यस्येति पूर्वाधिकरणोक्तप्रकरणान्तरन्यायानवतारात् कर्मान्तरत्वे गौरवात् फलमात्रविधिरिति। एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते-

"यदाग्नेयोऽष्टाकपालः" इदं वाक्य दर्शपूर्णमासप्रकरणे पठितम्, "आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः" इतीदं वाक्यन्तु अनारभ्याधीतमिति यद्यपि वाक्ययोः प्रकरणं भिन्नं भिन्नमिति प्रकरणान्तरत्वं वक्तुं न शक्यते तथापि अनारभ्याधीतत्वादेवास्य प्रकरणस्थवाक्येन सहासन्निधिरस्त्येवेति सन्निध्यभावसहकृतोपस्थित्यभावोऽस्त्येवेति प्रकरणान्तरस्याप्युपस्थित्यभावप्रयोजकत्वेनैव कर्मभेदकत्वादत्र प्रकरणान्तरवदसन्निधेरेवात्र कर्मभेदकत्वम्। किञ्च फलमपि कालवदनुपादेयमेवान्यथा साधनवदफलत्वप्रसङ्गात्, फलं विधातुं न शक्यते। तस्मादत्र वाक्येन रुक्कामेष्टिरर्थात्तेजस्कामेष्टिः कर्मान्तरमेवेति युक्तम्। प्रयोजनञ्च पूर्वपक्षे "आग्नेयमष्टाकपालं निर्वपेद् रुक्कामः" इत्यत्र फलमात्रं विधीयत इत्यङ्गीकाराद् रुक्फलार्थमर्थात्तेजःप्राप्त्यर्थं न पृथक्प्रयोगः किन्तु गुणफलवद्दर्शपूर्णमासप्रयोगेणैव तत्सिद्धिः, सिद्धान्ते तु कर्मान्तरत्वात् पृथक्प्रयोग इति विवेकः।

---

११८. तै.सं. २.३.३

इदानीं त्रयोदशाधिकरणं निरूप्यते–

## जैमिनीयन्यायमाला

**यजेत्समे पौर्णमास्यां यावज्जीवं तथैतया।**
**अन्नाद्यकाम इत्यादौ कर्मभेदोऽथवा गुणः॥३०॥**

**विध्युपादानयोरैक्याद्देशादेरनुपत्तितः।**
**आवश्यके कर्मविधौ तद्भेदः पुनरुक्तितः॥३१॥**

**देशादियोगस्याप्राप्तेर्विधिर्न ह्येकता तयोः।**
**पुंशब्दयोर्व्यापृतित्वात् पुनरुक्त्या त्वनूद्यते॥३२॥**

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वत्राधिकरणाभ्यां कालफलाद्यनुपादेयगुणयुक्तानां वाक्यानां कर्मभेदकत्वं निर्णीतम्, इदानीं तदपवादो विचार्यते।

दर्शपूर्णमासप्रकरणे "समे यजेत" "पौर्णमास्यां यजेत" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" इति "श्रूयते, एवमवेष्टिप्रकरणे" "एतयान्नाद्यकामं याजयेत्", इति देशः कालः, निमित्तम् फलम्, आदिपदेनार्थात् प्रथमश्लोके इत्यादौ इत्यत्रादिपदेन दर्शपूर्णमासप्रकरणे श्रुतम् "शेषं स्विष्टकृते समवद्यति" इति संस्कारः इत्यनुपादेयपञ्चकम्। देशः, कालः, निमित्तम्, फलम्, संस्कारः–एते अनुपादेयाः, अनुपादेयत्वादेव न विधेयाः इति पूर्वत्र निर्णीतम्। अत्र संशयः– अत्रोक्तवाक्येषु अनुपादेययुक्तत्वात् कर्मान्तराणि विधीयन्ते उत गुणमात्रं विधीयते इति।

पूर्वपक्ष एवमुपस्थाप्यते– "समे यजेत" इत्यादिवाक्येषु देशादयोऽनुपादेया उक्ताः, अनुपादेयत्वादेव अविधेयाः, उपादानविधानयोरैक्यात्, देशादीनां विधेयत्वानुपपत्त्योक्तवाक्यैः कर्म विधीयत इत्यवश्यमङ्गीकार्यम्, तथा सति दर्शपूर्णमासप्रकरणे एवोक्तवाक्यानां श्रवणाद्दर्शादेश्च पूर्वं विहितत्वात् विधिपरपुनःश्रवणात्मकाभ्यासात् कर्मभेद एव युक्तः। तस्मादत्र कर्मभेद इति।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–देशादय: "समे यजेत" इत्यादिवाक्योक्ता: अनुपादेया:, अनुपादेयत्वादेवाविधेया इति तु सत्यम्, परन्तु तेषां सम्बन्धोऽप्राप्त:, यागस्तु प्राप्त एवात: प्राप्तं यागमनूद्य देशादीनां सम्बन्धो वाक्यैरत्र विधीयते इति युक्तम्। एतदेवाचार्यै: "देशादियोगस्याप्राप्ते" रित्युक्तम्, अत्र योगो नाम सम्बन्ध:। अत: देशादे: उपादेयत्वासम्भवेऽपि विनियोगविधिविषयत्वं सम्भवत्येव, उपादानविधानयोरर्थादु- पादानविधिशब्दयो: भिन्नार्थकत्वात्। उपादानं नामाननुष्ठितस्यानुष्ठानम्, तच्च कर्मविषय: पुरुषव्यापार:, अत: देशादयश्चाननुष्ठेयत्वाद् अनुपादेया:। विधानं नामाप्रवृत्तप्रवर्तनम्, तच्च पुरुषविषय: शब्दव्यापार:, अत: देशादीनामपि सम्बन्धमुखेन विधिविषयत्वं सम्भवत्येव। "मासमग्निहोत्रं जुहोती" त्यत्र तु प्रकरणान्तरात्- सन्निध्यभावप्रयुक्तोपस्थित्यभावात्कर्मान्तरत्वमुक्तम्। अत्र तु एकस्मिन्नेव प्रकरणे श्रुतत्वात् सन्निधे: सत्वादनुपादेयगुणयोगेऽपि कर्मान्तरत्वं नास्ति, अपितु कर्मण: प्राप्तत्वात् पुनरुक्त्यानूद्य देशादीनां सम्बन्धो विधीयते।

प्रयोजनञ्च पूर्वपक्षे समादिवाक्यानां कर्मान्तरविधायकत्वेन स्वीकारात् प्रतिवाक्यमेकं कर्म, सिद्धान्ते तु सर्वत्रैकमेव कर्म, समादिदेशानां परं नियम:।

इदानीमन्तिमाधिकरणं निरूप्यते–

**जैमिनीयन्यायमाला**

**दर्शपूर्णमासप्रोक्त आग्नेय: केवलोऽप्यसौ।**
**दर्शे यदिति वाक्याभ्यां कर्मान्यद्वानुवादगी:॥३३॥**

**अभ्यासादन्यकर्मत्वं दर्शेष्टौ द्वि: प्रयुज्यताम्।**
**एकत्वप्रत्यभिज्ञानादनूक्त्यैन्द्राग्नसंस्तुति:॥३४॥**

**इति श्रीमाधवाचार्यविरचितायां जैमिनीयन्यायमालायां**
**द्वितीयाध्यायस्य तृतीय: पाद:॥**

## जैमिनीयन्यायमालाप्रकाशिका

पूर्वत्र द्वितीयपादस्य तृतीयेऽधिकरणे "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति"[११९] इत्यत्र कालसंयुक्तद्रव्यदेवताविशिष्टो याग आग्नेययागो विधीयते इति विद्वद्वाक्यानामनुवादकत्वनिर्णये उक्तमेव। अत्र कालद्वययुक्त आग्नेययागो विहितः। पुनः "स एतमैन्द्राग्नमेकादशकपालममावास्यायामपश्यत्" इत्युपक्रम्य श्रूयते– "यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति"[१२०] इति। इदमधिकरणस्यास्य विषय वाक्यम्। अत्र संशयः– कालद्वययुक्ताग्नेयाद् यागान्तरमनेन वाक्येन विधीयते उत स एवानूद्यते इति। पूर्वपक्ष एवमुपस्थाप्यते–कालसंयुक्तः द्रव्यदेवताविशिष्टो यागः वाक्यद्वयेऽपि प्रतीयते, परन्त्वयमेव विशेषः एकस्मिन् वाक्ये कालद्वयसंयुक्तः, अन्यस्मिन् वाक्ये केवलममावास्याकालयुक्तः, सर्वथापि अमावास्यासंयुक्तो यागो वाक्यद्वयेऽपि प्रतीयते, तत्र कस्मिन् वाक्येऽमावास्यापदमनुवादकम्, कस्मिन्वाक्ये विधायकमित्यत्र विनिगमानाविरहादानर्थक्यभयाच्च द्वयोरपि वाक्ययोर्विधायकत्वं स्वीकार्यमिति कर्मभेद एवाभ्यासात् सिद्ध्यति। अतः दर्शेष्टौ अर्थादमावास्यायां द्विवारमाग्नेययागोऽनुष्ठेयः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते– "यदाग्नेयोऽष्टाकपालोऽमावास्यायाम्" इति द्वयोरपि वाक्ययोरेकस्यैव यागस्य प्रत्यभिज्ञानादेककालसंयुक्तवाक्यस्यार्थात् केवलामावास्यासंयुक्तकर्मप्रतिपादकवाक्यस्यैवानुवादकत्वं युक्तम्। विनिगमनञ्च अस्य वाक्यस्योपक्रमे "स एतमैन्द्राग्नमेकादशकपालममावास्यायामपश्यत्" इति श्रवणादस्य वाक्यस्यैन्द्राग्नयागस्य स्तुतिपरत्वेन नेतुं शक्यत्वाद्। यद्यप्यमावास्यायामाग्नेययागो भवति तथापि केवलेनाग्निना संयुक्तः स साधुर्भवति, इन्द्रसहितोऽग्निः समीचीनतरः। तस्मादैन्द्राग्नयागोऽनुष्ठेय इति ऐन्द्राग्नयागः स्तूयते। एतदेवोक्तमाचार्यैः– "अनूक्त्यैन्द्राग्नसंस्तुतिः" इति। अत्रानूक्त्या अनुवादेनेत्यर्थः। एवञ्च कालद्वयसंयुक्तवाक्यस्य विधायकत्वमेककालसंयुक्तवाक्यस्यानुवादकत्वमित्यत्र विनिगमनायाः सत्वादभ्यासाधिकरणन्यायस्याप्रसक्तेः नात्र कर्मभेदः।

---

११९. तै.सं. २.५.२.३

१२०. तै.सं. २.६.३

अत: दर्शेष्टौ आग्नेययागस्यापि सकृदेव प्रयोग: कार्य इति सिद्धान्त:।

इत्थं जैमिनीयन्यायमालाप्रकाशिकायां

द्वितीयाध्यायस्य तृतीय: पाद:॥३॥

# अथ द्वितीयाध्यायस्य चतुर्थ: पाद:

## जैमिनीयन्यायमाला

**यावज्जीवं जुहोतीति धर्म: कर्मणि पुंसि वा।**
**कालत्वात् कर्मधर्मोऽत: काम्य एक: प्रयुज्यताम्॥१॥**

**न कालो जीवनन्तेन निमित्तप्रविभागत:।**
**काम्यप्रयोगो भिन्न: स्याद्यावज्जीवप्रयोगत:॥२॥**

## जैमिनीयन्यायमालाप्रकाशिका

द्वितीयतृतीयपादाभ्यां शब्दान्तराभ्याससङ्ख्यासंज्ञागुणप्रकरणान्तर-निमित्तै: कर्मभेदो निरूपित:। तदपवादोऽपि विवेचित:। इदानीं चतुर्थे पादे प्रसङ्गात्प्रयोगभेदाभेदौ विविच्येते।

तत्रादौ प्रथमाधिकरणं निरूप्यते– यावज्जीवमित्यादिना। "अग्निहोत्रं जुहुयात्स्वर्गकाम:" इत्येकं वाक्यम्, "यावज्जीवमग्निहोत्रं जुहोति" इत्यपरं वाक्यम्। एवं "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्येकं वाक्यम्, "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" इत्यपरं वाक्यम्, "वसन्ते वसन्ते ज्योतिषा यजेत" इत्येकम् "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यपरम् इत्येवं काम्यस्वर्गफलविशिष्टानि कानिचन वाक्यानि यावज्जीवपदघटितानि कानिचन वाक्यानि बाह्वृचब्राह्मणे श्रूयन्ते। यावज्जीववाक्यमस्याधिकरणस्य विषय-वाक्यम्। अत्र संशय:- विहितकाम्यप्रयोगस्यैकस्य यावज्जीव-कालमभ्यासो विधीयते उत जीवने निमित्तेऽग्निहोत्रादीनां प्रयोगाणां काम्यादन्येषां विधानमिति। तदर्थं चिन्त्यते– यावज्जीवमिति कर्मधर्मत्वेन विधीयते उत पुरुषधर्मत्वेनेति। पूर्वपक्ष एवमुपस्थाप्यते– यावज्जीवशब्द: मरणावधिकालपर:,

कालस्य च "पौर्णमास्यां यजेत" इत्यादौ कर्म-सम्बन्धित्वेन विधानं द्वितीयतृतीयत्रयोदशे स्वीकृतमेव। अतः प्रकृतेऽपि कर्मधर्मत्वेनैव यावज्जीवमर्थान्मरणावधिकालसम्बन्धो विधीयते वाक्येनानेनेति वक्तव्यम्। "अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यादिवाक्यैः काम्याग्निहोत्रादिकर्माणि प्राप्तान्येव। अतः "यावज्जीवमग्निहोत्रं जुहोती-" ति वाक्ये जुहोतिनानूदिते कर्मणि अप्राप्तकालसम्बन्धमात्रं विधीयते। अतः काम्यप्रयोगादन्यो नित्यप्रयोगो न सिद्ध्यति, मरणावधिकालपर्यन्तं काम्यप्रयोगोऽभ्यसितव्यः, एवञ्च विहितकाम्यप्रयोगस्यैकस्यैव यावज्जीवकालमभ्यासो विधीयते।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते—"यावज्जीवं जुहोती-" त्यत्र यावज्जीवशब्दः शक्त्या कालं न बोधयति, लक्षणया परं मरणावधिकालस्य बोधकः स्यात्। यावज्जीवशब्दस्य मुख्योऽर्थः कृत्स्नजीवनमेव। शक्यार्थे सम्भवे सति लक्ष्यार्थग्रहणमन्याय्यमिति न्यायाद्यावज्जीवशब्दस्य कृत्स्न-जीवनमित्येवार्थः स्वीकार्यः। जीवनञ्च पुरुषधर्मः न तु कर्मधर्मः। अतः पुरुषधर्मभूतकृत्स्नजीवनं निमित्तीकृत्यात्राग्निहोत्रप्रयोगो विधीयते, तेन च काम्यप्रयोगादन्यो नित्यप्रयोगः सिद्ध्यति, न तु कर्मभेदः सिद्ध्यति; शब्दान्तरादीनां कर्मभेदकानामश्रवणात्। एकस्मिन् वाक्ये काम्यस्वर्गस्य निमित्तत्वम्, अन्यत्र जीवनस्य निमित्तत्वमिति निमित्तविशेषसद्भावेनाविशेषपुनः श्रवणरूपाभ्यासस्याभावादभ्यासादपि कर्मभेदो न सिद्ध्यति। नित्यकाम्ययोः प्रयोभेदस्तु सिद्ध्यत्येव।

प्रयोजनञ्च पूर्वपक्षे कामनावत एवाग्निहोत्रादिकर्मणः प्रयोगः, सोऽपि यावज्जीवमनुष्ठित एव काम्यफलाय कल्पते, सिद्धान्ते तु कामनारहितस्यापि नित्यप्रयोगः यावज्जीवं सायं प्रातः विहितकालेऽनुष्ठेयः, कामनावतस्तु काम्यप्रयोगः सकृत्कृत एव फलाय कल्पत इति विवेकः।

इदानीं द्वितीयमन्तिममधिकरणं निरूप्यते—

**जैमिनीयन्यायमाला**

**शाखाभेदात्कर्मभेदो न वा कर्मात्र भिद्यते।**
**दृष्टं काठकनामादि बहुभेदस्य कारणम्॥३॥**

ग्रन्थद्वारादिना ह्येते युज्यन्ते भेदहेतवः।
रूपादिप्रत्यभिज्ञानादभिन्नं कर्म गम्यते॥४॥

इति श्रीमाधवाचार्यविरचितायां जैमिनीयन्याय-
मालायां द्वितीयाध्यायस्य चतुर्थः पादः॥४॥
द्वितीयोऽध्यायश्च समाप्तः॥

## जैमिनीयन्यायमालाप्रकाशिका

"अनन्ता वै वेदाः" इति श्रुतेः सन्ति शाखाभेदेन भिन्नाः वेदाः– काठकम्, शाकलम्, पैप्पलादम्, तैत्तिरीयम्, काण्वम्, माध्यन्दिनम्, कालापम् इत्यादयः। तत्राग्निहोत्रादि कर्माणि प्रायः सर्वत्र विहितानि। अत्र संशयः– प्रतिशाखं कर्म भिद्यत उत एकमेवेति।

पूर्वपक्ष एवमुपस्थाप्यते– "काठकाग्निहोत्रम्" "कालापाग्निहोत्रम्" इति शाखाभेदेन संज्ञाभेदाः, गुणभेदाः– एकस्यां शाखायां "वपया प्रचर्याग्नीषोमीयमेकादशकपालम्", अन्यस्यां शाखायां "द्वादशकपालम्" इति श्रूयन्ते संज्ञागुणादिनिमित्तैः कर्मभेद प्रतिशाखं युक्तः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते– यागस्य द्वे रूपे द्रव्यं देवता चेति। प्रतिशाखमग्निहोत्रादिकर्मणां रूपैक्यात् "सोऽयं गकारः" इति प्रत्यभिज्ञया वर्णनित्यत्वं यथा सिद्ध्यति तथा तदेव कर्म शाखायामस्यां श्रूयते इति प्रत्यभिज्ञया प्रतिशाखं कर्म न भिद्यत इति निश्चिते संज्ञाभेदाः ग्रन्थभेदमूलतया सङ्गच्छन्ते इति शाखभेदेऽपि कर्म न भिद्यत इत्येव सिद्धान्तः।

प्रयोजनञ्च पूर्वपक्षे सर्वशाखास्थाङ्गोपसंहारो न सिद्ध्यति, सिद्धान्ते तु शाखाभेदेऽपि कर्म न भिद्यत इति स्वीकारात् सर्वशाखास्थाङ्गोपसंहारः सिद्ध्यति इति विवेकः।

एवमत्र द्वितीयाध्याये चतुर्भिः पादैः कर्मभेदः सप्रपञ्चं निरूपितः।

इदानीमस्य शास्त्रस्याधारभूतोऽध्ययनविध्यर्थः सविस्तरं मतभेदपुरस्सरं विचार्यते–

स्वाध्यायैकप्रवेद्याय ब्रह्मणे परमात्मने।
सच्चिदानन्दरूपाय नमः स्वाभीष्टसिद्धये।।

धर्मार्थकाममोक्षाणामाकरो वेदो नित्योऽपौरुषेयश्चेति वैदिकानां मीमांसकानां घण्टाघोषः प्रसिद्ध एव। तस्याध्ययनं नित्येनाध्ययनविधिनैव विधीयते, अन्यथाध्ययने नियतप्रवृत्तिर्न स्यात्, न स्याच्चानध्ययने प्रत्यवायः।[१२१] वेदाध्ययनस्य काम्यत्वे हि अर्थावबोधे सति कामना, कामनायां सत्यामध्ययन-प्रवृत्तस्यार्थावबोध इति परस्पराश्रयता स्यात्।

अतः अध्ययनविधिः कः? तेन किमर्थं किं विधीयते इति किञ्चिद्विचार्यते। "स्वाध्यायोऽध्येतव्यः"[१२२] अयमध्ययनविधिः तैत्तिरीयशाखायां श्रुतः। "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इदं वाक्यं च महाभाष्येऽध्ययनविधायकं वाक्यमुद्धृतम्। न च वाक्यद्वयं निरर्थकम् इति वाच्यम्; प्रथमेनाध्ययनं विधीयते द्वितीयेन च तस्य निष्कारणकत्वेन नित्यत्वं विधीयत इति पौनरुक्त्यभावात्। शाखाभेदेन विधिभेदाद्वेति न दोषः।

स्वाध्यायोऽध्येतव्य इत्यत्र पदद्वयम्, स्वाध्यायः अध्येतव्यश्चेति। स्वाध्यायो नाम वेदः; अध्युपसर्गकेङ्धातोः "इङश्च" इति सूत्रेण घञि निष्पन्नः स्वाध्यायशब्दः आम्नायशब्दवद् वेदवाचकः। अधीयत इत्यध्यायः, स्वश्चासावध्यायश्चेति स्वाध्यायः स्वशाखेत्यर्थः। अध्येतव्य इत्यत्राध्ययनं विधीयते। अध्ययनं त्रिविधम्– ग्रहणाध्ययनम्, धारणाध्ययनम्, जपाध्ययन-ञ्चेति।

अत्र "स्वाध्यायोऽध्येतव्य" इत्यत्र ग्रहणाध्ययनमाद्यं विधीयते। अत्र षट् पक्षाः सन्ति–

१. अर्थज्ञानरूपदृष्टप्रयोजनाय अध्ययनं विधीयत इति न्याय-

१२१. योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।। मनुस्मृतिः २/१६४
इति वेदानध्ययने प्रत्यवायः स्मर्यते।

१२२. तैत्तिरीयारण्यके २/१५

मालाकाराणां वार्तिककाराणां भाष्यकाराणां मतत्वेन प्रसिद्धः पक्षः। शाङ्करवेदान्ते भामतीकारैः श्रीवाचस्पतिमिश्रैरपि समर्थितः।

२. स्वाधीनोच्चारणक्षमत्वरूपाक्षरग्रहणार्थमध्ययनं विधीयत इति सायणाचार्याणाम्, अध्वरमीमांसाकुतूहलवृत्तिकाराणां शाङ्करवेदान्ते विवरणाचार्याणाम्, श्रीभाष्यकाराणाञ्च पक्षः।

३. अक्षरग्रहणपरम्परयोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते, नियमफलन्तु त्रैवर्णिकानामेवाधिकारः न तु शूद्राणामित्यधिकारनियमसिद्धिरेवेति शास्त्रदीपिकाकाराणां पक्षः।

४. फलवत्कर्मानुष्ठानोपयोगिज्ञानोपायतया स्वाध्यायोध्येतव्य इति प्रत्यक्षश्रुत्याध्ययनं विधीयत इत्यपूर्वविधिरेव सन् उपायान्तरप्रतिक्षेपान्नियमः फलतीति सिद्धान्तचन्द्रिकाकाराणां पक्षः।

५. "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इति साक्षाच्छ्रुताध्यापनविधिप्रयुक्तं वेदाध्ययनम्, न तु स्वविधिप्रयुक्तमिति श्रीप्रभाकरमिश्राणां पक्षः।

६. "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।" इति स्मरणानुमितः "शिष्यमुपनीय वेदाध्यापनेनाचार्यकं भावयेद्" इत्येवं रूपस्याचार्यकरणविधेः प्रयुक्तमध्ययनमिति शालिकनाथमिश्राणां पक्षः।

सम्प्रति एतेषां पक्षाणां विवेचनपूर्वकं मतभेदे को हेतुरित्यपि विविच्यते।

अर्थज्ञानरूपदृष्टप्रयोजनायाध्ययनं विधीयत इति प्रथमपक्षे अयमाशयः– अध्येतव्य इत्यत्र विधौ कर्मणि तव्यप्रत्ययः। कर्म च चतुर्विधम्– उत्पाद्यं, प्राप्यं, विकार्यं संस्कार्यञ्चेति। यथा घटं करोतीत्यत्र घट उत्पाद्यः, ग्रामं गच्छतीत्यत्र ग्रामः प्राप्यः, व्रीहीनवहन्तीत्यत्र व्रीहिषु विकार्यत्वम्, व्रीहीन् प्रोक्षतीत्यत्र व्रीहिषु संस्कार्यत्वम्। प्रकृते स्वाध्याय-

पदवाच्यस्य वेदस्य नित्यत्वात् उत्पाद्यत्वविकार्यत्वयोरभावे आप्यत्वं संस्कार्यत्वं वा स्यात्। अध्ययनञ्च भावार्थाधिकरणन्यायेन भावनायां करणत्वेन अन्वेति। भावार्थाधिकरणञ्च– "भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते"[१२३] इति सूत्रेण धात्वर्थ एव फलभावनाकरणत्वेन विधीयते इति निरूपयति। सूत्रस्याक्षरार्थस्तु "**भावार्थाः**– प्रत्ययेन भावनाप्रतिपादकाः प्रकृत्या कर्मवचनाश्च" "यजेत" "जुहुयात्" इत्यादयो ये, तेभ्य एव **क्रिया**-कार्यमपूर्वं, **प्रतीयेत**-कल्प्येत। **हि**-यतः **एषः**-धात्वर्थ एव **विधीयते**-फलभावनाकरणत्वेन विधीयते। एवञ्च "अध्येतव्य" "इत्यस्यार्थः" अध्ययनेन स्वाध्यायं प्राप्नुयाद् "अध्ययनेन स्वाध्यायं संस्कुर्यादि" ति वा स्यात्। तत्राध्ययनेनावाप्तस्य संस्कृतस्य वा स्वाध्यायस्य स्वतोऽपुरुषार्थत्वात् फलाकाङ्क्षायाम् किमर्थज्ञानमेव फलमुत स्वर्गादिकमेव फलमिति विशये पूर्वपक्ष एवमुदेति– "स्वाध्यायाध्ययनेन अर्थज्ञानं भावयेदि"त्यङ्गीकारे-विधिर्निरर्थकः स्यात्। "अध्येतव्य" इत्यत्र विधिः श्रूयते, विधित्वस्य च प्रयोजकानि रूपाणि त्रीणि–त्रैकालिकाप्राप्तिपाक्षिकप्राप्तिसमुच्चितप्राप्तय इति। तथाहि–वेदाध्ययनस्यार्थज्ञानार्थत्वे त्रैकालिकाप्राप्तिस्तु नास्त्येव, यतः–विमतं वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वाद् भारताध्ययनवदित्यनुमानेनैव सिद्धेः। पाक्षिकाप्राप्तिस्तु वक्तुं शक्यते, अत्राध्ययनं नाम गुरुमुखोच्चारणानूच्चारणम्, अर्थज्ञानस्य तु गुरुमुखाध्ययनेन लिखितपाठेन वा सम्भवात् पक्षे गुरुमुखाध्ययनस्याप्राप्तिः स्यात्, किन्तु सर्वत्र पाक्षिकाप्राप्तेः पूरणाय नियमहेतोः किञ्चिन्नियामकं दृश्यते, यथा यत्र व्रीहीनवहन्तीत्यत्र नखविदलनेनावघातेन वा तण्डुलनिष्पत्तेः सम्भवात् पक्षेऽप्राप्तोऽवघातो विधिना नियम्यते तत्र अवघातनिष्पन्नैरेव तण्डुलैरवान्तरापूर्वद्वारेण दर्शपूर्णमासौ परमापूर्वं जनयतः नान्यथेति दर्शपूर्णमासीयपरमापूर्वं नियामकम्। प्रकृतमध्ययनविधायकं वाक्यमनारभ्याधीतमतः प्रकरणं किमपि नियामकं नास्ति। अध्ययनविधेः क्रत्वर्थत्वे श्रुतिलिङ्गादिप्रमाणमपि नास्त्यतः पर्णतावत् क्रत्वर्थत्वं वक्तुं न शक्यते। यतः चतुर्थतृतीये "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" इत्यत्रानारभ्याधीतस्यापि पर्णमयीत्वस्य वाक्येन क्रत्वर्थत्वं "द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्याद्" इत्यत्र स्वीकृतम्,

१२३. जै.सू. २/१/१

इहाध्ययनविधौ तु तथा जुह्वादिवदव्यभिचरितक्रतुसम्बन्धाभावाद्वक्तुं न शक्यते। न च विधेः सामर्थ्यादेव गुरुमुखोच्चारणानूच्चारणात्मकाध्ययनस्य क्रत्वर्थत्वं सिद्ध्यतीति वाच्यम्; एतादृशाध्ययनस्य क्रत्वर्थत्वे सिद्धे क्रत्वर्थे नियमसिद्धिः क्रत्वर्थत्वेऽध्ययनस्य नियमसिद्धौ अध्ययनस्य क्रत्वर्थत्वस्य सिद्धिरिति परस्पराश्रयापत्तेः। अध्ययनजन्यार्थज्ञानस्य लिखितपाठजन्यार्थज्ञानस्य पुस्तकपाठजन्यार्थज्ञानस्य च स्वरूपे भेदाभावात् क्रत्वर्थार्थज्ञानार्थमध्ययनस्य नियमानुपपत्तेः। "पञ्च पञ्च नखा भक्ष्य" इत्यादाविव समुच्चितप्राप्त्यभावात् परिसङ्ख्यात्वमध्ययनविधेरर्थज्ञानार्थत्वे दूरत एव निरस्तं भवति। एवञ्चार्थज्ञानार्थत्वे वेदाध्ययनस्य विधेः वैय्यर्थ्यापत्त्या स्वर्गाद्यदृष्टार्थमध्ययनं विश्वजिन्न्यायेन वक्तव्यमिति सिद्ध्यति। न च विश्वजिन्न्यायस्तत्रैवावतरति यत्रार्थवादिकमपि फलं नास्ति, अत्र तु "यं यं क्रतुमधीते तेन तेनास्येष्टं भवति" इति क्रतुफलावाप्तिः, [१२४]"यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिवहन्ति यद्यजुराहुतिभिरेव तद्देवांस्तर्पयति ते पितरो देवाश्चैनमध्येतारं तृप्ता आयुरादिभिस्तर्पयन्ती" त्यायुरादिप्राप्तिः, यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्। आहैव स नखाग्रेभ्यः परमं तप्यते तपः।।" इति तपः फलप्राप्तिश्च श्रूयन्ते, अतोऽत्र रात्रिसत्रन्यायः स्यात्, रात्रिसत्रन्यायश्च—चतुर्थतृतीयेऽष्टमाधिकरणे विचारितः— "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इति श्रुतम्। रात्रिशब्देनात्र आयुर्ज्योतिरित्यादिवाक्यविहिताः सोमयागविशेषा उच्यन्ते। अत्र संशयः—किमत्र पूर्वाधिकरणोक्तविश्वजिन्न्यायेन स्वर्ग एवाधिकारिविशेषणमुत प्रतिष्ठेति। "सोमापौष्णं त्रैतमालभेत पशुकामः" "प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः" इत्यादाविव एवंकाम इत्यश्रवणाद् विधिशक्तिलभ्यः स्वर्ग एव विशेषणं स्यात्। यतः सन्देहे वाक्यशेषस्वीकारः, न निश्चिते। निश्चितश्चात्र विधिसामर्थ्यात् सर्वाभिलषितः स्वर्गः अधिकारिविशेषणमिति। या तु प्रतिष्ठाविषया श्रुतिः अर्थवादरूपा सती क्रतोः प्राशस्त्यमेव औदुम्बराधिकरणन्यायेन प्रतिपादयति इति "क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजिनिः" इति सूत्रेण पूर्वपक्षे प्राप्ते "फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं

---

१२४. शास्त्रदीपिकायाः टीका मयूखमालिका १.१.१

स्यात्" "अङ्गेषु स्तुतिः परार्थत्वाद्"[१२५] इति सूत्राभ्यां सिद्धान्तितम्-अत्र अत्यन्ताश्रुतफलकल्पनाद्वरं श्रुताया एव प्रतिष्ठाया विपरिणामेन फलत्वकल्पनम्– ये प्रतिष्ठासन्ति त एता रात्रीरुपेयु अर्थात् प्रतिष्ठाकामानामयं रात्रिसत्रयागः इत्येव युक्तम्। "औदुम्बरो यूपो भवति" इत्यत्र तु यूपनिष्ठौदुम्बरत्वस्य क्रतूपकारेण फलाकाङ्क्षाशान्तेः "ऊर्जं पशूनाप्नोति" इत्यादौ स्तुतिसमपर्कत्वमेव युक्तमिति औदुम्बराधिकरणन्यायः, प्रकृते रात्रिसत्रस्थले प्रकारान्तरेण फलाङ्क्षायाः अशान्तेः विश्वजिन्न्यायेन स्वर्गफलकल्पने च गौरवादार्थवादिकमपि प्रतिष्ठाफलं रात्रिसत्रस्य फलमिति युक्तम्।

अत एतद्रात्रिसत्रन्यायेन "स्वाध्यायोऽध्येतव्य" इत्यत्रापि आर्थवादिकं क्रतुफलावाप्त्यादिकमेव फलं युक्तम्, तदर्थमेव अध्ययनं विधीयत इति वाच्यम्। "यं यं क्रतुमधीते" इत्याद्युक्तार्थवादवाक्यानि जपयज्ञाध्ययन-विषयकाणि, यतः "अहरहः स्वाध्यायमधीयीत" इति विध्यन्तरं श्रूयते, "यं यं क्रतुमधीते" इत्युपक्रम्य नित्यं स्वाध्यायवान् द्विजः इत्युपसंहारश्च दृश्यते। आद्याध्ययने तु "स्वाध्यायोऽध्येतव्य" इति विधेः सन्निधौ न किमप्यार्थवादिकं फलं श्रूयते। तदुक्तं वार्तिके–

**आद्ये त्वध्ययने नैव काचिदस्ति फलश्रुतिः।**
**धारणे जपयज्ञे च या साऽप्येवं निवारिता॥** इति

फलस्य चातिदेशासम्भवात् "स्वाध्यायोऽध्येतव्य" इत्ययं विधिः अश्रुतफलकत्वाद् विश्वजिन्न्यायेन स्वर्गार्थमेवाध्ययनं विदधाति, तस्य च मानान्तरेणाप्राप्तत्वाद्विधेः अपूर्वविधित्वं सङ्गच्छते। ये तु जपाद्यध्ययने विहितमार्थवादिकं फलमध्ययनविषयकत्वसाम्येनाद्येऽप्यध्ययने अतिदेशे न कोऽपि दोष इति मन्यन्ते तेषां मते रात्रिसत्रन्यायेन क्रतुफलावाप्त्याद्यार्थ-वादिकफलार्थमेवाध्ययनमिति उभयथापि नार्थज्ञानार्थमध्ययनमनेन विधिना विधीयते इति सम्यक्। न च "स्वाध्यायोऽध्येतव्य" इत्यत्र कर्मकारकगत-फलास्वीकारे कर्माभिधायितव्यप्रत्ययेन कर्मप्रधानो विधिर्नसम्भवेदिति वाच्यम्,

१२५. जै.सू. ४/३/२/१७/९

सक्तुन्यायेन "स्वर्गकामः स्वाध्यायेन अधीयीत" इति विध्यर्थसम्पत्तौ विरोधाभावात्। सक्तुन्यायश्च "सक्तून् जुहोती" ति श्रुतमत्र वाक्ये सक्तूनिति द्वितीयया साध्यत्वं प्रतीयते, परन्तु होमस्य सक्त्वर्थस्य दृष्टद्वाराऽसम्भवात् सम्भवति दृष्टे फलेऽदृष्टफलकल्पनाया अन्यायत्वाद् सक्तूनित्यत्र करणत्वं लक्ष्यते, तथा च वाक्यार्थः सक्तुभिर्होमं भावयेदिति सम्पद्यते। तथा च वार्तिकम्—भूताभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते। सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ताः क्वचित्।। इति।[१२६] संस्कारो नाम सत उत्कर्षाधानम्। स च क्वचिदुपयोक्ष्यमाणानामपेक्षितः यथा व्रीहीणां प्रोक्षणादिकम्। क्वचिच्चोपयुक्तानां विहितः यथा भगवतो निर्माल्यस्य गङ्गादौ विसर्जनम्। प्रकृते स्वाध्यायस्य भूतोपयोगविधया भाव्युपयोगविधया वा संस्कार्यत्वस्यासम्भवात् स्वाध्यायेनाधीयीत इत्येवं विभक्तिव्यत्ययेनैवार्थः स्वीकार्यः। एवञ्च वाक्यार्थः "स्वर्गकामः घृतकुल्यादिकामो वा स्वाध्यायेनाधीयीत" इति सम्पद्यते। न च शब्दानामौत्पत्तिकत्वादर्थपरत्वस्य स्वाध्यायपदवाच्याक्षरराशेरध्ययनस्यापि स्वर्गार्थत्वमनुपपन्नमिति वाच्यम्; अनन्यपराण्येवाक्षराणि स्वार्थावबोधकतया व्युत्पन्नानि, व्युत्पत्त्यपेक्षश्च शब्दोऽर्थावबोधकः। स्वाध्यायाध्ययनस्य च पूर्वोक्तप्रकारेणार्थपरत्वे विधिवैय्यर्थ्यापत्त्या "स्वाध्यायोऽध्येतव्य" इति विधिरेव स्वाध्यायाध्ययनस्य स्वर्गार्थत्वं बोधयन् स्वस्याविवक्षितार्थत्वं द्योतयति। अत एव "अधीत्य स्नायाद्" इति अध्ययनोत्तरकालं समावर्तनविधायकं स्मृतिवचनमपि अध्ययनमात्रेणैव विध्यर्थस्य शास्त्रार्थस्य परिसमाप्तिं बोधयद् स्वाध्यायस्याविवक्षितार्थत्वं वेदाध्ययनस्य च स्वर्गार्थत्वं दृढयति। एवञ्चाध्ययनस्य स्वर्गार्थत्वे सिद्धे वेदवाक्यार्थविचारोपायभूतन्यायनिबन्धात्मकमीमांसाशास्त्रं विधिप्रयुक्त्या नारम्भणीयम् इति पूर्वपक्षः प्राप्तः। तदुक्तं शास्त्रदीपिकायाम्—

**"विनापि विधिना [१२७]ज्ञानलाभान्नहि तदर्थता।**
**कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत्।।[१२८]"**

---

१२६. तन्त्रवार्तिकम्–२.१.४

१२७. शास्त्रदीपिका १.१.१

१२८. दृष्टलाभाद् इति पाठः जैमिनीय-न्यायमालाविस्तरे १.१.१ विवरणप्रमेयसङ्ग्रहे च प्रथमवर्णके

जैमिनीयन्यायमालायाम्–अर्थधीहेतुताधीतेर्लोकसिद्धावघातवत्।
नियामकं न चैवातो वैधारम्भो न सम्भवी।।१३

अधीतेः=अध्ययनस्य अर्थधीहेतुता=अर्थज्ञानहेतुत्वम्, लोकसिद्धा=प्रत्यक्षसिद्धम्। अवघातवन्नियमकं न=नियमविधेः स्वीकारेऽवघाते यथा नियामकं दर्शपूर्णमासापूर्ववद् अध्ययननियमाङ्गीकारे नियामकं नास्तीत्यर्थः। वैधारम्भो न संभवी=विधिमूलतया पूर्वमीमांसाशास्त्रारम्भः न सम्भवतीत्यर्थः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–"स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधौ कर्मणि तव्यप्रत्ययः। तस्य च यथाश्रुतविनियोगोपपत्तौ सम्भवन्त्यां सक्तुन्यायेन श्रुतविनियोगभङ्गेन "स्वाध्यायेन अधीयीत" इत्यर्थस्वीकारो नोचितः। यत्र च "सक्तून् जुहोती"त्यादौ सक्तूनां भूतभाव्युपयोगरहितत्वात् समीहितसाध्यापेक्षिण्यां भावनायां भाव्यत्वेनान्वयायोग्यत्वात् साधनत्वमेव लक्षणया द्वितीयाभिधत्ते इति स्वीकारः उचितः। प्रकृते तु "स्वाध्यायोऽध्येतव्य" इत्यत्र उत्पाद्यत्वविकार्यत्वाप्यत्वसंस्कार्यत्वाख्य-चतुर्विधकर्मसु नित्यत्वात्स्वाध्यायस्योत्पाद्यत्वविकार्यत्वयोरभावेऽपि आप्यत्वसंस्कार्यत्वयोः सम्भवात् अध्ययनेन स्वाध्यायं प्राप्नुयाद्, अध्ययनेन स्वाध्यायं संस्कुर्याद् इति वाक्यार्थे सम्भवे "स्वाध्यायेनाधीयीत" इति अन्यथाकरणं न युक्तम्। तत्राध्ययनेनावाप्तस्य संस्कृतस्य वा स्वाध्यायस्य स्वतोऽपुरुषार्थत्वात् फलाकाङ्क्षायामधीतवेदजन्यार्थज्ञानस्य क्रत्वर्थत्वेन दृष्टस्य स्वर्गादिसाधनतया फलत्वं युक्तम्। दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात्। एवञ्चार्थज्ञानाय वेदाध्ययनमध्ययनविधिना विधीयत इति सिद्धम्। अत्रायं प्रयोगः श्रीभाट्टचिन्तामणिकारैः प्रदर्शितः– वेदाध्ययनम् इष्टजनकदृष्टार्थकम्; अर्थवद्विषयकविहिताध्ययनत्वात्, अङ्गाध्ययनवत्। व्याकरणाद्यङ्गानामध्ययनस्य वेदार्थज्ञानार्थत्वं सर्वसम्मतमेव। "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इत्यत्र व्याकरणादीनामध्ययनस्य विधेर्दर्शनात् तदेकवाक्यतया "स्वाध्यायोऽध्येतव्य" इत्यनेनापि स्वाध्यायपदेन व्याकरणादीनामध्ययनमपि विधीयते। अतः अङ्गाध्ययनं दृष्टान्तीकृत्य वेदाध्ययनस्यार्थज्ञानार्थत्वं साध्यते। अत्रानुमानप्रयोगे स्तोभाध्ययने व्यभिचारवारणायार्थवद्विषयकेति साध्ये विशेषणम्। विषमन्त्राध्ययने व्यभिचारवारणाय विहितेति साध्ये विशेषणम्। अतोऽर्थज्ञान-

मध्ययनविधेयर्भाव्यम्। न चार्थज्ञानार्थत्वे विधित्वप्रयोजकरूपाभावाद् विधेः वैय्यर्थ्यं वाच्यम्; त्रैकालिकाप्राप्तिरूपप्रयोजकाभावेऽपि पाक्षिकाप्राप्तिरूप-प्रयोजकसत्वात् स्वाध्यायाध्ययनस्यार्थज्ञानार्थत्वे नियमविधेः सम्भवात्। न च नियामकं नास्तीति वाच्यम्; क्रत्वपूर्वस्य नियामकत्वात्। तदुक्तम्-जैमिनीयन्यायमालायाम्-

**दर्शापूर्ववदस्त्यत्र क्रत्वपूर्वं नियामकम्।**
**अर्थनिर्णायकं शास्त्रमत आरभ्यतां विधेः॥**[१२९] इति

"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति विधिनावगम्यमानं दर्शपूर्णमासजन्यं परमापूर्वं यथावघातनियमजन्यस्यावान्तरापूर्वस्य कल्पकम् तथैवाशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्यापूर्वस्य कल्पकं भवति। न चानारभ्याधीतमध्ययनविधायकं वाक्यं श्रुतिलिङ्गादिप्रमाणा-भावात्कथं क्रत्वर्थं भवतीति वाच्यम् अर्थात् क्रतुजन्यमपूर्वजातमध्ययन-नियमजन्यस्यापूर्वस्य कल्पकं कथमिति न शङ्कनीयम्; अनारभ्याधीतस्यापि अर्थावबोधद्वारा क्रतुनिवर्तनसामर्थ्यरूपलिङ्गात् क्रत्वर्थत्वोपपत्तौ दोषाभावात्। एवञ्च स्वाध्यायाध्ययनस्य क्रत्वर्थत्वे वाक्यप्रकरणयोरभावेऽपि अध्येतव्य इत्यत्र कल्पनालाघवेन सामर्थ्यलक्षणलिङ्गेन चानुगृहीततव्यप्रत्ययः कर्मप्राधान्यमवगमयन् प्रमाणं भवति। तदुक्तं भामतीकारैः- यद्यपि "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधिर्न किञ्चित्फलवत्कर्मारभ्याम्नातः, नाप्यव्यभिचरितक्रतुसम्बन्धपदार्थगतः, न हि जुह्वादिवत्स्वाध्यायोऽव्यभिचरित-क्रतुसम्बन्धः, तथापि स्वाध्यायस्याध्ययनसंस्कारविधिरध्ययनस्यापेक्षितो-पायतामवगमयन् किं पिण्डपितृयज्ञवत् स्वर्गं वा सुवर्णं भार्यमितिवदार्थवादिकं वा फलं कल्पयित्वा विनियोगभङ्गेन स्वाध्यायेनाधीयीतेत्येवमर्थः कल्पताम्, किं वा परम्परयाप्यन्यतोऽपेक्षितमधिगम्य निर्वृणोत्विति विशये, न दृष्टद्वारेण परम्परयाप्यन्यतोऽपेक्षितप्रतिलम्भे च यथाश्रुतिविनियोगोपपत्तौ च सम्भवन्त्यां श्रुतविनियोगभङ्गेनाध्ययनादेवाश्रुतादृष्टफलकल्पना नोचिता। दृष्टश्च स्वाध्याया-ध्ययनसंस्कारः। तेन हि पुरुषेण स प्राप्यते, प्राप्तश्च फलवत्कर्मब्रह्माव-

१२९. जै.न्या. १/३

बोधमभ्युदयनि:श्रेयसप्रयोजनमुपजनयति, न तु सुवर्णधारणादौ दृष्टद्वारेण किञ्चित् परम्परयाप्यस्त्यपेक्षितं पुरुषस्य, तस्माद्विपरिवृत्य साक्षाद्धारणादेव विनियोगभङ्गेन फलं कल्प्यते।" इति।[१३०] अयं भाव:– पिण्डपितृयज्ञस्तावत् "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ती" ति अनारभ्याधीतवाक्य-विहितोऽश्रुतफल: "अमावास्यायामिति" कालकर्मसाधारणामावास्यापदघटित: क्रत्वर्थ उत पुरुषार्थ इति सन्देहे "पितृयज्ञ: स्वकालत्वादनङ्गं स्यात्" इति सूत्रेण कालकर्मसाधारणोऽप्यमावास्याशब्दोऽपराह्णशब्दसमानाधिकरण: कालपर एवात: कर्मसमभिव्याहाराभावात् पुरुषार्थ: विश्वजिन्न्यायेन स्वर्गफल: इति निर्णीतम्। एवञ्च पिण्डपितृयज्ञस्य वाक्यप्रकरणाभ्यां क्रत्वर्थत्वासम्भवाद् दृष्टफलस्याप्यभावात् पुरुषार्थत्वं स्वर्गफलकत्वमुक्ते स्वाध्यायाध्ययनस्य तु सम्भवे दृष्टफलेऽदृष्टफलकल्पनाया अन्याय्यत्वादर्थज्ञानार्थत्वं क्रत्वर्थत्वं च सङ्गच्छेत इति विशेष:। सुवर्णधारणमपि "सुवर्णं हिरण्यं भार्यम्, सुवर्ण एव भवति दुर्वर्णोऽस्य भ्रातृव्यो भवति" इत्यनारभ्याधीतेन वाक्येन विहितम्, किं क्रत्वर्थमुत पुरुषार्थमिति सन्देहे "अप्रकरणे तु तद्धर्मस्ततो विशेषात्"[१३१] "अद्रव्यत्वात् शेष: स्यात्" "वेदसंयोगात्" इति सूत्रैस्त्रिधा सुवर्णधारणं क्रत्वर्थमिति पूर्वपक्ष: प्राप्त:। प्रथमपक्षस्तावत्–अप्रकरणे समाम्नातमपि हिरण्यधारणं क्रत्वर्थम्; "सुवर्ण एव भवति" इति वर्तमानापदेशादर्थवादत: फलकल्पनापेक्षया क्लृप्तफलकक्रतूपकारकत्वाश्रयणस्य ज्यायस्त्वात्। इति। द्वितीयपक्षस्तु हिरण्यविशिष्टधारणस्य वाक्येनात्र विधीयते इति विशिष्टविधाने गौरवात् क्रतुगतहिरण्यानुवादेन धारणाख्यसंस्कारमात्रं विधीयते इति। तृतीयपक्षस्तु "सुवर्णं हिरण्यं भार्यम्" सुवर्णहिरण्याख्यपदद्वयघटितेन वाक्येन धारणाख्य-संस्कारस्यापूर्वस्य विधानेऽपि गौरवाद् "हिरण्यं हस्ते भवति" इत्येतद्वाक्यविहितधारणानुवादेन 'सर्वं हिरण्यं रजतम्' इति रजतेऽपि हिरण्यशब्ददर्शनात् तद्व्यावृत्त्यर्थं यद्धिरण्यं भार्यं तत्सुवर्णमिति धार्ये हिरण्ये सुवर्णत्वं विधीयते इति। सर्वथापि भार्यमिति कर्मणि विहितकृत्यप्रत्ययेन भरणस्य हिरण्यलक्षणद्रव्यप्रधानकत्वावगमात् द्वितीयपक्षे संस्कारत्वेऽध्य-वसितेऽध्वर्युवेदसमाख्याते यजुर्वेदे पठ्यमानत्वात् लोके क्रयविक्रयादि-

१३०. भामती १.३.३४
१३१. जै.सू. ४.३.१९

व्यवहारगतस्य हिरण्यस्य संस्कार इति वक्तुं न शक्यते, अतः वेदसंयोगात् क्रत्वर्थत्वे सत्येव यजुर्वेदसमाख्या अध्वर्युसंयोगं नियमयन्ती अनुगृहीता भवतीति त्रिष्वपि पक्षेषु हिरण्यधारणं क्रत्वर्थमेवेति पूर्वपक्षः प्राप्तः। तदुक्तम्–

पुरुषार्थत्वपक्षे हि फलं कल्प्यमतः क्रतोः।
अङ्गं स्याद् वैदिकत्वेन क्रियात्वेन च साम्यतः॥[१३२]

एवं पूर्वपक्षे प्राप्ते सिद्धान्तः–सुवर्णधारणं पुरुषार्थ एवेति "अप्रकरणे तु तद्धर्मस्ततो विशेषात्" इति सूत्रेण प्रतिपाद्यते। सूत्रमिदं पूर्वपक्षानुसारेण सिद्धान्तानुसारेण च द्विधा व्याख्यातृभिर्योजितम्। अप्रकरणे आम्नातः तद्धर्मः पुरुषधर्मः एवंजातीयकः; ततो विशेषात् प्रकरणाधीताद्धर्माद्विशिष्यते। न चाहवनीये जुह्वतीति होमानुवादेनाहवनीयविधानवत् क्रत्वनुवादेन धारणं विहितम्, येन साक्षाद्वाक्येन क्रतुसम्बन्धि भवेत्। नाप्यव्यभिचारिक्रतुसम्बन्धाश्रयद्वारा वाक्यात् पर्णमयीवत् क्रतुमुपनिपतेत्; सुवर्णधारणस्य लोकेऽपि विद्यमानत्वेन क्रत्वव्यभिचाराभावात्। अतः सुवर्णं भार्यमित्यत्र विनियोगभङ्गेन "सूवर्णधारणेन वाक्यशेषगतफलं भावयेत्" इति रात्रिसत्रन्यायेनार्थवादिकफलाय सुवर्णधारणं विधीयत इति पुरुषार्थमेव सुवर्णधारणम्। न च लाघवाद् येषु क्रतुषु हिरण्यविनियोगः सम्प्रतिपन्नः तेषु तद्द्वारा धारणस्य निवेशः कल्प्यतामिति वाच्यम्; "हिरण्यं हस्ते भवति" "हिरण्येन षोडशिनः स्तोत्रमुपाकरोति" "हिरण्यस्रज ऋत्विजो भवन्ति" इत्यादिहिरण्यविनियोगवत्सु क्रतुषु तद्धारणस्यापि प्राप्तेः। दक्षिणारूपहिरण्यवत्स्वपि दीयमानस्य प्रतिगृह्यमाणस्य च तस्य धारणप्राप्तेः, हिरण्यार्थतया धारणविधाने सुवर्णश्रुतिवैफल्यापत्तेश्च। एवञ्च सुवर्णधारणस्य श्रुत्यादिप्रमाणाभावेन क्रत्वर्थत्वासम्भवात् अगत्या विनियोगभङ्गेन पुरुषार्थत्वं स्वीकृतम्, स्वाध्यायाध्ययनस्य तु सामर्थ्यादेव क्रत्वर्थत्वे सम्भवति विनियोगभङ्गेन पुरुषार्थत्वं न युक्तम्। एवञ्चार्थज्ञानार्थं वेदाध्ययनं गुरुमुखोच्चारणानूच्चारणात्मकं स्वाध्यायविधिना नियम्यते, नियामकञ्च सकलक्रतुजन्यमपूर्वमतः "अधीतैरेव वेदैरवगतानि कर्माणि फलदानीति सिद्धम्।" तदुक्तम्–

---

१३२. शास्त्रदीपिका–३.४.१२

लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना।
विधेश्च नियमार्थत्वान्नानर्थक्यं भविष्यति।। इति[१३३]

एवञ्चार्थज्ञानाय स्वाध्यायः संस्क्रियत इति सिद्धम्। ननु एवं सति अध्ययनस्य स्वाध्यायार्थत्वेऽध्ययनेन स्वाध्यायं भावयेदिति वाक्यार्थः, ततश्च स्वाध्यायस्याध्ययनं प्रति प्रधानत्वोद्देश्यत्वानुवाद्यत्वानि स्युः, अध्ययनस्य च स्वाध्यायं प्रति गुणत्वविधेयत्वोपादेयत्वानि स्युः। पुनः अर्थज्ञानार्थत्वेऽध्ययनेनार्थज्ञानं भावयेदध्ययनञ्च स्वाध्यायेनेति वाक्यार्थः। ततश्च स्वाध्यायस्याध्ययनं प्रत्युपादेयत्वविधेयत्वगुणत्वानि स्युः, अध्ययनस्य च तं प्रत्युद्देश्यत्वानुवाद्यत्वप्रधानत्वानि स्युः। तथा चैकस्मिन् स्वाध्यायेऽर्थज्ञानविषयकोपादेयत्वादित्रिकम्, अध्ययनं प्रति संस्कार्यत्वेनोद्देश्यत्वादित्रिकमिति विरुद्धत्रिकद्वयम्। अतः एकस्माद् वाक्यादध्ययनस्य स्वाध्यायसंस्कारार्थमर्थज्ञानार्थत्वञ्च कथं सङ्गच्छेत इति चेद्, अत्रैवं समाधानम्--विरुद्धत्रिकद्वयापत्तेः दूषणतायाः बीजं वाक्यभेद एव। अत्र तु "अध्ययनसंस्कृतेन स्वाध्यायेनैव फलवत्कमौपयिकमर्थज्ञानं भावयेद्" इति एकयैव वचनव्यक्त्या तत्सिद्धेः वाक्यभेदाभावान्न दोषः। यथा "साम्ना स्तुवीतेति" स्तुतौ विनियुक्तस्यापि साम्नः स्वाभाविकाक्षरसंस्कारत्वं न हीयते तद्द्वारेणैव स्तुतिसाधनत्वात्। न हि तत्रर्चां वाक्यान्तरेण विनियोगोऽस्ति, एकेनैव विधिनोभयार्थत्वस्य सिद्धेः स्वीकारात्। अत एवंजातीयकं स्वभावतः संस्काररूपमपि संस्कार्योद्देशेनाविधानादुभयार्थकं भवति। एवञ्चाध्ययनस्यार्थज्ञानार्थत्वे न कोऽपि दोषः। किञ्च शब्दानां स्वाभाविकार्थपरत्वस्यापलापस्यासति बाधेऽसम्भवात् स्वाध्यायाध्ययनस्यार्थज्ञानार्थत्वमेव स्वीकार्यम्। किञ्च 'षडङ्गो वेदोऽध्येयः' 'वेदाङ्गानि समस्तानि कृष्णपक्षेषु सम्पठेद्' इत्यादिस्मृतिभिः साङ्गवेदाध्ययनं विधीयत इति व्याकरणादिरूपाङ्गाध्ययनविधानान्यथानुपपत्त्या वेदाध्ययनस्यार्थज्ञानार्थत्वं सिद्ध्यति। अकिञ्चित्करस्याङ्गत्वायोगात् प्रकृतिप्रत्ययविभागादिभिरर्थावधारणोपायभूतस्य व्याकरणस्य वेदाध्ययनस्वरूपोपकारकत्वासम्भवेन फलोपकारकत्वस्य वक्तव्यत्वादर्थज्ञानादन्यत्र फले तस्य प्रकृतिप्रत्ययविभागादिदृष्टद्वारेणोपकारकत्वासम्भवाद् दृष्टस्य व्याकरणादिफलस्य

---

१३३. शास्त्रदीपिका-१.१.१

द्वारत्वसम्भवेऽदृष्टद्वारा कल्पनायोगाच्च। एवञ्चाङ्गाध्ययनस्यार्थज्ञान-पर्यन्तत्वात्तन्न्यायेन वेदाध्ययनस्यार्थज्ञानपर्यन्तत्वसिद्धिर्भवति। ननु

श्रावण्यां प्रौष्ठपद्यां वा. उपाकृत्य यथाविधि।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्॥
अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु सम्पठेत्॥[१३४]

इत्याद्यध्ययननियमस्मरणमध्ययनस्यार्थज्ञानार्थत्वे नोपपद्यत्वे इति चेत्, न; कार्योपयोगाभावेऽपि विघ्ननिवारणार्थत्वेन स्वरूपोपयोगित्वात्, नियमापूर्वे उपयोगाच्च न दोषः। न चाध्ययनस्य क्रत्वर्थत्वे "राजा राजसूयेन यजेत" इति राजसूये राज्ञामेवाधिकाराद् ब्राह्मणानामधिकाराभावात् तत्प्रतिपादकानां वाक्यानां ब्राह्मणैरध्ययनानापत्तेः, ततश्चाध्यापने ब्राह्मणानामेवाधि-कारात्तत्प्रतिपादकवाक्यानामध्ययनाध्यापनपरम्परायां लोपापत्तेः, तत्प्रतिपाद्य-क्रतोरपि लोपापत्तिरिति वाच्यम्; ब्रह्मयज्ञजपाद्यर्थं तदध्ययनमिति न दोषः। किञ्च 'यस्याश्विने शस्यमाने सूर्यो नाभ्युदियादपि सर्वा दाशतयीरनुब्रूयाद्' "पारिप्लवं शंसति" इति सर्वेषां स्वाध्यायवाक्यानां क्रतावुपयोगश्रवणाद् राजसूयाद्यखिलार्थप्रतिपादकानां वाक्यानां नियमतोऽध्ययनोपपत्तेः अध्ययना-ध्यापनपरम्परादिलोपापत्तेरनवकाशान् न दोषः। एतेन हुंफडादिशब्दाध्ययन-स्यार्थावबोधपर्यन्तत्वाभावादवश्यमक्षरग्रहणं स्वाधीनोच्चारणक्षमत्वलक्षणं फलं वाच्यम्, तथाच वैरूप्यपरिहारार्थं सर्वत्र तदेवास्तु अर्थावबोधस्तु तस्य फलम्, न तु विधेरित्यपास्तम्। शब्दानां स्वरसतोऽर्थपरत्वस्याविवक्षायां प्रमाणाभावात् हुंफडादिशब्दानामपि क्रतावुपयोगस्योपदर्शितप्रकारेण सम्भवात् तेषां क्रतावुपयोगस्यार्थज्ञानार्थत्व एवाध्ययनस्यावगमसम्भवाच्च अर्थज्ञानार्थत्वमेवाध्ययनमध्ययनविधिना विधीयत इत्येकरूपत्वस्यैव स्वीकाराद् वैरूप्यकल्पनाया अप्रसक्तेः। एवञ्च कर्मविधिषु अध्ययनाविर्भावितैरेव कर्मविधिभिरर्थमवबुध्यानुतिष्ठतां क्रतुफलभावनासिद्धिः, अर्थवादेषु अध्ययनाविर्भावितार्थवादप्ररोचिताः क्रियमाणाः क्रतवः फलमुत्पादयन्ति, मन्त्रेषु पुनरध्ययनपरिगृहीतैरेव मन्त्रैः क्रतुषु पदार्थस्मरणं फलभावनाङ्गमिति

१३४. मनुस्मृतिः ४.९५

सर्वेषां वेदवाक्यामर्थज्ञानार्थमध्ययनं स्वाध्यायविधिना विधीयत इति प्रथमपक्षावलम्बिनां वार्तिककाराणां भामतीकाराणां जैमिनीयन्यायमालाग्रन्थस्य च पक्षः सुनिरूपितः। एवञ्चास्मिन् मते "स्वाध्यायोऽध्येतव्य" इत्यत्र तव्यप्रत्ययस्य व्यापारात्मिका शब्दभावना अध्ययनविषयपुरुषप्रवृत्तिलक्षणार्थभावनारूपभाव्यनिष्ठा स्वगोचरज्ञानकरणिका घृतकुल्याद्यध्ययनफलार्थवादादिज्ञानेतिकर्तव्यताका सती पुरुषप्रवृत्तिलक्षणार्थभावनामध्ययनकरणिकां अर्थज्ञानहेतुस्वाध्यायरूपभाव्यनिष्ठां प्राङ्मुखत्वादीतिकर्तव्यतामुत्पादयति।

सम्प्रति द्वितीयपक्षावलम्बिनामाशयो वर्ण्यते–स्वाधीनोच्चारणक्षमत्वलक्षणाक्षरग्रहणार्थमध्ययनं स्वाध्यायाध्ययनविधिना विधीयते। विधित्वप्रयोज़कमस्मिन् पक्षेऽपि पाक्षिकप्राप्तिरेव। स्वाध्यायपदवाच्यस्य वेदाख्याक्षरराशेः ग्रहणस्य गुरुमुखोच्चारणात्मकाध्ययनेन पुस्तकपाठादिनापि सम्भवात् पाक्षिकाप्राप्तेरध्ययनस्य व्यावर्तनाय "स्वाध्यायोऽध्येतव्य" इति विधिनाध्ययनं नियम्यते। अर्थज्ञानञ्चोत्तरक्रतुविधिप्रयुक्तम्। अध्ययनविधेर्व्यापारस्तु अक्षरग्रहणपर्यन्तमेवेति प्रथमपक्षाद्विशेषः। "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति विधौ "ज्ञेयश्चे" ति पृथक्श्रवणात् "अध्येय" इति "अध्येतव्य" इत्यनेन समानार्थकविधेरक्षरग्रहणमेव फलमिति निश्चिते "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधिरप्यक्षरग्रहणार्थमेवाध्ययनं विधत्त इति युक्तम्। "अध्येतव्य" इत्यत्र कर्मणि तव्यप्रत्ययोऽपि पक्षेऽस्मिन् स्पष्टं सङ्गच्छते। "अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेद्" इति वेदाध्ययनाङ्गाध्ययनयोः कालभेदस्मृत्या वेदाध्ययनस्याङ्गाध्ययनापेक्षया वैशिष्ट्यबोधोऽप्यङ्गाध्ययनस्यार्थज्ञानार्थत्वेऽपि वेदाध्ययनस्याक्षरग्रहणार्थत्वमेव युक्तमिति स्मारयति। अत एव 'वेदानां किञ्चिदधीत्य ब्राह्मणः, एकां शाखामधीत्य श्रोत्रियः, अङ्गाध्याय्यनूचानः, कल्पाध्यायी ऋषिः, कल्पसूत्रप्रवचनाध्यायी भ्रूण" इति शिष्टव्यवहारोऽपि सङ्गच्छते अन्यथा अङ्गाध्ययनमन्तरार्थज्ञानासम्भवात् शाखाध्याय्यङ्गाध्यायिनोर्भेदव्यवहारो न स्यात्। एतेन वेदाध्ययनम् इष्टजनकदृष्टार्थकम्, अर्थवद्विषयकविहिताध्ययनत्वात्, अङ्गाध्ययनवत्" इति प्रयोगोऽपि व्याख्यातः। अत्र "इष्टजनकदृष्टार्थकम्" इत्यनेनेष्टजनकाक्षरग्रहणार्थकत्वं विवक्षितञ्चेत्

न विरोधः, विहिताध्यनत्वमात्रं हेतुर्भवति, "हुं फट्" आद्यध्ययनवदिति उदाहरणं वक्तुं शक्यते। यदीष्टजनकदृष्टार्थकमित्यनेनेष्टजनकार्थज्ञानार्थकत्वं विवक्षितञ्चेत् अङ्गाध्ययनवेदाध्ययनयोर्विशेषस्य चोक्तत्वादत्र प्रयोगेऽङ्गाध्ययन-त्वमेवोपाधिरिति सोपाधिको हेतुः व्याप्यत्वासिद्धो भवति। किञ्चाध्ययनस्य प्रयोजनाकाङ्क्षायां दृष्टे सम्भवत्यदृष्टकल्पनायोगात् किं तद् दृष्टफल-मित्याकाङ्क्षायामर्थज्ञानस्याक्षरग्रहणोत्तरकालिकत्वात्, अर्थज्ञानस्यापि स्वतःप्रयोजनत्वाभावात् क्रतुभावनाङ्गत्वेनैव प्रयोजनवत्त्वस्य वक्तव्यत्वात्, हुमादिष्वगत्याक्षरग्रहणस्यैव फलत्वस्य स्वीकर्तव्यतयाऽऽसन्नाक्षरग्रहणार्थ-मेवाध्ययनमिति युक्तम्। न चाध्ययनविधेरक्षरग्रहणमात्रपरत्वेऽक्षरग्रहणशेषतया विनियुक्तस्य स्वाध्यायाख्यवेदस्यार्थपरत्वे प्रमाणाभावादविवक्षितार्थत्वं स्यादिति वाच्यम्; शब्दस्य स्वार्थबोधकत्वशक्तिस्वाभाव्यादेवार्थपरत्वे सिद्धे तदर्थं विध्यपेक्षाभावात्। अन्यत्र विनियोगमात्रेणान्यस्य स्वसामर्थ्यस्य क्षतेरदर्शनात् अध्ययनविधिनाध्ययनस्याक्षरग्रहणार्थत्वेन विहितत्वेऽपि अधीतवेदाङ्गस्य वेदाख्याक्षरराशेरर्थज्ञानं स्वत एव भवतीति न दोषः। अस्मिन्नेव पक्षे महाभाष्यकारैरुदाहृतं "ब्राह्मणेन निष्कारणो वेदः षडङ्गोऽध्येयो ज्ञेयश्च" वाक्यमपि स्पष्टं सङ्गच्छते। अत्र निष्कारणशब्दे कार्यते अनेनेति कारणं फलम् इति व्युत्पत्या कारणशब्दः प्रयुक्तः, तन्निरपेक्षः इत्यर्थं बोधयति। अर्थात् दृष्टप्रयोजननिरपेक्षः शिक्षाव्याकरणादिषडङ्गसहितो वेदः अध्ययनेन ग्राह्यः, तदर्थश्च प्रतिपत्तव्यः, एवञ्चात्र अध्येयः, ज्ञेयः इति पृथक्श्रवणात् स्वाध्यायाध्ययनमक्षरग्रहणार्थमेवेति सिद्ध्यति। किञ्च स्वाध्यायाध्ययन-स्याक्षरग्रहणार्थत्वे व्यासाचार्याणामपि सम्मतिर्दृश्यते। तथाहि—ब्रह्ममीमांसायां तृतीयचतुर्थे विचारितम्—"शेषत्वात् पुरुषार्थवदो यथान्येष्विति जैमिनिः"[१३५] इति अत्र "आत्मा वा अरे द्रष्टव्य" इत्यादौ श्रुतमौपनिषदमात्मज्ञानं किमपवर्गसाधनतया पुरुषार्थमाहोस्वित् क्रतुप्रयोगापेक्षितकर्तृप्रतिपादकतया क्रत्वर्थमिति जिज्ञासायां "पुरुषार्थोऽतः शब्दादिति बादरायणः" इति सूत्रेण 'तरति शोकमात्मवित्' (छा. ७/१३) 'स यो हि वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" (मु. ३/२९) "ब्रह्मविदाप्नोति परम्"(तै २/११)

---

१३५. ब्र.सू. ३.४

इत्यादावसकृद्ब्रह्मज्ञानस्य पुरुषार्थहेतुत्वस्य प्रतिपादनात् मोक्षसाधनतया ब्रह्मज्ञानं साक्षात्पुरुषार्थमिति वेदान्तिनां सिद्धान्ते प्राप्ते पूर्वमीमांसकानां पूर्वपक्षः कर्तृत्वेनात्मनः कर्मशेषत्वात्तद्विज्ञानमपि व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसम्बन्ध्येवेति प्रतिपादितः। तत्र "तद्वतो विधानात्" इति सूत्रेण "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेण अभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः" (छा. ८/१५/१) इति श्रुतौ समस्तवेदार्थविज्ञानवत एव कर्माधिकारश्रवणात् वेदाध्ययनमर्थावबोधपर्यन्तमिति आक्षेपे प्राप्ते "अध्ययनमात्रवतः" इति सूत्रेण "आचार्यकुलाद्वेदमधीत्य" इत्यत्राध्ययमात्रस्यैव श्रवणात् अध्ययनमात्रवतामर्थानभिज्ञानमपि कर्मविधावधिकारनिश्चयादध्ययन-विधिरप्यक्षरग्रहणार्थमेवाध्ययनं विदधाति इति सिद्धान्तितम्। तुरीयाध्यायप्रथमपादे त्रयोदशाधिकरणे "यदेव विद्ययेति हि" इति सूत्रेऽपि "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती" ति (छां. १/१/१०) श्रुतौ विद्यासंयुक्तस्य कर्मणः वीर्यवत्तरत्वाभिधानेन विद्याविहीनस्यापि कर्मस्वधिकारः, तत्कृतकर्मणोऽपि वीर्यवत्त्वमस्त्येवेति निर्णीतत्वात् प्रकृतेनाध्ययनविधिनापि नार्थज्ञानार्थमध्ययनं विधीयत अपि त्वक्षरग्रहणार्थमेवाध्ययनविधानमिति युक्तम्। न चैतद्बादरायणाचार्यस्यैव सम्मतं न त्वाचार्यजैमिनेरिति वाच्यम्, प्रत्यक्षश्रुतिमाधारीकृत्य प्रतिपादिते ऽस्मिन्नर्थे जैमिनेः विरोधे प्रमाणाभावात्, कर्मानुष्ठानस्य तदपेक्षितार्थज्ञानस्य च "सोमेन यजेत" इत्यादिकर्मविध्याक्षेपादेव सिद्धे "स्वाध्यायोऽध्येतव्य" इति विधिनात्वक्षरग्रहणार्थमेध्ययनं विधीयत इत्येव युक्तम्। किञ्च स्वाध्यायाध्ययनविधिना अर्थज्ञानार्थतयाध्ययन विधीयते चेत् अर्थज्ञानार्थतया कल्पसूत्रप्रणयनस्य वैय्यर्थ्यापतिः। यतः भवस्वामिभाष्ये कल्पसूत्रप्रणयनस्य प्रयोजनं स्पष्टमेवं प्रतिपादितम्, यत् "ब्राह्मणानां बहुत्वादेकैकस्यां शाखायामपरिसमाप्तत्वादर्थस्य च दुर्बोधत्वादसर्वजनीनत्वाच्च संहृत्य विवरणार्थं सुखं बुद्ध्वा कर्माण्यनुष्ठाय फलानि सर्वे प्राप्नुयुरिति कल्प आरब्ध आचार्येण" इति। अनेन ज्ञायते यद्वेदार्थज्ञानार्थमेव कल्पसूत्रादिवेदाङ्गानां प्रणयनं, स्वाध्यायविधिस्त्वक्षरग्रहणमात्रपर्यवसायी इति। किञ्चाध्ययनविधिप्रयोज्यत्वे विचारस्य क्रतुविधीनां वैय्यर्थप्रसङ्गः। तथाहि-स्वविधिना विधीयमानाध्ययनप्राप्तो हि स्वाध्यायः क्रतुविधीनामुपस्थापको भवति, स्वाध्यायेनोपस्थापिताः क्रतुविधयः अनुष्ठेयनिर्णयज्ञानमन्तरेणा-

नुष्ठापयितुमशक्नुवन्तस्तन्निर्णयाय विचारशास्त्रं मीमांसाशास्त्रापरनामधेयं प्रयोजयन्ति, मतेऽस्मिन् क्रतुविधीनामध्ययनविधेश्च सार्थक्यं सिद्धं भवति। अन्यथा अध्ययनविधेः विचारप्रयोजकत्वे यागाद्यनुष्ठानस्यापि तस्य प्रयोजकत्वं वाच्यम्, विचारस्य यागाद्यनुष्ठानैकफलकत्वात्। तेन यागाद्यनुष्ठानानामप्यध्ययनविधिनैव सिद्धेः क्रतुविधीनां वैय्यर्थ्यमेव। एवञ्चाध्ययनविधेरक्षरग्रहणान्तत्वे सन्ध्योपासनादिविधिवत् पित्रादिभ्यः श्रूयमाणोऽध्ययनविधिरध्ययनं प्रयोजयति, अध्ययनेनोपस्थापिताः क्रतुविधयः यागाद्यनुष्ठानं धर्मविचारं च प्रयोजयन्ति, क्रतुविधयश्चाध्ययनात् प्रागनवगताः इति तेऽध्ययनस्य प्रयोजका न भवन्तीत्यत्र संशीतिलेशस्याप्यभावाद् अध्ययनविधेरक्षरग्रहणार्थत्वमेव युक्तम्। अस्मिन्नेव मते पुरुषार्थानुशासनसूत्राण्यपि सङ्गच्छन्ते। तथाहि– सायणभाष्ये "बोधान्तत्वेऽध्ययनाकार्त्स्न्यम्" "सोऽकाम्यः प्राग्बोध्यभानाभानयोः" "उद्देशायोगाच्च" इत्यादिसूत्राणि अध्ययनविधेरक्षरग्रहणान्तत्वं प्रतिपादयन्ति। सूत्राणामाशयस्तु– "बोधान्तत्वेऽध्ययनाकार्त्स्न्यम्"– ब्राह्मणानां 'राजा राजसूयेन यजेत' इति श्रुते राजसूयेऽधिकाराभावात्, तदर्थविषयकवेदभागानामर्थबोधनस्यानपेक्षत्वात् ब्राह्मणाणां तदध्ययने प्रवृत्तिर्न स्यात्। एवमेव क्षत्रियाणां बृहस्पतिसवविषयकवेदभागानामनध्ययनमित्यध्ययनस्यार्थावबोधपरत्वेऽध्ययनस्याकार्त्स्न्यं स्यादर्थात् स्वशाखायाः सम्पूर्णतः अध्ययनं न केनापि कर्तव्यं स्यादिति भावः। द्वितीयसूत्रस्य पुरुषार्थानुशासनस्य "सोऽकाम्यः प्राग्बोध्यभानाभानयोः" इत्यस्यायं भावः–अग्निहोत्रादिलक्षणवेदार्थः वेदाध्ययनात् प्राग् ज्ञातो न वेति विचारे यदि पित्राद्युपदेशेन पूर्वमेव ज्ञातश्चेत् ज्ञाते इच्छानुदयात् तदर्थं प्रवृत्तिर्न स्यात्। अज्ञातश्चेत् तत्प्रकारकेच्छां प्रति तन्प्रकारकज्ञानस्य कारणत्वात् तद्विषय इच्छाया एवानुदयात् तदर्थमध्ययने प्रवृत्तिर्न स्यात्। अतः अर्थावबोधार्थत्वेऽध्ययनस्य स्वाध्यायाध्ययने नियतप्रवृत्तिर्न स्यात्। "उद्देशायोगाच्च" इति तृतीयसूत्रस्यायं भावः– यदि वेदार्थः सामान्यतो ज्ञातः विशेषतो न ज्ञातः इति सामान्यतो ज्ञाते विशेषतोऽज्ञाते इच्छासम्भवात् पित्रादिभिः सामान्यतः वेदार्थस्याग्निहोत्रादेः उपदेशे सिद्धेऽपि विशिष्य ज्ञानार्थमध्ययने प्रवृत्तिर्युक्तेति चेन्न; अग्निहोत्रादिविशेषज्ञानानां हि न तावदेकबुद्ध्या विशेषाकारेणोद्देशः सम्भवति; अनन्तत्वाद्विशेषविषयाणाम्। सामान्याकारेणोद्देशे सामान्यज्ञानमेव विधिफलं स्यात्, विधिफलत्वस्य

विशेषज्ञानेऽसम्भवात्तदर्थं नियतप्रवृत्तिर्न स्यात्। एवञ्चार्थावबोधस्योद्देश्यत्वा-योगात्फलत्वं न युक्तमिति भावः। एवञ्च स्वाध्यायाध्ययनस्य अक्षरग्रहणान्तत्वं पुरुषार्थानुशासनसूत्राणामपि सम्मतमिति ज्ञायते। एवं स्वाधीनोच्चारणक्षमत्व-लक्षणाक्षरग्रहणार्थमवोध्ययनं स्वाध्यायविधिना विधीयते इति द्वितीयपक्षावलम्बिनां मतम्।

इदानीं शास्त्रदीपिकाकारैः वर्णितः पक्षस्तृतीयो विचार्यते। यद्यपि पक्षेऽस्मिन् वाक्यार्थज्ञानमेव भाव्यम्, विधित्वप्रयोजकरूपमपि पाक्षिकी प्राप्तिरेवेति प्रथमपक्षावलम्बिनां मतमेव समर्थ्यते तथापि नियमस्वरूपे तावद्भेदः दृश्यते। तथाहि–"स्वाध्यायोऽध्येतव्य" इत्यत्र अध्ययनेनार्थज्ञानम-क्षरग्रहणं वा भावयेदिति स्वीकारे अध्ययनसत्त्वे तदर्थज्ञानसत्वमक्षरग्रहणसत्त्वम्, अध्ययनाभावे तदर्थज्ञानाभावोऽक्षरग्रहणाभावो वेति कार्यकारणभाव-नियामकान्वयव्यतिरेकाभ्यामेव निश्चयसम्भवादपूर्वविधित्वं न सम्भवतीति तु स्पष्टम्। अतः अध्ययनेनैवार्थज्ञानमक्षरग्रहणं वा भावयेदिति व्रीहीन-वहन्तीतिवत् नियमो वक्तव्यः। तत्रावघातसिद्धतण्डुलानां नखविदलनादि-साधनान्तरसिद्धतण्डुलानां च स्वरूपे भेदाभावस्य प्रत्यक्षसिद्धत्वात् तण्डुलस्वरूपेऽवघातनियमो वक्तुं न शक्यते, अतः अवघातनिष्पन्नैरेव तण्डुलैः दर्शपूर्णमासीयापूर्वं सिद्ध्यतीति यागीयापूर्वेऽवघातो नियम्यत इति वक्तव्यम्, अत्र च प्रमाणम् प्रकरणम्, यतः व्रीहीनवहन्तीति वाक्यं "दर्शपूर्णमासप्रकरणे समाम्नातम्। प्रकृतमध्ययनविधायकवाक्यन्तु अनारभ्याधीतमतः क्रत्वर्थमिति प्रकरणप्रमाणान्न सिद्ध्यति। "यस्य पर्णमयी जुहूर्भवति" इत्यत्र वाक्यप्रमाणेनानारभ्याधीतस्यापि क्रत्वर्थत्वं स्वीकृतम्, प्रकृते तु श्रुत्यादिप्रमाणाभावादपि न क्रत्वर्थत्वमध्ययनस्य सिद्ध्यति। ननु यथा दर्शपूर्णमासीयपरमापूर्वमवघातनियमजन्यस्य अवान्तरापूर्वस्य कल्पकम् तथाशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्यापूर्वस्य कल्पकमर्थात् अर्थात् अर्थावबोधद्वारा क्रतुनिर्वर्तनसामर्थ्यरूपलिङ्गादेव अध्ययनं क्रत्वपूर्वे नियम्यत इति चेत् न; अशेषक्रतुजन्यमेकमपूर्वमस्ति चेत्तदर्थेऽध्ययनं नियम्यते इति सम्यक् स्यात् किन्तु तत्सत्त्वे किमपि प्रमाणं नोपलभ्यते, सर्वे क्रतुविधयः तत्तत्सन्निधौ प्रकरणे वा समाम्नातैः श्रुतिलिङ्गादिप्रमाणसिद्धैः

अतिदेशतः सिद्धैर्वाङ्गजातैर्निराकाङ्क्षाः सन्तः स्वापूर्वसिद्धये नियमान्तरं नापेक्षन्ते। अध्ययनस्यार्थज्ञानस्य च सिद्धिरपि क्रतुविध्याक्षेपादेव भवतीति तदर्थमध्ययनविधौ नियमत्वस्यापेक्षाभावात् क्रत्वपूर्वेऽध्ययनं नियम्यत इति तु रिक्तं वचः। किञ्च लिङ्गप्रमाणं सर्वत्र प्रकरणादिप्रमाणान्तरसापेक्षमेव नियमविधौ स्वार्थं बोधयतीति स्वीकार्यम्। तथाहि— लिङ्गं द्विविधम्— सामान्यसम्बन्धबोधकप्रमाणान्तरसापेक्षम्, तादृशप्रमाणान्तरानपेक्षमिति। आद्यं यथा— 'बर्हिर्देवसदनं दामि' इत्यस्य मन्त्रस्य लवनाङ्गत्वम्। अत्रायं मन्त्रो बर्हिर्लवनं प्रकाशयति इति शब्दगतसामर्थ्यरूपलिङ्गादवगम्यते। परन्तु अस्य मन्त्रस्योच्चारणपूर्वकं लवनं कार्यमिति तु लिङ्गप्रमाणमात्रान्नावगम्यते। यतः लवनं मन्त्रं विनाप्युपायान्तरेण स्मृत्वा कर्तुं शक्यमेव। अतः मन्त्रो लवनस्वरूपार्थः इति वक्तुं शक्यते किन्तु अपूर्वसाधनीभूतलवनप्रकाशार्थोऽयं मन्त्र इति वक्तव्यम्, तत्र अपूर्वसाधनीभूतत्वं लवनस्य मन्त्रसामर्थ्यात्कथमपि न सिद्ध्यति, तदर्थमयं मन्त्रः दर्शपूर्णमासक्रत्वर्थ इति प्रकरणप्रमाणात्सिद्धे मन्त्रेणानेन दर्शपूर्णमासापूर्वसम्बन्धि किञ्चित् प्रकाश्यते इति वक्तव्यम्, किं तदपूर्वसम्बन्धि प्रकाश्यमित्यपेक्षायां मन्त्रगतशब्दसामर्थ्यरूपलिङ्गाद् बर्हिर्लवनमिति निश्चीयते।

प्रकृते "स्वाध्यायोऽध्येतव्यः" इति वाक्यन्तु अनारभ्याधीतमतः प्रकरणादिप्रमाणाभावात् क्रत्वर्थत्वमेव न सिद्ध्यति इत्यर्थज्ञानार्थमक्षरग्रहणार्थं वाध्ययनं कार्यमिति नियमे लिङ्गप्रमाणं न समर्थम्।

यदपि सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षमपि लिङ्गप्रमाणं विनियोजकं भवति, यथा कर्मानुष्ठानार्थमर्थज्ञानं भावयेदिति लिङ्गादेवावगम्यते तदपि प्रकृते अध्ययनविधिविषये नियामकं न भवति। यतः अर्थज्ञानार्थम- क्षरग्रहणार्थं वाध्ययनमपेक्षितमिति तु सामर्थ्यरूपलिङ्गादवगम्यते किन्तु गुरुमुखोच्चारणानूच्चारणात्मकाध्ययनेनैवार्थज्ञानादिकं भावयेदिति नियमस्तु सामान्यसम्बन्धबोधकप्रमाणान्तरेण विना न सिद्ध्यतीति लिङ्गप्रमाणादपि क्रत्वपूर्वेऽध्ययनं न नियम्यते इति सिद्धम्। अतः "स्वाध्यायोऽध्येतव्य" इत्यत्र अध्ययननियमः वेदाध्ययने त्रैवर्णिकानामेवाधिकार इत्यधिकारनियमार्थ इति स्वीकार्यम्। तथाहि— "वसन्ते ब्राह्मणमुपनयीत" "ग्रीष्मे राजन्यम्"

"शरदि वैश्यम्" इति त्रैवर्णिकानामुपनयनं विहितम्। अत्र ब्राह्मणादि-कर्तृकमुपनयनं विहितम्। उपनयनेन किं भावयेदिति तु न श्रुतम्। दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वादुपनयनेनादृष्टं भावयेदिति कल्पना नोचिता। अत उपनयनेन किमपि दृष्टं भावयेदिति स्वीकार्यम्। किं तद् दृष्टमित्याकाङ्क्षायां तत्सन्निधौ पठितेन "स्वाध्यायोऽध्येतव्य" इत्यनिर्दिष्ट-कर्तृकाध्ययनविधिवाक्येन विहितमध्ययनं भाव्यत्वेनान्वेति। अत्रापेक्षासत्ति-योग्यत्वैरुपनयनाध्ययनविधिवाक्ययोः नष्टाश्वदग्धरथन्यायेनैकवाक्यता सिद्ध्यति। अत्रापेक्षासत्तियोग्यत्वानीत्युक्तौ शाब्दबोधे सहकारिकारणत्वेन प्रसिद्धानि आकाङ्क्षासन्निधियोग्यतान्येव। अध्ययनविधौ कर्तुः श्रवणाभावात् केनाध्ययनं कार्यमिति कर्त्रपेक्षा, उपनयनविधौ भाव्यस्य साध्यस्य श्रवणाभावात् किं कार्यमुपनयनेनेति किमाकाङ्क्षा दृश्यते। अतः उपनयनविध्येकवाक्यतया अध्ययनविधिः त्रैवर्णिकानामेवोपनीतानां वेदाध्ययनेऽधिकारः, क्रतुविधयः "अग्निहोत्रं जुहोति" इत्यादयः अपेक्षासत्तियोग्यत्वैः अध्ययनविधिसिद्ध-विद्यावतामेव क्रतुष्वधिकार इति बोधयन्ति। एवञ्चाग्निहोत्रादि-क्रतुविधिष्वधिकारिश्रवणाभावेऽपि स्वर्गकामनावतामेवाधिकारश्रवणेऽपि अध्ययनविधौ कर्तुः श्रवणाभावेऽपि उपनयननविधायकवाक्येषु कर्तृश्रवणात् उपनीतानामध्ययनमध्ययनसिद्धविद्यावतां क्रतुष्वधिकार इत्यधिकारनियमो-ऽध्ययनविधिबलात् सिद्ध्यति। असत्यध्ययनविधौ क्रतुविधयो विद्वांसमलभमाना अविद्वांसमेवाधिकृत्य विद्यामन्तरेणानुष्ठानासम्भवाद् विद्यामाक्षिपन्तो-ऽविशेषाच्चतुरो वर्णानधिकुर्युरिति त्रैवर्णिकानामेव वेदाध्ययने क्रत्वनुष्ठाने चाधिकार इति नियमो न सिद्ध्येत्। ननु त्रैवर्णिकानामेव वेदाध्ययनेऽधिकार इति नियमो मास्तु का हानिरिति चेत् न, अपशूद्राधिकरणविरोधात्। अपशूद्राधिकरणे हि– किमग्निहोत्रादिषु चतुर्णामपि वर्णानामधिकार उतापशूद्राणां त्रयाणामिति विशयेऽर्थित्वे सति सामर्थ्यस्याधिकारलक्षणस्य चतुर्ष्वपि समानरूपेण विद्यमानत्वाच्चतुर्णामप्यधिकार इति पूर्वपक्षे प्राप्ते[१३६] एवं विचारितम्– किं कामश्रुतिप्रयुक्तं विद्यार्जनम् उत स्वाध्यायविधि-सिद्धविद्योपजीविन्यः कामश्रुतयः इति। आद्ये "स्वर्गकामो यजेत"

---

१३६. चातुर्वर्ण्यमविशेषात् ६.१.२७ जै.सू.

इत्यादिकामश्रुतिप्रयुक्तं विद्यार्जनं चतुर्णामपि स्यात्। द्वितीये तु पूर्वमिदं विचार्यं भवति "स्वाध्यायोऽध्येतव्य" इति विधेः अधिकारिणः के इति यतः अनिर्दिष्टकर्तृकमध्ययनमत्र 'तव्य' प्रत्ययेन विधीयते। अत्र यदि अध्ययनकामैरर्थज्ञानकामैर्वाध्ययनं चेद् गौरवं भवति। यतः क्रतुविधयः क्रत्वनुष्ठानस्यान्यथानुपपत्त्या विद्यार्जनमाक्षिपन्ति। अतः क्रतुविधिप्रयुक्त-मेवाध्ययनमिति स्वीकारेऽध्ययनविधेः वैय्यर्थ्यापत्त्यादृष्टार्थत्वं कल्पनीयम्। तच्च क्रतुविधयः स्वाध्यायोपात्तविद्यैः द्विजैरेव लब्धात्मानोऽनुपपत्तिक्षयान्न चतुर्थस्य विद्यामाक्षिपन्तीत्यङ्गीकारेणोपपत्तौ गौरवम्। स्वाध्यायविद्योपात्ता द्विजा एवेत्यत्र किं प्रमाणमिति चेत्, उच्यते– उपनयनविधायकानि वाक्यान्येव श्रूयन्ते– 'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्" अत्र त्रैवर्णिकानामेवोपनयनं विधीयते। चतुर्थस्योपनयनविधायकं वाक्यं किमपि न श्रूयते। तद्यदि "अध्ययनविधि"बलादेव कल्प्यते चेत् कल्पनागौरवं स्यात्। अतः उपनयनसंस्कृतान् द्विजानेवाधिकृत्याध्ययनविधिः कृतकृत्यो-भवतीति स्वाध्यायविद्योपात्ता द्विजा एवेति निश्चीयते। अन्यथा गोदोहनाधिकरणविरोधः स्यात्। तथाहि– गोदोहनाधिकरणे[१३७]– 'गोदोहनेन पशुकामस्यापः प्रणयेत्", "आपः प्रणयति" इति दर्शपूर्णमासयोः श्रूयते। तत्र जलप्रणयनसाधनभूतं गोदोहनस्य क्रत्वर्थत्वेऽपि न क्रतुः प्रयोजकः किन्तु पशुफलमेव प्रयोजकम्, फलप्रयुक्तेनैव क्रतूपकारसिद्धौ क्रतोस्तत्प्रयुक्ता-वुदासीनत्वमिति निर्णीतम्। तत्रैतत्पशुफलाय जलप्रणयनं येन केनापि कार्यमुत दर्शपूर्णमासे योऽधिकृतस्तेनैवेति विशये गोदोहनमाश्रयक्रियापेक्षमपि प्रसङ्गात्क्रत्वर्थत्वेन जलप्रणयनेन निराकाङ्क्षत्वान्न क्रियान्तरमाक्षिपतीति निश्चितम्। प्रकृतेऽपि उपनयनविधिना संस्कृतान् द्विजानेवाध्ययनविधिः स्वनियोज्यत्वेनाधिकरोति, अतः चतुर्थस्य नाध्ययनाधिकाराक्षेप इति युक्तमित्याक्षेपलाघवाद् वक्तुं शक्यते। एवञ्च "स्वाध्यायोऽध्येतव्य" इत्यत्र नियमविधिः, अध्ययनस्य वाक्यार्थज्ञानमेव प्रयोजनम्, नियमस्य प्रयोजनञ्चाध्ययने त्रैवर्णिकानामुपनीतानामेवाधिकार इति सिद्धम्। अत्रायमाशयः– "वेदस्यार्थं वक्तुं वयं प्रभवामः न तु वेदं पर्यनुयोक्तुम्" इति वेदप्रामाण्याभ्युपगन्तॄणां मतम्। वेदे च उपनयनं त्रैवर्णिकानामेव श्रूयते।

१३७. मीमांसाद. ४.१.१

त्रीणि वाक्यानि चोक्तानि। अध्ययनविधिबलात् चतुर्थस्योपनयनं कल्प्यते चेत् तद्विधायकानि वाक्यानि निरर्थकानि स्युः। अतः बाधसिद्ध्यधिकरणे यथा अपेक्षासत्तियोग्यत्वैरङ्गानामुपकारस्यैवातिदेशः समर्थितः तथात्रापि अपेक्षासत्तियोग्यत्वैः अध्ययनविधायकवाक्यस्योपनयनविधीनाञ्च पर्यालोचनया त्रैवर्णिकानामेवाध्ययनेऽधिकार इति अध्ययनविधिनियमबलान्निश्चीयत इति।

चतुर्थपक्षस्तु "स्वाध्यायोऽध्येतव्यः" अत्रापूर्वविधिरेव, अध्ययनञ्च क्रत्वर्थमप्यनारभ्याधीतस्यापि अर्थावबोधद्वारा क्रतुनिवर्तनसामर्थ्यात् क्रत्वर्थत्वमुपपद्यत इति शास्त्रदीपिकव्याख्याकाराणां सिद्धान्तचन्द्रिकाकाराणां पक्षः। लिङ्गतः शीघ्रं श्रुतेः प्रवृत्तेः यावत् फलवत्कर्मानुष्ठानोपयोगिज्ञानोपायतया सामर्थ्येन वेदपुस्तकपाठादिकिञ्चित्कल्पयितुमारभ्यते तावदनेन विधिना साक्षादध्ययनमेव तदुपायत्वेन विधीयते, अध्ययनञ्चात्र गुरुमुखोच्चारणानूच्चारणमिति पूर्वमेवोक्तम्, उपनयनप्रक्रमाधीतत्वाच्च तदेकवाक्यतयाधिकारनियमोऽपि सिद्ध्यति। अपूर्वविधित्वेऽपि फलतः नियमः उपायान्तरानाक्षेपात् सिद्ध्यति, परिसङ्ख्यावत्। वाक्यार्थत्वे हि परिसङ्ख्यायाः स्वार्थहानादिदोषः प्रसज्येत। अतः अत्रापि न नियमो वाक्यार्थः किन्त्वपूर्वविधेः फलम्। न चैतावताध्ययनस्य क्रत्वङ्गतापत्तिः। अध्ययनेनार्जितज्ञानस्यैव क्रत्वङ्गत्वश्रवणात्, "यदेव विद्यया करोति तदेव वीर्यवत्तरं भवती–" ति ज्ञानस्यैव क्रत्वङ्गत्वबोधनात्। यद्यप्यत्र तरप्प्रत्ययात् विद्याभावेऽपि कर्म वीर्यवदेव भवतीत्युक्तम्, तथापि वाक्येन वेदार्थज्ञानसामान्याभावेन कर्म सफलं भवतीति नोच्यते अपि तु कृत्स्नवेदार्थज्ञानं कर्माधिकारिविशेषणतया नापेक्षत इत्येव प्रतिपाद्यते। अतः वेदज्ञानमेव क्रत्वङ्गमिति नाध्ययनं क्रत्वङ्गम्। अत एव "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति" "एवंविदमेव ब्राह्मणं कुर्वीत नानेवं विदम्" इत्यादिश्रुतौ स्पष्टं स्वाध्यायार्जितज्ञानमेव क्रत्वङ्गत्वेनोक्तम्। अतः यथा आधानसाध्याग्नीनां क्रत्वङ्गत्वेऽपि नाधानस्य क्रत्वङ्गत्वं तथाध्ययनार्जितज्ञानस्य क्रत्वङ्गत्वेऽपि नाध्ययनस्य क्रत्वङ्गत्वम्। द्वितीयतृतीयतृतीये "आधानेऽसर्वशेषत्वादि–" ति आधानस्य सर्वक्रत्वर्थतया विधेरश्रवणात् "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्यादि वाक्यानि ब्राह्मणादिवसन्तादि–

विशिष्टाधानविधायकान्येवेति आधानस्य पुरुषार्थत्वेऽपि आधानसाध्याग्नीनां क्रत्वर्थत्वमुपपादितम्। एवञ्च अध्ययनस्य पुरुषार्थत्वेऽपि अध्ययनेनार्जितज्ञानस्य क्रत्वर्थत्वमुपपद्यत इत्यध्ययनविधिरपूर्वविधिरेवेति चतुर्थः पक्ष उपपादितः।

अध्यापनविधिप्रयुक्तमेवाध्ययनं न त्वध्ययनविधिप्रयुक्तमिति पक्षः प्राभाकराणाम्। तत्र "अष्टवर्षं ब्राह्मणमुचनयीत" "तमध्यापयीत" इत्युपनयनाध्यापनयोरेकवाक्यतया ज्ञायते। तच्चोपनयनं कथमध्यापनस्योप-करोतीति विचारे उपनेयासत्तिद्वारेति सामर्थ्यान्निश्चीयते, उपनेयासत्तिश्च न स्वरूपतोऽध्यापनस्योपकारिकेति अध्ययनस्य तद्व्यापारत्वं निश्चीयते। एवं स्वाङ्गमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वारैणाध्ययनं प्रयुङ्क्ते। तत्राचार्यक-सिद्धिरेवाध्ययनस्य प्रयोजनमुतार्थज्ञानमिति विशयेऽन्तरङ्गत्वादर्थज्ञानमिति तदर्थं मीमांसाशास्त्रामारम्भणीयमिति विवरणानुसारिणः। तदुक्तम्–" नियोगनिष्पत्तिरेव शाब्दं प्रयोजनम्, आर्थन्त्वर्थावबोधनमिति न विरोधः। यच्च तदर्थावबोधाख्यं प्रयोजनं तन्न केवलाध्ययनसाध्यमिति अध्ययनविधिरेव स्वप्रयोजनसिद्धये विचारमाक्षिपती–"ति।[१३८]

शालिकनाथमिश्राणां मते तु "उपनीय तु यः शिष्यं वेदमध्या-पयेद्द्विजः। सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते।।" इति मनुना स्मरणात् स्मृत्यधिकरणन्यायेन स्मरणानुमितश्रुत्या शिष्यमुपनीय वेदाध्यापनेनाचार्यकं भावयेदित्येवंरूपो विधिः कल्प्यते इति विशेषः। अन्यत् सर्वं प्रायः समानमेव।

प्रभाकरेण भट्टेन जातेन रामणीकुले।
गोकर्णाख्ये शिवक्षेत्रे वैदिकैर्मण्डिते शुभे।।१।।

इत्थं श्रीमाधवाचार्यप्रणीते ग्रन्थतल्लजे।
धर्ममीमांसया भक्त्या व्याख्याता भेदलक्षणी।।२।।

कर्मणानेन भगवान् वाक्पुष्पैरर्चितो हरिः।
प्रीयतां धर्मकृद्धर्मी धर्मो धर्मविदुत्तमः।।३।।

इत्थं जैमिनीयन्यायमालाप्रकाशिकायां
द्वितीयस्य चतुर्थः पादः द्वितीयाध्यायश्च।।

---

१३८. प्रकरणपञ्चिका प्रथमप्रकरणे



**डॉ. प्रभाकरप्रसादः**

**पितृनाम–श्रीविश्वनाथभट्टप्रसादः**

**जन्मस्थानम्–गोकर्णक्षेत्रम् (कर्नाटके**

**कृतयः**

**जैमिनीयन्यायमालाप्रकाशिकायाः प्रथ**

**(प्रमाणाध्यायः)**

**सम्पादनम्–शाब्दनिर्णयदीपिका।**

**अनुवादः–व्याप्तिपञ्चकस्य पञ्चमल**

**लेखा–विविधासु पत्रिकासु लेखाः प्र**

**अयं व्याख्याकारः वेदमूर्त्तीनां श्रीसाम्**

**ग्रान्निधावधीतस्वाध्यायः, काश्यां प**

**दिबिरुदभाजां श्री एस्. सुब्रह्मण्**

**पद्मभूषणश्रीपट्टाभिरामशास्त्रिणां**

**महामण्डलेश्वराणां दिव्यानन्दस्वामिनां**

**नन्दस्वामिनां, प्रो. रामकृष्णभट्टान**

**कृतवेदान्तमीमांसादिशास्त्राध्ययनः,**

**2001 खैस्ताब्दतः श्री ला.ब.शा.रा.सं.**

**सहायकाचार्यपदे सेवारतः।**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
( मानितविश्वविद्यालयः )
नवदेहली-110016